Purshottam mahatma;
Ganpat Krishji press.— Mumbai, Saka 1811

210021 O/L
02

23982

॥ अथ पुरुषोत्तममाहात्म्यं प्रारभ्यते ॥



तिश्रीलिनः॥ परप्रियरतानित्यंश्रौतस्मार्तपरायणाः ॥ १४ ॥ नैमिषारण्यमासाद्यसत्रंकर्तुंसमुद्यताः ॥ तीर्थया
त्रामथोद्दिश्यगेहात्सूतोविनिर्गतः ॥ १५ ॥ पृथिवींपर्यटन्नेवनैमिषेदृष्टवान्मुनीन् ॥ तान्सशिष्यान्नमस्कर्तुंसंसारा
र्णवतारकान् ॥ १६ ॥ सूतःप्रहर्षितःप्रागाद्यत्रासंस्तेमुनीश्वराः ॥ ततःसूतंसमायातंरक्तवल्कलधारिणं ॥ १७॥प्रस
न्नवदनंशांतंपरमार्थविशारदं॥अशेषगुणसंपन्नमशेषानंदसंप्लुतं ॥१८॥ ऊर्ध्वपुंड्रधरंश्रीमन्नाममुद्राविराजितं ॥
शंखचक्रधरंदिव्यंगोपीचंदनमृत्स्नया ॥ १९ ॥ लसच्छ्रीतुलसीमालंजटामुकुटमंडितं॥ जपंतंपरमंमंत्रंहरेःशरणम
द्भुतं॥२०॥सर्वशास्त्रार्थसारज्ञंसर्वलोकहितेरतं॥जितेंद्रियंजितक्रोधंजीवन्मुक्तंजगद्गुरुं॥२१॥व्यासप्रसादसंपन्नं
व्यासवद्विगतस्पृहं॥तंदृष्ट्वासहसोत्थायनैमिषेयामहर्षयः॥२२॥श्रोतुकामाःसमावव्रुर्विचित्राविविधाःकथाः॥त
तःसूतोविनीतात्मासर्वानृषिवरान्मुदा॥बद्धांजलिपुटोभूत्वाननामदंडवन्मुहुः॥२३॥ ऋषयऊचुः सूतसूतचिरंजी
वमहाभागवतोभवान् ॥ अस्माभिस्त्वासनंतेऽद्यकल्पितंसुमनोहरं॥२४॥अत्रास्यतांमहाभागश्रांतोसीत्यवदन्द्वि
जाः॥इत्युक्त्वासूपविष्टेषुसर्वेषुचतपस्विषु ॥२५॥ तपोवृद्धिंततःपृष्ट्वासर्वान्मुनिगणान्मुदा ॥ निर्दिष्टमासनंभेजेविन
याद्रौमहर्षणिः॥२६॥सुखासीनंततस्तंतुविश्रांतमुपलक्ष्यच॥श्रोतुकामाःकथाःपुण्याइदंवचनमब्रुवन्॥२७॥ऋषय

ऊचुः सूतसूतमहाभागभाग्यवानसिसांप्रतं ॥ पाराशर्यवचोहार्दंत्वंवेदकृपयागुरोः ॥ २८ ॥ सुखीकच्चिद्भवानद्यचि
रादृष्टःकथंवने॥ श्लाघनीयोसिपूज्योऽसिव्यासशिष्यशिरोमणे॥ २९ ॥ संसारेऽस्मिन्नसारेतुश्रोतव्यानिसहस्रशः॥
तत्रश्रेयस्करंस्वल्पंसारभूतंचयद्भवेत्॥ ३० ॥ तन्नोवदमहाभागयत्तेमनसिनिश्चितं॥ संसारार्णवमग्नानांपारदंशुभ
दंचयत् ॥ ३१ ॥ अज्ञानतिमिरांधानांनेत्रदानपरायण॥ वदशीघ्रंकथासारंभवरोगरसायनं ॥ ३२ ॥ हरिलीलारसोपे
तंपरमानंदकारणं ॥ एवंपृष्टःशौनकाद्यैःसूतःप्रोवाचप्रांजलिः ॥ ३३ ॥ सूतउवाच श्रृण्वंतुमुनयःसर्वेमदुक्तंसुम
नोहरं ॥ आदावहंगतोविप्रास्तीर्थंपुष्करसंज्ञितं ॥ ३४ ॥ स्नात्वातत्र्वाऋषीन्पुण्यान्सुरान्पितृगणानथ ॥ ततःप्र
यातोयमुनांप्रतिबंधविनाशिनीं ॥ ३५ ॥ क्रमादन्यानितीर्थानिगत्वागंगामुपागतः ॥ ततःकाशीमुपागम्यगयांग
त्वाततःपरं ॥ ३६ ॥ पितॄन्निष्वाततोवेणींकृष्णांचतदनंतरं ॥ ततःस्नात्वाचगंडक्यांपुलहाश्रममाव्रजं ॥ ३७ ॥ धेनुम
त्यामहंस्नात्वाततःसारस्वतेतटे ॥ त्रिरात्रमुषितोविप्रास्ततोगोदावरींगतः ॥ ३८ ॥ कृतमालांचकावेरींनिर्विंध्यांता
म्रपर्णिकाम् ॥ तापींवैहायसींनंदांनर्मदांशर्मदांगतः ॥ ३९ ॥ गत्वाचर्मण्वतींपश्चात्सेतुबंधमथागमं ॥ ततोनाराय
णंद्रष्टुंगतोहंबदरीवनं॥ ४० ॥ ततोनारायणंदृष्ट्वातापसानभिवाद्यच॥ नत्वास्तुत्वाचतंदेवंसिद्धक्षेत्रमुपागतः ॥ ४१ ॥

पुरु. एवमादिषुतीर्थेषुभ्रमन्नागतवान्कुरून्॥ जांगलंदेशमासाद्यहस्तिनापुरगोऽभवं॥४२॥तत्रश्रुतंविष्णुरातोराज्यमु मा.
२ त्सृज्यजग्मिवान्॥ गंगातीरंमहापुण्यमृषिभिर्बहुभिर्द्विजाः॥४३॥ तत्रसिद्धाःसमाजग्मुर्योगिनःसिद्धिभूषणाः॥ दे
वर्षयश्चतत्रैवनिराहाराश्चकेचन॥४४॥ वातांबुपर्णाहाराश्चश्वासाहाराश्चकेचन॥ फलाहाराःपरेकेचित्फेनाहारा
श्चकेचन॥४५॥तंसमाजंप्रष्टुकामस्तत्राहमगमंद्विजाः॥तत्राजगामभगवान्ब्रह्मभूतोमहामुनिः॥४६॥ व्यासपुत्रो
महातेजाःशुकदेवःप्रतापवान्॥ श्रीकृष्णचरणांभोजेमनसोधारणांदधत्॥४७॥ तंद्व्यष्टवर्षयोगीशंकंबुकंठंमहोन्न
तम्॥ स्निग्धालकावृतमुखंगूढजत्रुंज्वलत्प्रभं॥४८॥ अवधूतंब्रह्मभूतंष्ठीवद्भिर्बालकैर्वृतं॥ स्त्रीगणैर्धूलिहस्तैश्चम
क्षिकाभिर्गजोयथा॥४९॥ धूलिधूसरसर्वांगंशुकंदृष्ट्वामहामुनिं॥ मुनयःसहसोत्तस्थुर्बद्धांजलिपुटामुदा॥५०॥
स्त्रियोमूढाश्चबालास्तेतंदृष्ट्वादूरतःस्थिताः॥ पश्चात्तापसमायुक्ताःशुकंनत्वागृहान्ययुः॥५१॥ आसनंकल्पयांच
क्रुःशुकायोन्नतमुत्तमं॥ आसेदुर्मुनयोंऽभोजकर्णिकायाश्छदाइव॥५२॥ तत्रोपविष्टोभगवान्महामुनिर्व्यासा
त्मजोज्ञानमहाब्धिचंद्रमाः॥ पूजांदधद्ब्राह्मणकल्पितांतदारराजतारावृतचंद्रमाइव॥५३॥ इतिश्रीबृहन्नारदीये २
पुरुषोत्तममाहात्म्येशुकागमनेप्रथमोऽध्यायः॥१॥सूतउवाच राज्ञापृष्टंशुकेनोक्तंश्रीमद्भागवतंपरं॥शुकप्रसादात्त

श्रीगणेशायनमः॥ ॥श्रीगुरुभ्योनमः ॥ श्रीगोपीजनवल्लभायनमः ॥ वंदेवंदारुमंदारंवृंदावनविनोदिनं ॥ वृं
दावनकलानाथंपुरुषोत्तममद्भुतं ॥ १ ॥ नारायणंनमस्कृत्यनरंचैवनरोत्तमं ॥ देवींसरस्वतींव्यासंततोजयमुदीरये
त् ॥ २ ॥ नैमिषारण्यमाजग्मुर्मुनयःसत्रकाम्यया ॥ असितोदेवलःपैलःसुमंतुःपिप्पलायनः ॥ ३ ॥ सुमतिःकाश्यप
श्चैवजाबालिर्भृगुरंगिराः ॥ वामदेवःसुतीक्ष्णश्चशरभंगश्चपर्वतः ॥४॥ आपस्तंबोऽथमांडव्योऽगस्त्यःकात्यायनस्त
था ॥ रथीतरोऋभुश्चैवकपिलोरैभ्यएवच ॥ ५ ॥ गौतमोमुद्गलश्चैवकौशिकोगालवःक्रतुः ॥ अत्रिर्बभ्रुस्त्रितःशक्ति
र्बुधोबौधायनोवसुः ॥ ६ ॥ कौंडिन्यःपृथुहारीतौधूम्रःशंकुश्चसंकृतिः ॥ शनिर्विभांडकःपंकोगर्गःकाणादएवच
॥ ७ ॥ जमदग्निर्भरद्वाजोधूमपोमौनभार्गवः ॥ कर्कशःशौनकश्चैवशतानंदोमहातपाः ॥ ८ ॥ विशालाख्योविष्णुवृ
द्धोजर्जरोजयजंगमौ ॥ पारःपाशधरःपूरोमहाकायोऽथजैमिनिः ॥९॥ महाग्रीवोमहाबाहुर्महोदरमहाबलौ ॥ उद्दा
लकोमहासेनआर्तआमलकप्रियः॥ १० ॥ ऊर्ध्वबाहुरूर्ध्वपादएकपादश्चदुर्धरः॥उग्रशीलोजलाशीचपिंगलोऽत्रि
र्ऋभुस्तथा ॥ ११ ॥ शांडीरःकरुणःकालःकैवल्यश्चकलाधरः ॥ श्वेतबाहूरोमपादःकद्रुःकालाग्निरुद्रगः ॥ १२ ॥ श्वे
ताश्वतरएवाद्यःशरभंगःपृथुश्रवाः ॥ एतेसशिष्याब्रह्मिष्ठावेदवेदांगपारगाः ॥ १३ ॥ लोकानुग्रहकर्तारःपरोपकृ

तेतपसिसंस्थितिः॥ भगवन्प्राणिनःसर्वेविषयासक्तमानसाः॥ १५ ॥ दारापत्यगृहासक्तस्तेषांहितकरंचयत् ॥ ममा
पिहितकृत्किंचिद्विचार्यक्षंतुमर्हसि॥ १६ ॥ त्वन्मुखाच्छ्रोतुकामोहंब्रह्मलोकादिहागतः ॥ उपकारप्रियोविष्णुरिति
वेदेविनिश्चितं॥ १७॥ तस्माल्लोकोपकारायकथासारंवदाधुना॥ तस्यश्रवणमात्रेणनिर्भयंविंदतेपदं ॥ १८॥ ना
रदस्यवचःश्रुत्वाप्रहस्यभगवानृषिः॥ कथांकथितुमारेभेपुण्यांभुवनपावनीं ॥ १९ ॥ ॥ श्रीनारायणउवाच ॥
गोपांगनावदनपंकजषट्पदस्यरासेश्वरस्यरसिकाभरणस्यपुंसः॥ वृंदावनेविहरतोव्रजभर्तुरादेःपुण्यांकथांभगव
तःश्रृणुनारदत्वं॥२०॥ चक्षुर्निमेषपतितोजगतांविधातातत्कर्मवत्सकथितुंभुविकःसमर्थः॥ त्वंचापिनारदमुनेभग
वच्चरित्रंजानासिसारसरसंवचसामगम्यं ॥ २१ ॥ तथापिवक्ष्येपुरुषोत्तमस्यमाहात्म्यमत्यद्भुतमादरेण ॥ दारि
द्र्यवैधव्यहरंयशस्यंसत्पुत्रदंमोक्षदमाशुसेव्यं ॥ २२ ॥ ॥ नारदउवाच पुरुषोत्तमस्तुकोदेवोमाहात्म्यंतस्य
किंमुने॥ अत्यद्भुतमिवाभातिविस्तरेणवदस्वमे॥ २३॥ सूतउवाच नारदोक्तंवचःश्रुत्वामुनिर्नारायणोब्रवी
त्॥ समाधायमनःसम्यक्मुहूर्तंपुरुषोत्तमं॥ २४ ॥ श्रीनारायणउवाच पुरुषोत्तमेतिमासस्यनामाप्यस्तिसहेतु
कं॥ तस्यस्वामीकृपासिंधुःपुरुषोत्तमउच्यते॥ २५॥ ऋषिभिःप्रोच्यतेतस्मान्मासःश्रीपुरुषोत्तमः ॥ तस्यव्रतविधा

नेनप्रीतःस्यात्पुरुषोत्तमः ॥ २६ ॥ नारदउवाच संतिमध्वादयोमासाःसेश्वरास्तेश्रुतामया ॥ तन्मध्येनश्रुतोमासः
पुरुषोत्तमसंज्ञकः ॥ २७॥ पुरुषोत्तमस्तुकोमासस्तस्यस्वामीकृपानिधिः ॥ पुरुषोत्तमःकथंजातस्तन्मेब्रूहिकृपानि
धे॥ २८॥ स्वरूपंतस्यमासस्यसविधानंवदप्रभो॥ किंकर्तव्यंकथंस्नानंकिंदानंतत्रसत्पते॥ २९॥ जपपूजोपवासा
दिसाधनंकिंचभण्यतां ॥ तुष्येत्कृतेनकोदेवःकिंफलंवाप्रयच्छति ॥ ३० ॥ एतदन्यच्चयत्किंचित्तत्त्वंब्रूहितपोधन
अनापृष्टमपिब्रूयुःसाधवोदीनवत्सलाः॥ ३१॥ नरायेभुविजायंतेपरभाग्यानुवर्तिनः॥ दारिद्र्यपीडितानित्यंरोगि
णःपुत्रकांक्षिणः ॥ ३२॥ जडामूकादांभिकाश्चहीनविद्याःकुचैलिनः ॥ नास्तिकालंपटानीचाजर्जराःपरसेविनः
॥ ३३॥ नष्टाशाभग्नसंकल्पाःक्षीणसत्वाःकुरूपिणः॥ रोगिणःकुष्ठिनोव्यंगानेत्रहीनाश्चकेचन ॥ ३४॥ इष्टमित्रक
लत्रात्मपितृमातृवियोगिनः॥ शोकदुःखादिशुष्कांगाःस्वेष्टवस्तुविवर्जिताः ॥ ३५॥ पुनर्नैवंविधास्तेस्युर्यत्कृतेनश्रु
तेनच॥ पठितेनानुचीर्णेनतद्वदस्वममप्रभो॥ ३६॥ वैधव्यंवध्यतादोषहीनांगत्वदुराधयः ॥ रक्तपित्ताद्यपस्माररा
जयक्ष्मादयश्चये॥ ३७॥ एतैर्दोषसमूहैश्चदुःखितान्वीक्ष्यमानवान्॥ दुःखितोऽस्मिजगन्नाथकृपांकृत्वाममोपरि
॥ ३८॥ विस्तरेणवदब्रह्मन्मन्मनोमोदहेतुकं॥ सर्वज्ञःसर्वतत्त्वानांनिधानंत्वमसिप्रभो ॥ ३९॥ सूतउवाच

इतिविधितनयोदितंरसालंजनहितहेतुनिशम्यदेवदेवः ॥ अभिनवघनरावरम्यवाचाऽवददभिपूज्यमुनिंसुधांशु
शांतं ॥ ४० ॥ इतिश्रीबृहन्नारदीयेपुरुषोत्तममाहात्म्येश्रीनारायणनारदसंवादेप्रश्नविधिर्नामद्वितीयोऽध्यायः॥ २॥
ऋषयऊचुः नारायणोनरसखोयदुवाचशुभंवचः ॥ नारदायमहाभागतन्नोवदसविस्तरं ॥ १ ॥ सूतउवाच
नारायणवचोरम्यंश्रूयतांद्विजसत्तमाः ॥ यदुक्तंनारदायैतत्प्रवक्ष्यामियथाश्रुतं ॥ २ ॥ ॥ श्रीनारायणउवाच
शृणुनारदवक्ष्यामियदुक्तंहरिणापुरा ॥ राज्ञेयुधिष्ठिरायैवश्रीकृष्णेनमहात्मना ॥ ३ ॥ एकदाधार्मिकोराजाऽजात
शत्रुर्युधिष्ठिरः ॥ द्यूतेपराजितोदुष्टैर्धार्तराष्ट्रैश्छलप्रियैः ॥ ४ ॥ समक्षमग्निसंभूताकृष्णाधर्मपरायणा ॥ दुःशासनेन
दुष्टेनकचेष्वादायकर्षिता ॥ ५ ॥ आकृष्टानिचवासांसिश्रीकृष्णेनसुरक्षिता ॥ पश्चाद्राज्यंपरित्यज्यप्रयाताःकाम्यकं
वनं ॥ ६ ॥ अत्यंतंक्लेशमापन्नाःपार्थावन्यफलाशिनः ॥ विष्वक्कचाचिताःसर्वेगजाइववनौकसः ॥ ७ ॥ अथतानदुः
खितान्द्रष्टुंभगवान्देवकीसुतः ॥ जगामकाम्यकवनंमुनिभिःपरिवारितः ॥ ८ ॥ तंदृष्ट्वासहसोत्तस्थुर्देहाःप्राणा
निवागतान् ॥ पार्थाःसस्वजिरेप्रीत्याश्रीकृष्णंप्रेमविह्वलाः ॥ ९ ॥ तेचानीनमतांभक्त्यायमौहरिपदांबुजं ॥ द्रौपदीतं
ननामाशुशनैःशनैरतंद्रिता ॥ १० ॥ तान्दृष्ट्वादुःखितान्पार्थान्रौरवाजिनवाससः ॥ धूलिभिर्धूसरान्रूक्षान्सर्वतः

च्छुत्वाद्दष्ट्वाराज्ञोविमोक्षणं ॥१॥ अत्राहमागतोविप्रान्सत्रोद्यमपरायणान् ॥ द्रष्टुकामःकृतार्थोऽहंजातोदीक्षित
दर्शनात् ॥ २ ॥ ऋषयऊचुः साधोवार्त्तांतरंत्यक्त्वासूतापूर्ववदस्वनः॥ कृष्णद्वैपायनमुखाद्यच्छ्रुतंतत्प्रसादतः॥ ३ ॥
सारात्सारतरांपुण्यांकथामात्मप्रसादनीं ॥ पाययस्वमहाभागसुधाधिकतरांपरां ॥ ४ ॥ सूतउवाच विलोमजोपि
धन्योस्मियन्मांपृच्छतसत्तमाः॥ यथाज्ञानंप्रवक्ष्यामियच्छ्रुतंव्यासवक्त्रतः॥५॥ एकदानारदोगच्छन्नरनारायणा
लयं ॥ तापसैर्बहुभिःसिद्धैर्देवैरपिनिषेवितं ॥ ६॥ बदर्यक्षामलैर्बिल्वैराम्रैराम्रातकैरपि ॥ कपित्थैर्जंबुनीपाद्यैर्वृक्षैर
न्यैर्विराजितं ॥ ७ ॥ विष्णुपादोदकीपुण्याऽलकनंदास्तितत्रच ॥ तत्रगत्वाऽनमद्देवंनारायणमहामुनिं ॥ ८ ॥ पर
ब्रह्मणिसंलग्नमानसंचजितेंद्रियं ॥ जितारिषट्कममलंप्रस्फुरद्बहुलप्रभं ॥ ९ ॥ नमस्कृत्वाचसाष्टांगंदेवदेवंतप
स्विनं॥ कृतांजलिपुटोभूत्वातुष्टावनारदोविभुं॥ १० ॥ नारदउवाच देवदेवजगन्नाथकृपाकूपारसत्पते॥ सत्यव्रत
स्त्रिसत्योसिसत्यात्मासत्यसंभवः॥ ११ ॥ सत्ययोनेनमस्तेस्तुत्वामहंशरणंगतः॥ तपस्तेखिलशिक्षार्थंमर्यादास्था
पनायच ॥ १२ ॥ अन्यथैककृतात्पापात्कलौमज्जतिमेदिनी ॥ तथैवपुण्यात्तरतिपुण्यपापिजनावृता ॥ १३ ॥
कृतादिषुयथापूर्वमेकगंतत्समस्तगं॥ तादृक्स्थितिंनिराकृत्यकलौकर्त्तैवकेवलं॥१४॥ लिप्यतेपुण्यपापाभ्यामिति

त्फुल्लमुखाःसर्वेप्रणेमुःप्रेमविव्हलाः ॥ श्रीकृष्णंपूजयांचक्रुर्वन्यैर्मूलफलादिभिः ॥ २५ ॥ श्रीनारायणउवाच
ततःप्रसन्नंश्रीकृष्णंशरण्यंभक्तवत्सलं ॥ विज्ञायावनतोभूत्वाबृहत्प्रेमपरिप्लुतः ॥२६॥ बद्धांजलिर्गुडाकेशोनामंना
मंपुनःपुनः ॥ तंतथाकृतवान्प्रश्नंयथापृच्छतियंभवान् ॥ २७॥ श्रुत्वैवंभगवान्दध्यौमुहूर्त्तंमनसाहरिः ॥ ध्यात्वाश्वा
स्यसुहृद्वर्गंपांचालींचधृतव्रतां ॥ उवाचवदतांश्रेष्ठःपांडवानांहितंवचः ॥२८ ॥ श्रीकृष्णउवाच शृणुराजन्महाभा
गबीभत्सोत्थ्यथमद्वचः ॥ अपूर्वोयंकृतःप्रश्नोनोत्तरंवक्तुमुत्सहे ॥ २९ ॥ एषगुह्यतरोलोकेऋषीणामपिदुर्घटः ॥ तथा
पिवक्ष्येमित्रत्वाद्भक्तत्वाच्चतवार्जुन ॥ ३० ॥ तदुत्तरमतीवोग्रंक्रमतःशृणुसुव्रत ॥ मध्वादयश्चयेमासालवपक्षाश्च
नाडिकाः ॥ ३१ ॥ यामास्त्रियामाऋतवोमुहूर्तान्ययनेउभे ॥ हायनंचयुगान्येवपरार्धांताःपरेचये ॥ ३२ ॥ नद्योर्णव
ह्रदाःकूपावापीपल्वलनिर्झराः ॥ लतौषधिद्रुमाश्चैवत्वक्साराःपादपाश्चये ॥ ३३ ॥ वनस्पतिपुरग्रामगिरयःपत्तना
निच ॥ एतेसर्वेमूर्तिमंतःपूज्यंतेस्वात्मनोगुणैः ॥ ३४ ॥ नतेषांकश्चिदप्यस्तित्वपूर्वःस्वामिवर्जितः ॥ स्वेस्वेधिकारेस
ततंपूज्यंतेफलदायिनः ॥ ३५ ॥ स्वस्वामियोगमाहात्म्यात्सर्वेसौभाग्यशालिनः ॥ अधिमासःसमुत्पन्नःकदाचित्पां
डुनंदन ॥ ३६ ॥ तमूचुःसकलालोकाअसहायंजुगुप्सितं ॥ अनर्होमलमासोयंरविसंक्रमवर्जितः ॥ ३७ ॥ अस्पृ

स्योमलरूपत्वाच्छुभेकर्मणिगर्हितः॥ श्रुत्वैतद्वचनंलोकान्निरुद्योगोहतप्रभः॥ ३८॥ दुःखान्वितोतिखिन्नात्माचिं
ताग्रस्तैकमानसः॥ मुमूर्षुरभवत्तेनहृदयेनविदूयता॥ पश्चाद्धैर्यंसमालंब्यमामसौशरणंगतः॥ ३९॥ प्राप्तोवैकुंठ
भवनंयत्राहमवसंनर॥ अंतर्गृहंसमागत्यमामसौदृष्टवान्परं॥ ४०॥ अमूल्यरत्नरचितेहेमसिंहासनेस्थितं॥ तदा
नींमामसौदृष्ट्वादंडवत्पतितोभुवि॥ ४१॥ प्रांजलिःप्रयतोभूत्वामुंचन्नश्रूणिनेत्रतः॥ वाचागद्गदयासौम्यंबभाषेधै
र्यमुद्वहन्॥ ४२॥ सूतउवाच इत्युक्त्वाबदरीनाथोविरराममहामुनिः॥ तच्छ्रुत्वापुनरेवाहनारदोभक्तवत्सलः॥
॥ ४३॥ नारदउवाच इत्थंगत्वाभवनममलंपूर्णरूपस्यविष्णोर्भक्तिप्राप्यंजगदघहरंयोगिनामप्यगम्यम्॥
यत्रैवास्तेजगदभयदोब्रह्मरूपोमुकुंदस्तत्पादाब्जंशरणमभितःकिंबभाषेऽधिमासः॥४४॥ इतिश्रीबृहन्नारदीय
पुराणेपुरुषोत्तममाहात्म्येधिमासस्यवैकुंठप्रापणंनामतृतीयोऽध्यायः॥ ३॥ ॥छ॥ ॥छ॥ ॥छ॥छ॥
श्रीनारायणउवाच शृणुनारदवक्ष्येऽहंलोकानांहितकाम्यया॥ अधिमासेनयत्प्रोक्तंहरेरग्रेशुभंवचः॥ १॥ अ
धिमासउवाच अयिनाथकृपानिधेहरेनकथंरक्षसिमामिहागतं॥ कृपणंप्रबलैर्निराकृतंमलमासेत्यभिधांविधा
यमे॥ २॥ शुभकर्मणिवर्जितंहिमांनिरधीशंमलिनंसदैवतैः॥ अवलोकयतोदयालुताक्वगतातेद्यकठोरताकथं॥

॥ ३ ॥ वसुदेववरांगनायथाखलकंसानलतःसुरक्षिता ॥ वदमांशरणागतंकथंनतथाद्यावसिदीनवत्सल ॥ ४ ॥
द्रुपदस्यसुतायथापुराखलदुःशासनदुःखतोऽविता ॥ वदमांशरणागतंकथंनतथाद्यावसिदीनवत्सल ॥ ५ ॥ यमु
नाविषतोयतोऽविताःपशुपालाःपशवोयथात्वया ॥ वदमांशरणागतंकथंनतथाद्यावसिदीनवत्सल ॥ ६ ॥
पशवःपशुपास्तदंगनाअविताद्दावधनंजयाद्यथा ॥ वदमांशरणागतंकथंनतथाद्यावसिदीनवत्सल ॥ ७ ॥ पृ
थिवीपतयोयथाविताम्गधेशालयबंधनात्त्वया ॥ वदमांशरणागतंकथंनतथाद्यावसिदीनवत्सल ॥ ८ ॥
गजनायकएत्यरक्षितोझटितिग्राहमुखाद्यथात्वया ॥ वदमांशरणागतंकथंनतथाद्यावसिदीनवत्सल ॥ ९ ॥
श्रीनारायणउवाच इतिविज्ञाप्यभूमानंविररामनिरीश्वरः ॥ मलमासोऽश्रुवदनस्तिष्ठन्नग्रेजगत्पतेः ॥ १० ॥
तदानींश्रीहरिस्तूर्णंकृपयाप्लावितोभृशं ॥ उवाचदीनवदनंमलमासंपुरःस्थितं ॥ ११ ॥ श्रीहरिरुवाच वत्स
वत्सकिमत्यंतंदुःखमग्नोसिसांप्रतं ॥ एतादृशंमहद्दुःखंकिंतेमनसिवर्तते ॥ १२ ॥ त्वामहंदुःखसंमग्नमुद्धरिष्यामि
माशुचः ॥ नमेशरणमापन्नःपुनःशोचितुमर्हति ॥ १३ ॥ इहागत्यमहादुःखीपतितोपिनशोचति ॥ किमर्थंत्वमि
हागत्यशोकसंमग्नमानसः ॥ १४ ॥ अशोकमजरंनित्यंसानंदंमृत्युवर्जितं ॥ वैकुंठमीदृशंप्राप्यकथंदुःखान्वितोभ

कचसंवृतान् ॥ ११ ॥ पांचालीमपितन्वंगींतादृशींदुःखसंवृतां॥ तेषांदुःखमतीवोग्रंदृष्ट्वैवातीवदुःखितः ॥ १२ ॥
धार्तराष्ट्रान्दग्धकामोभगवान्भक्तवत्सलः॥ चक्रेकोपंसविश्वात्माभ्रूभंगकुटिलेक्षणः॥ १३ ॥ कोटिकालकराला
स्यःप्रलयाग्निरिवोत्थितः॥ संदष्टौष्ठपुटःप्रोच्चैस्त्रिलोकींज्वलयन्निव ॥ १४॥ सीतावियोगसंतप्तःसाक्षाद्दाशरथिर्य
था॥ तमालक्ष्यतदावीरोबीभत्सुर्जातवेपथुः ॥ १५॥ उत्थायकृष्णंतुष्टावबद्धांजलिपुटंभिया॥ धर्मानुमोदितःशी
घ्रंद्रौपद्याचतथापरैः॥ १६॥ अर्जुनउवाच हेकृष्णजगतांनाथनाथनाहंजगद्बहिः॥ त्वमेवजगतांपातामांन
पासिकथंप्रभो॥ १७॥ यच्चक्षुःपतनेनैवब्रह्मणःपतनंभवेत् ॥ तत्कोपेनभवेत्किंवाकोवेदकिंभविष्यति ॥१८॥ क्रो
धंसंहरसंहर्तस्तातताततजगत्पते॥ त्वद्विधानांचकोपेनजगतःप्रलयोभवेत् ॥ १९॥ वंदेत्वांसर्वतत्त्वज्ञंसर्वकारणका
रणं॥ वेदवेदांगबीजस्यबीजंश्रीकृष्णमीश्वरं॥ २० ॥त्वमीश्वरोऽसृजःसर्वंजगदेतच्चराचरं॥ सर्वमंगलमांगल्यबी
जरूपःसनातनः॥ २१ ॥ सकथंस्वकृतंहन्याद्विश्वमेकापराधतः॥ मशकान्भस्मसात्कर्तुंकोवादहतिमंदिरं॥ २२॥
श्रीनारायणउवाच इतिविज्ञाप्यश्रीकृष्णंफाल्गुनःपरवीरहा ॥ बद्धांजलिपुटोभूत्वाप्रणनामजनार्दनं॥ २३॥
सूतउवाच हरिःक्रोधंनिरस्याशुसौम्योभूच्चंद्रमाइव॥ तमालक्ष्यतदासर्वेपांडवाःस्वास्थ्यमागताः॥ २४॥ प्रीत्यु

॥ २८ ॥ ततःपपातसहसासन्निधौश्रीरमापतेः ॥ तत्रतंपतितंदृष्ट्वासंसज्जातासुविस्मिता ॥ २९ ॥ श्रीनारायण
उवाच इत्युक्त्वाविरतिमुपागतेऽधिमासेश्रीकृष्णोबहुलकृपाभरावसन्नः ॥ प्रावोचज्जलदगभीररावरम्यंनिर्वाणं
शिशिरमयूखवन्नयंस्तं ॥ ३० ॥ सूतउवाच नारायणस्यनिगमर्द्धिपरायणस्यपापौघवार्धिवडवाग्निवचोवदातं ॥ श्रु
त्वाप्रहर्षितमनामुनिराबभाषेशुश्रूषुरादिपुरुषस्यवचांसिविप्राः ॥ ३१ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तम
माहात्म्येमलमासविज्ञप्तिर्नामचतुर्थोऽध्यायः ॥ ४ ॥ ॥ छ ॥ नारदउवाच किमुवाचमहाभागश्रुत्वातद्वचनं
हरिः ॥ चरणाग्रेनिपतितमधिमासंतपोनिधे ॥ १ ॥ श्रीनारायणउवाच शृणुनारदवक्ष्यामियदुक्तंहरिणान
घ ॥ धन्योऽसित्वंमुनिश्रेष्ठयन्मांपृच्छसिसत्कथां ॥ २ ॥ श्रीकृष्णउवाच शृणुतत्रत्यवृत्तांतंप्रवक्ष्यामितवाग्र
तः ॥ नेत्रकोणसमादिष्टस्तदानींहरिणार्जुन ॥ ३ ॥ वीजयामासपक्षेणतंमासंमूर्च्छितंखगः ॥ उत्थितःपुनरेवाहनै
तन्मेरोचतेविभो ॥ ४ ॥ अधिमासउवाच पाहिपाहिजगद्धातःपाहिविष्णोजगत्पते ॥ उपेक्षसेकथंनाथशरणं
मामुपागतं ॥ ५ ॥ इत्युक्त्वावेपमानंतंविलपंतंमुहुर्मुहुः ॥ तमुवाचहृषीकेशोवैकुंठनिलयोहरिः ॥ ६ ॥ श्रीविष्णुरुवाच
उत्तिष्ठोत्तिष्ठभद्रंतेविषादंवत्समाकुरु ॥ त्वद्दुःखंदुर्निवार्यंमेप्रतिभातिनिरीश्वर ॥ ७ ॥ इत्युक्त्वामनसिध्यात्वातद्

पायंक्षणंप्रभुः॥ विनिश्चित्यपुनर्वाक्यमुवाचमधुसूदनः॥ ८ ॥ श्रीविष्णुरुवाच वत्सागच्छमयासार्धंगो
लोकंयोगिदुर्लभं ॥ यत्रास्तेभगवान्कृष्णःपुरुषोत्तमईश्वरः ॥ ९ ॥ गोपिकावृंदमध्यस्थोद्विभुजोमुरलीधरः ॥ न
वीननीरदश्यामोरक्तपंकजलोचनः ॥ १० ॥ शारदीयपार्वणेंदुशोभातिरोचनाननः ॥ कोटिकंदर्पलावण्यलीला
धाममनोहरः ॥ ११ ॥ पीतांबरधरःस्रग्वीवनमालाविभूषितः ॥ सद्रत्नभूषणःप्रेमभूषणोभक्तवत्सलः॥ १२ ॥ चंद
नोक्षितसर्वांगःकस्तूरीकुंकुमान्वितः ॥ श्रीवत्सवक्षाःसंभ्राजत्कौस्तुभेनविराजितः ॥ १३ ॥ सद्रत्नसाररचितकि
रीटीकुंडलोज्वलः ॥ रत्नसिंहासनारूढःपार्षदैःपरिवेष्टितः॥ १४ ॥ सएवपरमंब्रह्मपुराणपुरुषोत्तमः ॥ स्वेच्छाम
यःसर्वबीजंसर्वाधारःपरात्परः॥ १५॥ निरीहोनिर्विकारश्चपरिपूर्णतमःप्रभुः ॥ प्रकृतेःपरईशानोनिर्गुणोनित्यवि
ग्रहः ॥ १६ ॥ गच्छावस्तत्रत्वद्दुःखंश्रीकृष्णोव्यपनेष्यति॥ श्रीनारायणउवाच इत्युक्त्वातंकरेकृत्वागोलोकं
गतवान्हरिः॥ १७॥ अज्ञानांधतमोध्वंसंज्ञानवर्त्मप्रदीपकम् ॥ ज्योतिःस्वरूपंप्रलयेपुरासील्केवलंमुने ॥ १८॥
सूर्यकोटिनिभंनित्यमसंख्यंविश्वकारणं॥विभोःस्वेच्छामयस्यैवतज्ज्योतिरुल्बणंमहत्॥ १९॥ ज्योतिरभ्यंतरेलोक
त्रयमेवमनोहरं॥तस्यैवोपरिगोलोकःशाश्वतोब्रह्मवन्मुने॥२०॥ त्रिकोटियोजनायामोविस्तीर्णोमंडलाकृतिः॥ ते

जःस्वरूपःसुमहद्रत्नभूमिमयःपरः ॥ २१ ॥ अदृश्योयोगिभिःस्वप्नेदृश्योगम्यश्चवैष्णवैः ॥ ईशेनविधृतोयोगैरंतरि
क्षस्थितोवरः ॥ २२ ॥ आधिव्याधिजरामृत्युशोकभीतिविवर्जितः ॥ सद्रत्नभूषितासंख्यमंदिरैःपरिशोभितः॥
॥ २३ ॥ तदधोदक्षिणेसव्येपंचाशत्कोटिविस्तरात् ॥ वैकुंठःशिवलोकश्चतत्समःसुमनोहरः ॥ २४ ॥ कोटियोजनवि
स्तीर्णोवैकुंठोमंडलाकृतिः ॥ लसत्पीतपटारम्यायत्रतिष्ठंतिवैष्णवाः ॥ २५ ॥ शंखचक्रगदापद्मश्रियाजुष्टचतुर्भुजाः
स्त्रियोलक्ष्मीसमाःसर्वाःकूजन्नूपुरमेखलाः ॥ २६ ॥ सव्येनशिवलोकश्चकोटियोजनविस्तृतः ॥ लयशून्यश्चस्रष्टोच
पार्षदैःपरिवारितः ॥ २७ ॥ निवसंतिमहाभागागणायत्रकपर्दिनः ॥ भस्मोद्धूलितसर्वांगानागयज्ञोपवीतिनः ॥
॥ २८ ॥ अर्धचंद्रलसद्भालाःशूलपट्टिशपाणयः ॥ सर्वेगंगाधराःशूरास्त्र्यंबकाजयशालिनः ॥ २९ ॥ गोलोकाभ्यं
तरेज्योतिरतीवसुमनोहरं ॥ परमाल्हादकंशश्वत्परमानंदकारणं ॥ ३० ॥ ध्यायंतेयोगिनःशश्वद्योगेनज्ञानचक्षुषा ॥
तदेवानंदजनकंनिराकारंपरात्परं ॥ ३१ ॥ तज्ज्योतिरंतरेरूपमतीवसुमनोहरं ॥ इंदीवरदलश्यामंपंकजारुणलोच
नं ॥ ३२ ॥ कोटिशारदपूर्णेंदुशोभातिरोचनाननं ॥ कोटिमन्मथसौंदर्यलीलाधाममनोहरं ॥ ३३ ॥ द्विभुजंमुरलीह
स्तंसस्मितंपीतवाससं ॥ श्रीवत्सवक्षसंभ्राजत्कौस्तुभेनविराजितं ॥ ३४ ॥ सद्रत्नकोटिखचितकिरीटकटकोज्ज्वलं ॥

वान् ॥ १५ ॥ त्वामत्रदुःखितंदृष्ट्वावैकुंठस्थाःसुविस्मिताः ॥ किमर्थंमर्तुकामोसितन्मेवत्सवदाधुना ॥ १६ ॥
श्रीनारायणउवाच श्रुत्वेदंभगवद्वाक्यंविभारइवभारभृत् ॥ श्वासोच्छ्वाससमायुक्तउवाचमधुसूदनं ॥ १७ ॥
अधिमासउवाच अज्ञातंकिंचिन्नैवास्तिसर्वत्रभगवंस्तव ॥ आकाशइवसर्वत्रविश्वंव्याप्यव्यवस्थितः ॥ १८ ॥
चराचरगतोविष्णुःसाक्षीसर्वस्यविश्वदृक् ॥ कूटस्थेत्वयिसर्वाणिभूतानिचव्यवस्थया ॥ १९ ॥ संस्थितानिजगन्ना
थनकिंचिद्भवताविना ॥ किन्नजानासिभगवन्निर्भाग्यस्यममव्यथाम् ॥ २० ॥ तथापिवच्मिहेनाथदुःखजालमपा
वृतं ॥ तादृशंनैवकस्यापिनश्रुतंनावलोकितं ॥ २१ ॥ क्षणालवामुहूर्ताश्चपक्षामासादिवानिशं ॥ स्वामिनामधि
कारैस्तेमोदंतेनिर्भयाःसदा ॥ २२ ॥ नमेनामनमेस्वामीनहिकश्चिन्ममाश्रयः ॥ तस्मान्निराकृतःसर्वैःसाधिदैवैः
सुकर्मणः ॥ २३ ॥ निषिद्धोमलमासोयमित्यंधोऽवटगःसदा ॥ तस्माद्दिनष्टुमिच्छामिनाहंजीवितुमुत्सहे ॥ २४ ॥
कुजीविताद्वरंमृत्युर्नित्यदग्धःकथंस्वपेत् ॥ अतःपरंमहाराजवक्तव्यंनावशिष्यते ॥ २५ ॥ परदुःखासहिष्णुस्त्वमुप
कारप्रियोमतः ॥ वेदेषुचपुराणेषुप्रसिद्धःपुरुषोत्तमः ॥ २६ ॥ निजधर्मसमालोच्ययथारुचितथाकुरु ॥ पुनःपुनःपामरे
णनवक्तव्यःप्रभुर्महान् ॥ २७ ॥ मरिष्येऽहंमरिष्येऽहंमरिष्येऽहंपुनःपुनः ॥ इत्युक्त्वामलमासोऽयंविररामविधेःसुत ॥

पुरु. सुशोभितं ॥ ददर्शदूरतोविष्णुर्ज्योतिर्धाममनोहरं ॥ ३ ॥ नत्तेजःपिहिताक्षोसौशनैरुन्मील्यलोचने ॥ मंदंमंदंजगा मा.
१ माधिमासंकृत्वास्वपृष्ठतः ॥ ४ ॥ उपमंदिरमासाद्यसाधिमासोमुदान्वितः ॥ उत्थितैर्द्वारपालैश्चवंदितांघ्रिर्हरिःशनैः
॥ ५ ॥ प्रविष्टोभगवद्धामशोभासंमुष्टलोचनः ॥ तत्रगत्वाननामाशुश्रीकृष्णंपुरुषोत्तमं ॥ ६ ॥ गोपिकावृंदमध्यस्थं
रत्नसिंहासनासनम् ॥ नत्वोवाचरमानाथोबद्धांजलिपुटःपुरः ॥७॥ श्रीविष्णुरुवाच वंदेविष्णुंगुणातीतंगोविंदमेक
मक्षरं ॥ अव्यक्तमव्ययंव्यक्तंगोपवेषविधायिनं ॥८॥ किशोरवयसंशांतंगोपीकांतंमनोहरं ॥ नवीननीरदश्यामंको
टिकंदर्पसुंदरं॥ ९॥वृंदावनवनाभ्यंतेरासमंडलसंस्थितं॥लसत्पीतपटंसौम्यंत्रिभंगललिताकृतिं॥ १०॥ रासेश्वरंरास
वासंरासोल्लाससमुत्सुकं॥द्विभुजंमुरलीहस्तंपीतवाससमच्युतं॥ ११॥इत्येवमुक्त्वातंनत्वारत्नसिंहासनेवरे॥ पार्षतैः
सत्कृतोविष्णुःसउवासतदाज्ञया ॥ १२ ॥ श्रीनारायणउवाच इतिविष्णुकृतंस्तोत्रंप्रातरुत्थाययःपठेत् ॥ पापानित
स्यनश्यंतिदुःस्वप्नःसत्फलप्रदः ॥ १३ ॥ भक्तिर्भवतिगोविंदेपुत्रपौत्रविवर्द्धिनी ॥ अकीर्तिःक्षयमाप्नोतिसत्कीर्तिर्व
र्द्धतेचिरं ॥ १४॥ उपविष्टस्ततोविष्णुःश्रीकृष्णचरणांबुजे ॥ नामयामासतंमासंवेपमानंतदग्रतः ॥ १५॥ तदापप्रच्छ १
श्रीकृष्णःकोयंकस्मादिहागतः ॥ कस्माद्रुदतिगोलोकेनकश्चिद्दुःखमश्नुते ॥ १६ ॥ गोलोकवासिनःसर्वेसदानंदप

रिपुताः ॥ स्वप्नेपिनैवश्रृण्वंतिदुर्वार्ताचदुरन्वयां ॥ १७॥ तस्मादयंकथंविष्णोमदग्रेदुःखितःस्थितः॥ मुंचन्नश्रूणि
नेत्राभ्यांवेपतेचमुहुर्मुहुः ॥ १८ ॥ श्रीनारायणउवाच नवांबुदानीकमनोहरस्यगोलोकनाथस्यवचोनिशम्य ॥
उवाचविष्णुर्मलमासदुःखंप्रोत्थायसिंहासनतःसमग्रं॥ १९॥ श्रीविष्णुरुवाच वृंदावनकलानाथश्रीकृष्णमुरली
धर॥ श्रूयतामधिमासीयंदुःखंवच्मितवाग्रतः॥ २० ॥ तस्मादहमिहायातोगृहीत्वामुंनिरीश्वरं॥ दुःखदावानलंती
व्रमेतदीयंनिराकुरु ॥ २१ ॥ अयंत्वधिकमासोस्तिव्यपेतरविसंक्रमः ॥ मलिनोयमनर्होस्तिशुभकर्मणिसर्वदा॥
॥ २२ ॥ नस्नानंनैवदानंचकर्तव्यंप्रभुवर्जिते॥ एवंतिरस्कृतःसर्वैर्वनस्पतिलतादिभिः॥ २३ ॥ मासैर्द्वादशभिश्चैव
कलाकाष्ठालवादिभिः॥ अयनैर्हायनैश्चैवस्वामिगर्वसमन्वितैः ॥ २४॥ इतिदुःखानलेनैवदग्धोयंमर्तुमुन्मुखः॥
अन्यैर्दयालुभिःपश्चात्प्रेरितोमामुपागतः ॥ २५॥ शरणार्थीहृषीकेशवेपमानोरुदन्मुहुः॥ सर्वंनिवेदयामासदुःख
जालमसंवृत॥ २६ ॥ एतदीयंमहद्दुःखमनिवार्यंभवद्दते ॥ अतस्त्वामाश्रितोनूनंकरेकृत्वानिराश्रयं ॥ २७ ॥ पर
दुःखासहिष्णुस्त्वमितिवेदविदोजगुः॥ अतएनंनिरातंकंसानंदंकृपयाकुरु॥ २८ ॥ त्वदीयचरणांभोजंगतोनैवाव
शोचते॥ इतिवेदविदोमिथ्याकथंभाविजगत्पते॥ २९॥ मदर्थमपिकर्तव्यमेतद्दुःखनिवारणं॥ सर्वंत्यक्त्वाहमाया

तोयातंमेसफलंकुरु॥ ३०॥ मुहुर्मुहुर्नवक्तव्यंकदापिप्रभुसन्निधौ ॥ वदंत्येवंमहाप्राज्ञानित्यंनीतिविशारदाः॥ ३१ ॥
इतिविज्ञाप्यभूमानंबद्धांजलिपुटोहरिः॥ पुरस्तस्थौभगवतोनिरीक्षंस्तन्मुखांबुजं ॥ ३२ ॥ ऋषयऊचुः सूतसूतव
दान्योसिजीवत्वंशाश्वतीःसमाः॥ पिबामोयन्मुखात्सेव्यंहरिलीलाकथामृतं ॥ ३३ ॥ गोलोकवासिनासूतकिमुक्तं
किंकृतंवद ॥ विष्णुश्रीकृष्णसंवादःसर्वलोकोपकारकः ॥ ३४ ॥ विधिसुतःकिमपृच्छदृषीश्वरंतदधुनावदसूततप
स्विनः॥ परमभागवतःसहरेस्तनुस्तदुदितंवचनंपरमौषधं ॥ ३५ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममाहात्म्ये
श्रीनारायणनारदसंवादेपुरुषोत्तमविज्ञप्तिर्नामषष्ठोध्यायः ॥ ६ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ छ ॥
सूतउवाच भवद्भिर्यःकृतःप्रश्नस्तमचीकरदाशुगः॥ यदुत्तरमुवाचेशस्तद्वदामितपोधनाः ॥ १ ॥ नारदउवा
च विश्रश्रवसिमौनमास्थितेसंनिवेद्यपरदुःखमपारं ॥ किंचकारपुरुषोत्तमःपरस्तद्वदस्वबदरीपतेऽधुना ॥ २ ॥
श्रीनारायणउवाच गोलोकनाथोयदुवाचविष्णुंतदेवगुह्यंकथयामिवत्स ॥ वाच्यंसुभक्तायसदास्तिकायशुश्रू
षवेदंभविवर्जिताय ॥ ३ ॥ सुकीर्तिकृत्पुण्यकरंयशस्यंसत्पुत्रदंवश्यकरंचराज्ञां ॥ दारिद्र्यदावाग्निरनल्पपुण्यैःश्रा
व्यंतथाकार्यमनन्यभक्त्या॥ ४ ॥ श्रीपुरुषोत्तमउवाच समीचीनंकृतंविष्णोयदत्रागतवान्भवान् ॥ मलमा

रत्नसिंहासनस्थंचवनमालाविभूषितं ॥ ३५॥ तदेवपरमंब्रह्मपूर्णंश्रीकृष्णसंज्ञकं ॥ स्वेच्छामयंसर्वबीजंसर्वाधारंप
रात्परं ॥ ३६ ॥ किशोरवयसंशश्वद्गोपवेषविधायकं ॥ कोटिपूर्णेंदुशोभाढ्यंभक्तानुग्रहकारकं ॥ ३७॥ निरीहंनिर्वि
कारंचपरिपूर्णतमंप्रभुं॥ रासमंडपमध्यस्थंशांतंरासेश्वरंहरिं ॥ ३८ ॥ मंगलंमंगलार्हंचसर्वमंगलमंगलं॥ परमानं
दराजंचसत्यमक्षरमव्ययं ॥ ३९ ॥ सर्वसिद्धेश्वरंसर्वसिद्धिरूपंचसिद्धिदं ॥ प्रकृतेःपरमीशानंनिर्गुणंनित्यविग्रहं ॥
॥ ४० ॥ आद्यंपुरुषमव्यक्तंपुरुहूतंपुरुस्तुतं॥ नित्यंस्वतंत्रमेकंचपरमात्मस्वरूपकं ॥ ४१ ॥ ध्यायंतेवैष्णवाःशांताः
शांतंशांतिपरायणं॥ एवंरूपंपरंबिभ्रद्भगवानेकएवसः ॥ ४२ ॥ श्रीनारायणउवाच एवमुक्त्वाततोविष्णुरधि
माससमन्वितः॥ गोलोकमगमच्छीघ्रंविरजोवेष्टितंपरं ॥ ४३ ॥ सूतउवाच इतीरयित्वागिरमात्तसत्क्रियांमुनी
श्वरेतूष्णिमवस्थितेमुनिः॥ जगादवाक्यंविधिजोमहोत्सवाच्छुश्रूषुरानंदनिधेर्नवाःकथाः॥ ४४॥ इतिश्रीबृहन्ना
रदीयपुराणेश्रीनारायणनारदसंवादेपुरुषोत्तममाहात्म्येविष्णोर्गोलोकगमनेपंचमोऽध्यायः॥ ५॥ ॥ छ ॥छ॥
नारदउवाच वैकुंठाधिपतिर्गत्वागोलोकेकिंचकारह॥ तद्वदस्वकृपांकृत्वामर्त्यंशुश्रूषवेऽनघ॥१॥ श्रीनारायणउवा
च श्रृणुनारदवक्ष्येऽहंयज्जातंतत्रतेनघ॥ विष्णुर्गोलोकमगमदधिमासेनसंयुतः॥२॥तन्मध्येभगवद्धाममणिस्तंभैः

र्थसिद्धिदः॥ तस्मात्संसेव्यतामेषमासोयंपुरुषोत्तमः ॥ १९ ॥ सीतानिक्षिप्तबीजानिवर्धंतेकोटिशोयथा॥ तथाको
टिगुणंपुण्यंकृतंमेपुरुषोत्तमे ॥ २० ॥ चातुर्मास्यादिभिर्यज्ञैःस्वर्गंगच्छंतिकेचन॥ तत्रत्यंभोगमासाद्यपुनर्गच्छंति
भूतलं॥ २१ ॥ विधिवत्सेवतेयस्तुपुरुषोत्तममादरात्॥ कुलंस्वकीयमुद्धृत्यमामेवैष्यत्यसंशयं॥ २२ ॥ मामुपेतोत्र
संसारंजन्ममृत्युभयाकुलं॥ आधिव्याधिजराग्रस्तंनपुनर्यातिमानवः॥ २३ ॥ यद्गत्वाननिवर्तंतेतद्धामपरमंमम॥
इतिच्छंदोवचःसत्यमसत्यंजायतेकथं॥ २४ ॥ एतन्मासाधिपश्चाहंमयैवायंप्रतिष्ठितः ॥ पुरुषोत्तमेतिमन्नामतद
प्यस्मैसमर्पितं॥ २५॥ तस्मादेतस्यभक्तानांममचिंतादिवानिशं॥ तद्भक्तकामनाःसर्वाःपूरणीयामयैवहि॥ २६॥
कदाचिन्ममभक्तानामपराधोधिगण्यते॥ पुरुषोत्तमभक्तानांनापराधःकदाचन॥ २७॥ मदाराधनतोविष्णोमदी
याराधनंप्रियं॥ मद्भक्तकामनादानेविलंबेहंकदाचन॥ २८ ॥ मदीयमासभक्तानांनविलंबःकदाचन ॥ मदीयमा
सभक्तायेममैवातीववल्लभाः ॥ २९ ॥ यएतस्मिन्महामूढाजपदानादिवर्जिताः॥ सत्कर्मस्नानरहितादेवतीर्थद्विज
द्विषः॥ ३० ॥ जायंतेदुर्भगादुष्टाःपरभाग्योपजीविनः॥नकदाचित्सुखंतेषांस्वप्नेपिशशशृंगवत्॥ ३१ ॥ तिरस्कुर्वंति
येमूढामलमासंममप्रियं॥ नाचरिष्यंतियेधर्मंतेसदानिरयालयाः॥ ३२ ॥ पुरुषोत्तममासाद्यवर्षेवर्षेतृतीयके ॥

नाचरिष्यंतिधर्मंयेकुंभीपाकेपतंतिते ॥ ३३ ॥ इहलोकेमहद्दुःखंपुत्रपौत्रकलत्रजं ॥ प्राप्नुवंतिमहामूढादुःखदावान
लस्थिताः ॥ ३४ ॥ तेकथंसुखमेधंतेयेषामज्ञानतोगतः ॥ श्रीमान्पुण्यतमोमासोमदीयःपुरुषोत्तमः ॥ ३५ ॥ याःस्त्रि
यःसुभगाःपुत्रसुखसौभाग्यहेतवे ॥ पुरुषोत्तमेकरिष्यंतिस्नानदानार्चनादिकं ॥ ३६ ॥ तासांसौभाग्यसंपत्तिसुख
पुत्रप्रदोह्यहं ॥ यासांमासोगतःशून्योमन्नामापुरुषोत्तमः ॥ ३७ ॥ नतासामनुकूलोऽहंनसुखंस्वामिजंभवेत् ॥
भ्रातृपुत्रधनानांचसुखंस्वप्नेपिदुर्लभं ॥ ३८ ॥ तस्मात्सर्वात्मनासर्वैःस्नानपूजाजपादिकं ॥ विशेषेणप्रकर्तव्यंदानं
शक्त्यनुसारतः ॥ ३९ ॥ येनाहमर्चितोभक्त्यामासेस्मिन्पुरुषोत्तमे ॥ धनपुत्रसुखंभुक्त्वापश्चाद्गोलोकवासभाक्
॥ ४० ॥ ममाज्ञयाजनाःसर्वेपूजयिष्यंतिमामकं ॥ सर्वेषामपिमासानामुत्तमोयंमयाकृतः ॥ ४१ ॥ अतस्त्वमधि
मासस्यचिंतांत्यक्त्वारमापते ॥ गच्छवैकुंठमतुलंगृहीत्वापुरुषोत्तमं ॥ ४२ ॥ श्रीनारायणउवाच इतिरसिकवचो
निशम्यविष्णुःप्रबलमुदापरिगृह्यमासमेनं ॥ नवजलदरुचंप्रणम्यदेवंझटितिजगामनिजालयंखगेन ॥ ४३ ॥ इ
तिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममाहात्म्येश्रीनारायणनारदसंवादेऽधिमासस्यैश्वर्यप्राप्तिर्नामसप्तमोऽध्यायः
॥ ७ ॥ सूतउवाच नारदःकृतवान्प्रश्नंपुनरेवतपोधनाः ॥ विष्णुश्रीकृष्णसंवादंश्रुत्वासंतुष्टमानसः ॥ १ ॥ नारदउवा

उ०
१२ च वैकुंठंगतवतिरुक्मिणीशेकिंजातंतदनुवदप्रभोमे ॥ वृत्तांतंहरिसुतकृष्णयोश्चसर्वेषांहितकरमादिपुंसोः ॥ २ ॥ मा.
इतिसंप्रश्नसंहृष्टोभगवान्बदरीपतिः ॥ उवाचपुनरेवामुंजगदानंददंबृहत् ॥ ३ ॥ श्रीनारायणउवाच अथश्री
रुक्मिणीनाथोवैकुंठंगतवान्मुदा ॥ तत्रगत्वाधिमासंतंवासयामासनारद ॥ ४ ॥ तत्रत्यवसतिंप्राप्यमोदमानोभ
वत्तदा ॥ मासानामधिपोभूत्वारमतेविष्णुनासह ॥ ५ ॥ द्वादशस्वपिमासेषुमलमासंवरंप्रभुः ॥ विधायमनसातुष्टो
बभूवप्रकृतिप्रियः ॥ ६ ॥ अथार्जुनमुवाचेदंभगवान्भक्तवत्सलः ॥ युधिष्ठिरंचपांचालींनिरीक्षन्कृपयामुने ॥ ७ ॥
श्रीकृष्णउवाच जानेऽहंराजशार्दूलतपोवनमुपागतैः ॥ भवद्भिर्दुःखसंमग्नैर्नादृतःपुरुषोत्तमः ॥ ८ ॥ वृंदावनक
लानाथवल्लभःपुरुषोत्तमः ॥ प्रमादादृतवान्मासोभवतांकाननौकसां ॥ ९ ॥ युष्माभिर्नैवविज्ञातोभयद्वेषसमन्वि
तैः ॥ गांगेयद्रोणकर्णेभ्योभयसंत्रस्तमानसैः ॥ १० ॥ कृष्णद्वैपायनादाप्तविद्याराधनतत्परे ॥ इंद्रकीलंगतवतिबीभ
त्सौरणशालिनि ॥ ११ ॥ तद्वियोगपरिक्लिष्टैर्नज्ञातःपुरुषोत्तमः ॥ युष्माभिःकिंप्रकर्तव्यमदृष्टमवलंब्यतां ॥ १२ ॥
अदृष्टंयादृशंपुंसांतादृशंभासतेसदा ॥ अवश्यमेवभोक्तव्यमदृष्टजनितंफलं ॥ १३ ॥ सुखंदुःखंभयंक्षेममदृष्टात्प्रा १२
प्यतेजनैः ॥ तस्माददृष्टनिष्ठैश्चभवद्भिःस्थीयतांसदा ॥ १४ ॥ अथापरंप्रवक्ष्यामिभवतांदुःखकारणं ॥ सेतिहासंमहा

संकरेकृत्वालोकेकीर्तिमवाप्स्यसि ॥ ५ ॥ यस्त्वयोरीकृतोजीवःसमयैवोररीकृतः ॥ अतएनंकरिष्यामिसर्वोपरिम
यासमं ॥ ६ ॥ गुणैःकीर्त्यानुभावेनषड्गैश्वपराक्रमैः ॥ भक्तानांवरदानेनगुणैरन्यैश्वमामकैः ॥ ७ ॥ अहमेतैर्यथा
लोकेप्रथितःपुरुषोत्तमः ॥ तथायमपिलोकेषुप्रथितःपुरुषोत्तमः ॥ ८ ॥ अस्मैसमर्पिताःसर्वेयेगुणामयिसंस्थि
ताः ॥ पुरुषोत्तमेतिमन्नामप्रथितंलोकवेदयोः ॥ ९ ॥ तदप्यस्मैमयादत्तंतवतुष्ट्यैजनार्दन ॥ अहमेवास्यसंजातः
स्वामीचमधुसूदन ॥ १० ॥ एतन्नाम्नाजगत्सर्वंपवित्रंचभविष्यति ॥ मत्सादृश्यमुपागम्यमासानामधिपोभवेत् ॥
॥ ११ ॥ जगत्पूज्योजगद्वंद्योमासोयंतुभविष्यति ॥ पूजकानांचसर्वेषांदुःखदारिद्र्यखंडनः ॥ १२ ॥ सर्वेमासाःस
कामाश्वनिष्कामोयंमयाकृतः ॥ मोक्षदःसर्वलोकानांमत्तुल्योयंमयाकृतः ॥ १३ ॥ अकामःसर्वकामोवायोधिमा
संप्रपूजयेत् ॥ कर्माणिभस्मसात्कृत्वामामेवैष्यत्यसंशयं ॥ १४ ॥ यदर्थंचमहाभागायतिनोब्रह्मचारिणः ॥ तपस्यं
तिमहात्मानोनिराहारादृढव्रताः ॥ १५ ॥ फलपत्रानिलाहाराःकामक्रोधविवर्जिताः ॥ जितेंद्रियचयाःसर्वेप्रावृट्
कालेनिराश्रयाः ॥ १६ ॥ शीतातपसहाश्वैवयतंतेगरुडध्वज ॥ तथापिनैवमेयांतिपरमंपदमव्ययं ॥ १७ ॥ पुरुषोत्त
मस्यभक्तास्तुमासमात्रेणतत्पदं ॥ अनायासेनगच्छंतिजरामृत्युविवर्जितं ॥ १८ ॥ सर्वसाधनतःश्रेष्ठःसर्वकामा

स्यपंजरः॥ अवापदैवयोगेनज्वरंतीव्रंसुदारुणं ॥ २९ ॥ स्फुटत्सर्वांगसंभिन्नतापज्वालासमाकुलः ॥ श्वासोद्धा
ससमायुक्तोमहादारुणमूर्छया ॥ ३० ॥ प्रस्खलन्निपतन्भूमौमदिरामत्तवद्भृशं ॥ आगच्छन्नेवभवनंसपपातध
रातले॥ ३१ ॥ यावत्सुतासमायातापितरंभयविव्हला ॥ तावन्मुमूर्षुःसंजातोभूसुरस्तामनुस्मरन् ॥ ३२ ॥ भावि
नार्थबलेनैवसहसाजातवेपथुः ॥ कन्यादानप्रसंगोत्थमहोत्सवविवर्जितः॥ ३३ ॥ अथप्राचीनगार्हस्थ्यकृतधर्म
परिश्रमात्॥ संसारवासनांत्यक्त्वाहरौचित्तमधारयत् ॥ ३४॥ सस्मारश्रीहरिंतूर्णंमेधावीपुरुषोत्तमं॥ इंदीवरदल
श्यामंत्रिभंगललिताकृतिं॥ ३५॥ रासेशराधारमणप्रचंडदोर्दंडदूराहतनिर्जरारे॥ अत्युग्रदावानलपानकर्तःकुमा
रिकोत्तारितवस्त्रहर्तः ॥३६॥ श्रीकृष्णगोविंदहरेमुरारेराधेशदामोदरदीननाथ॥ मांपाहिसंसारसमुद्रमग्नंनमोनम
स्तेहृषिकेश्वराय॥ ३७॥ इतिमुनिवचनंनिशम्यदूराज्झटितियुयुश्वचारमुकुंदलोकात् ॥ तदनुम्रतमुनिंकरेगृहीत्वा
चरणसरोरुहमीयुरीश्वरस्य ॥ ३८ ॥ प्राणोत्क्रमणमालोक्यहाहेतिसासुतारुदत्॥ अंकेकृत्वापितुर्देहंविललापसुदुः
खिता॥ ३९॥ कुररीवचिरंसातुविलप्यभृशदुःखिता॥ उवाचपितरंबालाजीवंतमिवविव्हला॥४०॥ बालोवाच १२
हाहापितःकृपासिंधोआत्मजानंददायक॥कस्यांकेमांनिधायाद्यगतोसिवैष्णवंपुरं ॥ ४१ ॥ पितृहीनांचमांतातको

वासंभावयिष्यति ॥ नभ्रातानैवबंधुश्चनमेमातातपस्विनी ॥ ४२ ॥ भोजनाच्छादनेचिंतांकोमेतातकरिष्यति ॥
कथंतिष्ठाम्यहंशून्येवेदध्वनिविवर्जिते ॥ ४३ ॥ आश्रमेतेमुनिश्रेष्ठअरण्यइवनिर्जने ॥ अतःपरंमरिष्यामिजीवने
किंप्रयोजनं ॥ ४४ ॥ असंपाद्यैववैवाहंविधिंदुहितृवत्सल ॥ क्वगतोसिपितस्तातइहागच्छतपोनिधे ॥ ४५ ॥ वा
णींवदसुधाकल्पांकथंतूष्णीमवस्थितः ॥ उत्तिष्ठोत्तिष्ठहेतातचिरंसुप्तोसिसांप्रतं ॥ ४६ ॥ इत्युक्त्वाश्रुमुखीबालावि
ललापमुहुर्मुहुः ॥ मुक्तकंठंरुरोदार्ताकुररीवसुदुःखिता ॥ ४७ ॥ तत्सुतारोदनंश्रुत्वाविप्रास्तद्वनवासिनः ॥ अतीवक
रुणंकोवारोदित्यस्मिंस्तपोवने ॥ ४८ ॥ मेधाऋषेःसुताशब्दंशनैर्निश्चित्यतापसाः ॥ ससंभ्रमाःसमाजग्मुर्हाहाका
रसमन्विताः ॥ ४९ ॥ आगत्यददृशुःसर्वेसुतांकस्थंमृतंमुनिं ॥ ततःसंरुरुदुःसर्वेमुनयःकाननौकसः ॥ ५० ॥ सुतोत्सं
गाच्छवंनीत्वाश्मशानेशिवसंनिधौ ॥ अंत्येष्टिंविधिनाकृत्वातेऽदहन्काष्ठवेष्टितं ॥ ५१ ॥ ततःकन्यांसमाश्वास्यस
र्वेतेस्वगृहान्ययुः ॥ कन्याधैर्यंसमालंब्ययथाशक्त्यकरोद्व्ययं ॥ ५२ ॥ इत्यौर्ध्वदेहिकविधिंप्रणिधायपित्र्यंपुत्रीनिवा
समकरोच्चतपोवनेस्मिन् ॥ सावित्र्यथेपितृजदुःखदवाग्निदग्धारंभेववत्समरणात्सुरभीवबाला ॥ ५३ ॥ इतिबृहन्ना
रदीयपुराणेपुरुषोत्तममाहात्म्येश्रीनारायणनारदसंवादेकुमारीविलापोनामाष्टमोऽध्यायः ॥ ८ ॥ ॥ ७ ॥ ॥

सूतउवाच ततस्तंविस्मयाविष्टःपप्रच्छनारदोमुनिः॥ मेधाविद्विजवर्यस्यसुतावृत्तांतमद्भुतं ॥ १ ॥ नारदउवा
च मुनेमुनिसुतातत्रकिंचकारतपोवने॥ कोवामुनिवरस्तस्याःपाणिग्रहमचीकरत् ॥ २ ॥ श्रीनारायणउवाच
निवसंत्यस्ततस्तस्याःकियान्कालोविनिर्गतः॥ स्मारंस्मारंस्वपितरंशोचंत्याश्चमुहुर्मुहुः ॥ ३ ॥ शून्यसद्मनिसंविष्टां
यूथभ्रष्टांमृगीमिव॥ गलद्बाष्पौघनयनांज्वलद्धृदयपंकजां ॥ ४ ॥ विनिःश्वासपरांदीनांसंरुद्धामुरगीमिव॥ चिंतयं
तीमपश्यंतींदुःखपारंकृशोदरीं ॥ ५ ॥ तामाससादभगवान्भविष्यद्बलनोदितः ॥ यदृच्छयावनेतस्मिन्परमःको
पनोमुनिः ॥ ६ ॥ यद्विलोकनमात्रेणत्रस्येदपिशतक्रतुः ॥ जटाकलापसंछन्नःसाक्षादिवसदाशिवः ॥ ७॥ य
स्त्वज्ञनन्याराजेंद्रशैशवेतिप्रसादितः॥ त्रिदशाकर्षिणींविद्यांददावस्यैसुपूजितः ॥ ८ ॥ येनाहमपिभूपालसर्वदे
वनमस्कृतः॥ रथेसंयोजितःसाक्षाद्रुक्मिण्यासहनारद ॥ ९ ॥ उभाभ्यांचालितेमार्गेरथेदुर्वाससान्विते ॥ अत्युग्र
यातृषाशुष्यत्ताल्वोष्ठपुटयानया ॥ १० ॥ सूचितोहंजलार्थिन्यास्कंधस्थयुगयापुरा ॥ गच्छन्नेवपदाग्रेणसंपीड्य
वसुधातलं ॥ ११ ॥ आनीतवान्भोगवतींप्रियाप्रेमपरिप्लुतः॥ सैवोर्ध्वगामिनीभूत्वातावन्मात्रेणवारिणा ॥ १२॥ १४
न्यवारयन्महाराजरुक्मिणीतृषमुल्बणां॥ तद्दृष्ट्वातत्क्षणोद्भूतक्रोधेनप्रज्वलन्निव ॥ १३ ॥ प्रलयाग्निरिवोत्तिष्ठन्

राजश्रूयतांमन्मुखादहो ॥ १५ ॥ श्रीकृष्णउवाच पांचालीयंमहाभागापूर्वजन्मनिसुंदरी ॥ मेधाविद्विजमुख्यस्यपु
त्रीजातासुमध्यमा ॥ १६ ॥ कालेनगच्छताराजन्संजातादशवार्षिकी ॥ रूपलावण्यललितानयनापांगशालिनी
॥ १७ ॥ चातुर्यगुणसंपन्नापितुरेकैवपुत्रिका ॥ वल्लभातीवतेनेयंचतुरागुणसुंदरी ॥ १८ ॥ लालितापुत्रवन्नित्यंनक
दाचित्प्रलंभिना ॥ साहित्यशास्त्रकुशलानीतावपिविशारदा ॥ १९ ॥ तन्मातास्वर्गतापूर्वंपित्रासापोषितामुदा ॥ पा
र्श्वस्थालिसुखंदृष्ट्वापुत्रपौत्रसुखस्पृहा ॥ २० ॥ तर्कयंतीतदाबालामामेवंचकथंभवेत् ॥ गुणभाग्यनिधिर्भर्तासुख
दःसत्सुताःकथं ॥ २१ ॥ एवंमनोरथंचक्रेदैवेनध्वंसितंपुरा ॥ किंकृत्वाकिंविदित्वामेकमुपास्येसुरेश्वरं ॥ २२ ॥ किंवा
मुनिमुपातिष्ठेकिंवातीर्थमुपाश्रये ॥ ममभाग्यंकथंसुप्तंभर्ताकोपिनवांछति ॥ २३ ॥ पंडितोपिपितामूढोममभाग्य
वशादहो ॥ विवाहकालेसंप्राप्तेनदत्तासदृशेवरे ॥ २४ ॥ अध्यक्षाहंसखीमध्येकुमारीदुःखपीडिता ॥ नाहंस्वामिसु
खाभिज्ञायथाचालिगणोमम ॥ २५ ॥ ममभाग्यवतीमाताकथंस्वर्गंगतापुरा ॥ एवंचिंताकुलाबालामनोरथमहो
दधौ ॥ २६ ॥ निमग्नामोहसलिलेशोकमोहोर्मिपीडिता ॥ मेधावीऋषिराजोसौविचचारमहीतले ॥ २७ ॥ कन्या
दाननिमित्तंचविचिन्वन्सदृशंवरं ॥ तादृशंवरमप्राप्यनिराशःस्वमनोरथे ॥ २८ ॥ सुतास्वकीयभाग्याभ्यांभग्नसंक

जः ॥ २६ ॥ दुर्वासाउवाच साधुसाधुद्विजसुतेकुलमभ्युद्धृतंपितुः ॥ मेधाऋषेःसुतपसःफलमेतादृशीसुता ॥
॥ २७॥ कैलासादहमागच्छंज्ञात्वातेधर्मशीलताम् ॥ त्वदाश्रममनुप्राप्तस्त्वयासंपूजितोऽस्म्यहं ॥ २८ ॥ गमिष्या
मिवरारोहेशीघ्रंबदरिकाश्रमं ॥ दृष्टुंनारायणंदेवंसनातनमुनीश्वरं ॥ २९ ॥ तपश्चरंतमेकाग्रमत्युग्रंलोकहेतवे ॥
बालोवाच ऋषेत्वद्दर्शनादेवशुष्कोमेशोकसागरः ॥ ३० ॥ अतःपरंशुभंभावियस्मात्संभावितात्वया ॥ समुद्भूत
बृहज्ज्वालदावहव्यभुजंमुने ॥ ३१ ॥ किंनवेत्सिदयासिंधोतन्निर्वापयशंकर ॥ हर्षहेतुर्नमेकश्चिद्दृश्यतेसुविचार
तः ॥ ३२ ॥ नमातानपिताभ्रातायोमेधैर्यंप्रयच्छति ॥ कथंकारमहंजीवेदुःखसागरपीडिता ॥ ३३ ॥ यांयांदिशंप्र
पश्यामिसासाशून्याविभातिमे ॥ ममदुःखप्रतीकारंकुरुशीघ्रंतपोनिधे ॥ ३४ ॥ नमांकामयतेकश्चित्पाणिग्रहणहे
तवे ॥ अतःपरंभविष्यामिवृषलीतिमहद्भयं ॥ ३५ ॥ तस्मान्नजायतेनिद्रानरुचिर्भोजनेमम ॥ ब्रह्मन्मुमूर्षुरस्म्येवइति
मेनिश्चयोधुना ॥ ३६ ॥ इत्युक्त्वाश्रुमुखीबालाविररामतदग्रतः ॥ दुर्वासास्तदुपायार्थंविचारमकरोत्तदा ॥ ३७ ॥ श्री
नारायणउवाच इतिमुनितनयावचोनिशम्यबहुलतमामुनिराड्विचार्यछंदः ॥ अतिशयकृपयाविलोक्यबालां

किमपिहितंनिजगादसारभूतं ॥ ३८ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममाहात्म्येदुर्वासस्तपोवनागमनंनामनवमोध्यायः ॥ ९ ॥ ॥ छ ॥ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ छ ॥

नारदउवाच किंविचार्यबृहद्धामापरमःकोपनोमुनिः ॥ अब्रवीदृषिकन्यांतांतन्मेब्रूहितपोनिधे ॥ १ ॥ सूतउवाच नारदस्यवचःश्रुत्वाप्रोवाचबदरीपतिः ॥ दुर्वासोवचनंगुह्यंसर्वेषांहितकृद्द्विजाः ॥ २ ॥ श्रीनारायणउवाच श्रृणु नारदवक्ष्येऽहंयदुक्तंमुनिनातदा ॥ मेधावितनयादुःखमपनेतुंकृपालुना ॥ ३ ॥ दुर्वासाउवाच श्रृणुसुंदरिवक्ष्यामिगुह्याद्गुह्यतरंमहत् ॥ आख्येयंनैवकस्यापित्वदर्थंतुविचारितं ॥ ४ ॥ नविस्तरंकरिष्यामिसमासेनब्रवीमिते ॥ इतस्तृतीयःसुभगेमासस्तुपुरुषोत्तमः ॥ ५ ॥ तस्मिन्स्नातोनरस्तीर्थेमुच्यतेभ्रूणहत्यया ॥ एतत्तुल्योनकोप्यन्यःकार्तिकादिषुसुंदरि ॥ ६ ॥ सर्वेमासास्तथापक्षाःपर्वाण्यन्यानियानिच ॥ पुरुषोत्तममासस्यकलांनार्हंतिषोडशीं ॥ ७ ॥ साधनानिसमस्तानिनिगमोक्तानियानिच ॥ मासस्यैतस्यनार्हंतिकलामपिचषोडशीं ॥ ८ ॥ द्वादशाब्दसहस्राणिगंगास्नानेनयत्फलं ॥ गोदावरीसकृत्स्नानाद्यत्फलंसिंहगेगुरौ ॥ ९ ॥ तदेवफलमाप्नोतिमासेवैपुरुषोत्तमे ॥ सकृत्सुस्नानमात्रेणयत्रकुत्रापिसुंदरि ॥ १० ॥ श्रीकृष्णवल्लभोमासोनाम्नाचपुरुषोत्तमः ॥ तस्मिन्संसेवितेबालेसर्वंभवति

 वांछितं ॥ ११ ॥ तस्मान्निषेवयाशुत्वंमासंतंपुरुषोत्तमं॥ मयापिसेव्यतेसोऽयंपुरुषोत्तमवन्मुदा ॥ १२॥ एकदा
भस्मसात्कर्तुमंबरीषंक्रुधामया ॥ मुक्ताकृत्यातदाबालेसुनाभंहरिणाज्वलत्॥ १३॥ मामेवभस्मसात्कर्तुंतदानीं
प्रेरितंमयि॥ पुरुषोत्तमव्रतादेवतच्चक्रंसंन्यवर्तत ॥ १४॥ त्रैलोक्यंभस्मसात्कर्तुंसमर्थंतच्चसुंदरि॥ मय्यकिंचित्क
रंजातंतदामेविस्मयोऽभवत्॥ १५॥ तस्माद्भजस्वसुभगेश्रीमंतंपुरुषोत्तमं॥ इत्युक्त्वामुनिशार्दूलोविरराममुनेःसु
तां॥ १६॥ श्रीकृष्णउवाच दुर्वासोवचनंश्रुत्वाबालामूढधियावदत्॥ भाविनाप्रेरिताराजन्नसूयाप्रेरितासती ॥
॥१७॥ दुर्वाससंमुनिश्रेष्ठंमनसिक्रोधसंयुता ॥ बालोवाच नमत्थ्यंरोचतेब्रह्मन्यदुक्तंभवतामुने ॥ १८॥ कथंमा
घादयोमासाअकिंचित्करतांगताः ॥ कथंकार्तिकमासंत्वमूनंवदसितद्वद ॥ १९ ॥ वैशाखःसेवितःकिंवानदास्य
तिसुकामितं॥ सदाशिवादयोदेवाःफलदाःकिंनसेविताः ॥ २० ॥ अथवाभुविमार्तंडोदेवःप्रत्यक्षदर्शनः॥ सकिंन
दाताकामानांदेवीचजगदंबिका ॥ २१॥ गणेशःसेवितःकिंवानसंयच्छतिकामितं ॥ व्यतीपातादिकान्योगान्दे
वान्शर्वादिकानपि॥ २२॥ सर्वानुल्लंघ्यवदतस्त्रपाकिंतेनजायते॥ अयंतुमलिनोमासःसर्वकर्मविगर्हितः ॥ २३॥
असूर्यसंक्रमःश्रेष्ठःक्रियतेचकथंमुने॥ वेदाहंसर्वदुःखानांपारदंश्रीहरिंपरं ॥ २४ ॥ नान्यंपश्यामिभूदेवचिंतयंती

शशापकोपनोमुनिः॥ अहोश्रीकृष्णतेत्यंतंवल्लभारुक्मिणीसदा॥ १४॥ यद्भवान्मामवज्ञायप्रियाप्रेमपरिप्लुतः॥
पाययामासपानीयंमाहात्म्यंदर्शयन्स्वकं॥ १५॥ दंपत्योरुभयोरेववियोगोस्तुयुधिष्ठिर॥इतियोदत्तवान्शापंसए
वमुनिसत्तमः ॥ १६॥ साक्षाद्रुद्रांशसंभूतःकालरुद्रइवापरः ॥ अत्रेरुग्रतपःकल्पवृक्षदिव्यफलंमहत् ॥ १७ ॥ प
तिव्रताशिरोरत्नाऽनुसूयागर्भसंभवः॥ दुर्वासानाममेधावीयथावैमूर्तिमत्तपः ॥ १८॥ नैकतीर्थजलक्लिन्नजटाभू
षितसच्छिराः ॥ तमालोक्यसमायांतंकुमारीशोकसागरात् ॥१९॥ उन्मज्योत्थायधैर्येणववंदेचरणौमुनेः॥ नत्वा
स्वाश्रममानीयजानकीवाल्मिकिंयथा॥ २०॥ अर्घ्यपाद्यैर्वन्यफलैःपुष्पैश्चविविधैर्मुनिं॥ स्वागतंपृच्छ्यसाबाला
पूजयामाससादरं ॥ ततःसविनयाराजन्नुवाचमुनिकन्यका ॥ २१ ॥ बालोवाच नमस्तेस्तुमहाभागअत्रिगो
त्रदिवाकर॥ कुतोधिगमनंसाधोदुर्भगायाममाश्रमे॥ ममभाग्योदयोजातस्तवागमनतोमुने॥ २२॥ अथवाम
त्पितुःपुण्यप्रवाहप्रेरितोभवान्॥ संभावयितुंमामेवत्यागतोमुनिसत्तमः ॥ २३॥ भवादृशांपादरजस्तीर्थरूपंमहा
त्मनां॥ स्पर्शंत्याःसफलंजन्मसफलंचाद्यमेव्रतं ॥ २४ ॥ अद्यमेसफलंपुण्यमद्यमेसफलोभवः॥ भवादृशामहापु
ण्यायन्मेदृष्टिपथंगताः॥ २५॥ एवमुक्त्वाचसाबालातस्थौतूर्ष्णींतदग्रतः ॥ सस्मितंमुनिराहेदंदुर्वासाःशंकरांश

पसापार्वतीपतिं ॥ ३८ ॥ इतिनिश्चित्यमनसामेधावितनयानृप ॥ दुष्करंतत्तपःकर्तुमियेषस्वाश्रमेस्थिता ॥ ३९ ॥
सूतउवाच आर्षेयीप्रबलमुनेर्वचोविनिंद्यप्रोद्युक्तांधकरिपुसेवनेवनेस्वे ॥ लक्ष्मीशंबहुलफलप्रदंविहायसावित्री
पतिमपिताद्दशंनिरस्य ॥ ४० ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममाहात्म्येश्रीनारायणनारदसंवादेकुमारीशि
वाराधनोद्योगोनामदशमोऽध्यायः ॥ १० ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥
नारदउवाच अचीकरत्कुमारीयंमहत्कर्मसुदुष्करं ॥ मुनीनामपिसर्वेषांतन्मेवदमहामुने ॥ १ ॥ श्रीनारायणउवा
च अथारभतकल्याणीतपःपरमदारुणं ॥ चिंतयंतीशिवंशांतंपंचवक्त्रंसनातनं ॥ २ ॥ भुजंगभूषणंदेवंनंदिभृंगि
निषेवितं ॥ चतुर्विंशतितत्त्वैश्चगुणैस्त्रिभिरभिष्टुतं ॥ ३ ॥ महासिद्धिभिरष्टाभिःप्रकृत्यापुरुषेणच ॥ चंद्रखंडलसद्भा
लंजटाजूटविराजितं ॥ ४ ॥ चचारदुश्चरंबालातमुद्दिश्यपरंतपः ॥ पंचाग्नीनांचमध्येसास्थायिनीग्रीष्मगेरवौ ॥ ५ ॥
हेमंतशिशिरेचैवशीतवार्यंतरस्थिता ॥ व्यक्तवक्त्रातथारेजेजलस्थंकमलंयथा ॥ ६ ॥ शिरोधःप्रसृतश्यामनीलाल
कविगुंठिता ॥ जंबालवल्लरीपुंजैर्वेष्टितेवाबभौजले ॥ ७ ॥ ब्रह्मरंध्रोद्गतश्रीमद्धूमराजिर्व्यदृश्यत ॥ नलिनंसेव्यमाने
वमिलिंदालिःप्रसर्पिणी ॥ ८ ॥ वर्षास्वनावृताशेतेस्थंडिलेबृसिकान्विते ॥ संध्ययोरुभयोस्तन्वीधूमपानमचीकरत् ॥

॥ ९ ॥ पुरंदरःपरांचिंतामवापाश्रुत्यतत्तपः ॥ दुर्धर्षांदिविजैःसर्वैःस्पृहणीयामहर्षिभिः ॥ १० ॥ एवंतपसिवृत्तायामार्षेय्यांनृपनंदन ॥ गतान्यब्दसहस्राणिनवराजन्यभूषण ॥ ११ ॥ संतुष्टस्तपसातस्याभगवान्पार्वतीपतिः ॥ दर्शयामासबालायैनिजंरूपमगोचरं ॥ १२ ॥ तद्दृष्ट्वासहसोत्तस्थौदेहःप्राणमिवागतं ॥ तपःकृशापिसाबालाहृष्टपुष्टातदाभवत् ॥ १३ ॥ भूरिवातपसंक्लिष्टादेवमीढागरीयसी ॥ साबालाऽवनताभूत्वाववंदेगिरिजापतिं ॥ १४ ॥ मानसैरुपचारैस्तंसंपूज्यविश्ववंदितं ॥ तुष्टावजगतांनाथंभक्तियुक्तेनचेतसा ॥ १५ ॥ बालोवाच अयेशैलजावल्लभप्राणनाथप्रभोभर्गभूतेशगौरीशशंभो ॥ नमःसोमसूर्याग्निदिव्यत्रिनेत्रमदाधारमुंडास्थिमालिन्नमस्ते ॥ १६ ॥ नरोनेकतापाभिभूतांगपीडःपरंघोरसंसारवार्धौनिमग्नः ॥ खलव्यालकालोग्रदंष्ट्राभिदष्टोविमुच्येद्भवंतंशरण्यंप्रपन्नः ॥ १७ ॥ विभोयेनबाणःस्वकीयीकृतश्चमृताजीवितालर्कभूपालपत्नी ॥ दयानाथभूतेशचंडीशभव्यभवत्राणमृत्युंजयप्राणनाथ ॥ १८ ॥ मखध्वंसकर्तःसमस्तारिहर्तःसदासेवकानांभवध्वंसकर्तः ॥ नमोजन्महर्तःपुरासृष्टिकर्तस्त्वदीयानवप्राणनाथाघहर्तः ॥ १९ ॥ इत्येवंमनसावाचाशिवंस्तुत्वातपस्विनी ॥ विररामहाभागामेधावितनयानृप ॥ २० ॥ श्रीकृष्णउवाच तत्कृतंस्तोत्रमाकर्ण्यतपसोग्रतरेणच ॥ प्रसन्नवदनांभोजस्तामुवाचसदाशिवः ॥

॥ २१ ॥ शिवउवाच वरंवरयभद्रंतेयस्तेमनसिवांछितः ॥ प्रसन्नोस्मिमहाभागेमामाखिदतपस्विनि ॥ २२ ॥ त
दाकर्ण्यकुमारीयंमहानंदपरिप्लुता ॥ उवाचवचनंराजन्सुप्रसन्नंसदाशिवं ॥ २३ ॥ बालोवाच दीननाथदयासिं
धोप्रसन्नश्चेन्ममोपरि ॥ तदामत्कामितंदेहिमाविलंबंकुरुप्रभो ॥ २४ ॥ पतिंदेहिपतिंमह्यंपतिंपतिमहंवृणे ॥ पतिं
देहिमहादेवनान्यन्मेचिंतितंहृदि ॥ २५ ॥ एवमुक्त्वातदार्षेयीविरराममकपर्दिनं ॥ तदाकर्ण्यमहादेवोजगादमुनिक
न्यकां ॥ २६ ॥ शिवउवाच त्वयायत्स्वमुखेनोक्तंतदस्तुमुनिकन्यके ॥ पंचकृत्वस्त्वयायस्मात्पतिःसंप्रार्थितोऽधुना
॥ २७ ॥ तस्मात्पंचभविष्यंतिपतयस्तवसुंदरि ॥ शूराःसकलधर्मज्ञाःसाधवःसत्यविक्रमाः ॥ २८ ॥ यज्वानःस्वगुण
ख्याताःसत्यसंधाजितेंद्रियाः ॥ त्वन्मुखप्रेक्षकाःसर्वेराजन्यागुणशालिनः ॥ २९ ॥ श्रीकृष्णउवाच इत्याकर्ण्यवच
स्तस्यधूर्जटेरनतिप्रियं ॥ उवाचावनताभूत्वाबालावाक्यविशारदा ॥ ३० ॥ बालोवाच एवंमेगिरिजाकांतमा
स्तुलोकेऽतिकौतुकं ॥ एकस्याएकएवास्तिभर्तानार्याःसदाशिव ॥ ३१ ॥ नदृष्टानश्रुताःक्वापिनार्यैकापंचभर्तृका ॥
एकस्यपंचपत्न्यस्तुपुरुषस्यभवंतिहि ॥ ३२ ॥ त्वदीयाहंकथंशंभोभवेयंपंचभर्तृका ॥ नैवाहंसिवचस्त्वेवंमयिवक्तुंकृ
पानिधे ॥ ३३ ॥ तवैवजायतेलज्जात्वदीयाहंयतःप्रभो ॥ इत्याकर्ण्यवचस्तस्याःशंकरःप्राहतांपुनः ॥ ३४ ॥ शिवउ

दिवानिशं ॥ रामाद्वाजानकीजानेःशंकरात्पार्वतीपतेः ॥ २५॥ नान्यःकोपिमहान्देवोयोमेदुःखंव्यपोहति ॥ एता
न्विहायविप्रेंद्रकथंस्तौषिमलंमुने ॥ २६ ॥ एवमुक्तस्तयाविप्रपुत्र्यासक्रोधनोमुनिः ॥ जाज्वल्यमानोवपुषाक्रोधसं
रक्तलोचनः ॥ २७॥ तथापिनशशापैनांमित्रजांकृपयान्वितः ॥ मूढेयंनैवजानातिहिताहितमपूर्णधीः ॥ २८॥ पुरु
षोत्तममाहात्म्यंदुर्ज्ञेयंविदुषामपि ॥ किमुताल्पधियांपुंसांकुमारीणांविशेषतः ॥ २९ ॥ पितृहीनाकुमारीयंबालादुः
खाग्निभर्जिता ॥ अतीवोग्रतरंशापंमदीयंसहतेकथं ॥ ३० ॥ इत्येवंकृपयाक्रोधंसंजहारमनःस्थितं ॥ स्वस्थोभूत्वा
मुनिःप्राहतांबालामतिविक्लवां ॥ ३१ ॥ दुर्वासाउवाच अहोबालेनमेकोपोमित्रजेत्वयिकश्चन ॥ यत्तेमनसि
निर्भाग्येयथारुचितथाकुरु ॥ ३२ ॥ अपरंश्रूयतांबालेभविष्यंकिंचिदुच्यते ॥ पुरुषोत्तममासस्ययत्त्वयाऽनादरःकृ
तः ॥ ३३ ॥ सर्वथातत्फलंभाविइहवापरजन्मनि ॥ अतःपरंगमिष्यामिनरनारायणालयं ॥ ३४॥ नचशप्तामयाभी
रुमन्मित्रंतेपितायतः ॥ हिताहितंनजानासिबालभावाच्छुभाशुभं ॥३५॥ स्वस्तितेस्तुगमिष्यामिमास्तुकालात्ययो
मम ॥ शुभंशुभेतरंभाविनकेनाप्यनुलंघ्यते ॥ ३६ ॥ श्रीकृष्णउवाच इत्युदीर्यजगामाशुतामसस्तापसोमुनिः ॥
तत्क्षणंनिष्प्रभासाभूत्पुरुषोत्तमहेलया ॥ ३७ ॥ विमृश्यसुचिरंकालंतत्कालफलदंशिवं ॥ आराधयामिदेवेशंत

याते ॥ चिंतावबाधेमुनिराजकन्यांहत्यायथावृत्रहणंमुनीशाः ॥ ४७॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममाहा
त्म्येशिववाक्यंनामएकादशोध्यायः ॥ ११ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥
नारदउवाच शितिकंठगतेनाथबालाकिमकरोच्छुचा ॥ तन्मेवदविनीतायशुश्रूषाधर्मसिद्धये ॥ १ ॥ श्रीनारायण
उवाच एवमेवपुराप्रष्टःश्रीकृष्णःपांडुसूनुना ॥ यदुवाचवचोराज्ञेतन्मेनिगदतःशृणु ॥ २ ॥ श्रीकृष्णउवाच ए
वंगतेशिवेराजन्साबालाविगतप्रभा ॥ निःश्वासपरमाभीतासाश्रुनेत्राकृशोदरी ॥ ३ ॥ हृदयाग्निलसज्ज्वालाज्व
लितांगीकुमारिका ॥ दावाग्निदग्धपत्रासालतेवासतपस्विनी ॥ ४ ॥ दुःखमीर्ष्यामापन्नवत्यामेवंकालोमहानूगतः ॥
असौतामवचस्कंदताद्दशींतापसींप्रभुः ॥ ५ ॥ सहसातांसमापन्नांफणीवाखुनिवेशनं ॥ इतिकालेनबलिनावशंनी
तातपस्विनी॥६॥प्रावृण्मेघावृतेव्योम्निविद्युत्सौदामिनीयथा ॥ तथाऽऽश्रमेस्वकेनष्टातपसादग्धकल्मषा॥ ७॥ तदा
नीमेवधर्मिष्ठोयज्ञसेनोनराधिपः ॥ बृहत्संभारसंपन्नमकरोद्यज्ञमुत्तमं ॥८॥ तद्यज्ञकुंडादुद्भूताकुमारीकनकप्रभा॥
सेयंद्रुपदशार्दूलतनयाप्रथिताभुवि ॥ ९॥द्रौपदीसर्वलोकेषुत्यार्षेयीयापुराऽभवत् ॥ सेयंस्वयंवरेराजन्मत्स्यवेधेकृ
तेसति॥१०॥लब्धार्जुनेनपांचालीक्षुभितेराजमंडले ॥ तृणीकृत्यनृपान्सर्वान्भीष्मकर्णादिकान्बहून् ॥ ११ ॥

सेयंकचग्रहंप्राप्तादुष्टदुःशासनान्मुने ॥ वचांसिकर्णशूलानिश्राविताबरवर्णिनी ॥ १२ ॥ मयाचोपेक्षिताराज
नपुरुषोत्तमहेलनात् ॥ यदामयिकृतस्नेहामन्नामान्यवदन्मुहुः ॥ १३ ॥ दामोदरदयासिंधोकृष्णकृष्णजगत्पते ॥
हेनाथहेरमानाथकेशवक्लेशनाशन ॥ १४ ॥ नमातानतातोनचभ्रातृवर्गोनसख्योनजामिर्नवैभागिनेयः ॥
नबंधुर्नचेष्टोनवैप्राणनाथोहृषीकेशसर्वंभवानेवमेस्ति ॥ १५ ॥ गोविंदगोपिकानाथदीनबंधोदयानिधे ॥ दुः
शासनपराभूतांकिंनजानासिमांप्रभो ॥ १६ ॥ दुःशासनपराभूतातदाद्रुपदनंदिनी ॥ मदीयस्मरणंप्राप्ताविस्मृता
पिमयापुरा ॥ १७ ॥ शीघ्रंगरुडमारुह्यतत्रागत्यस्थितेनवै ॥ पूरितानिमयाराजन्नस्यैवासांस्यनेकशः ॥ १८ ॥
सदामयिकृतस्नेहामत्प्राणामत्परायणा ॥ ममातिवल्लभासाध्वीसखीमेप्राणसन्निभा ॥ १९ ॥ तथाप्युपेक्षितेयंसापु
रुषोत्तमहेलनात् ॥ पुरुषोत्तमतिरस्कारकर्तारंपातयाम्यहं ॥ २० ॥ सर्वथामुनिदेवानांसेव्योयंपुरुषोत्तमः ॥ किंपुन
र्मानुषाणांतुसर्वार्थफलदायकः ॥ २१ ॥ तस्मादाराधयस्वैनमागामिपुरुषोत्तमं ॥ वर्षेचतुर्दशेपूर्णेसर्वंतेभविताशु
भं ॥ २२ ॥ व्यलोकिमिकुरव्रातोयैरस्याःपांडुनंदन ॥ तन्नारीणामहंराजन्निर्वपिष्येऽलकान्रुषा ॥ २३ ॥ सुयोधना
दिभूपालान्सर्वान्नेष्येयमक्षयं ॥ सर्वशत्रुक्षयंकृत्वात्वंचराजाभविष्यसि ॥ २४ ॥ नमेक्षीरोदतनयाप्रियानापिहला

 युधः॥ नतथादेवकीदेवीप्रद्युम्नोनापिसात्यकिः॥२५॥ यादृशामेप्रियाभक्तास्तादृशोनास्तिकश्चन॥ येनमेपीडिता
 भक्तास्तेनाहंपीडितःसदा॥ २६॥ द्वेष्योमेनास्तितत्तुल्योयमस्तस्यफलप्रदः॥ नावलोक्योमयादुष्टोदंडार्थमपिपांड
व॥२७॥ श्रीनारायणउवाच श्रीकृष्णस्तान्समाश्वास्यपांडवान्द्रौपदींतथा॥ कुशस्थलींजिगमिषुरुवाच
मधुसूदनः॥ २८॥ राजन्नद्यगमिष्यामिद्वारकांविरहाकुलां॥ वसुदेवोमहाभागोबलदेवोममाग्रजः॥२९॥मन्मा
तादेवकीदेवीगदसांबादयोऽपरे॥ आहुकाद्याश्चयदवोरुक्मिण्याद्याश्चयाःस्त्रियः॥ ३०॥ सर्वेतेऽनिमिषैर्नेत्रैर्मदा
गमनकांक्षिणः॥ मामेवचिंतयंत्येवंमद्दर्शनसमुत्सुकाः॥३१॥ श्रीनारायणउवाच इत्युक्तवंतंदेवेशंकथंचित्पा
डुनंदनाः॥हरिप्रयाणमालक्ष्यतमूचुर्गद्गदाक्षरं॥ ३२॥ जीवनंनोभवानेवयथावारिजलौकसां॥पुनर्दर्शनमल्पेन
कालेनास्तुजनार्दन॥ ३३॥ पांडवानांहरिर्नाथोनान्यःकश्चिज्जगत्त्रये॥ इत्थंसर्वेवदंत्यद्धातस्मान्नःपाहिसर्वदा॥
॥३४॥नविस्मार्यावयंसर्वेत्वदीयाजगदीश्वर॥ अस्मच्चेतोमिलिंदानांजीवनंत्वत्पदांबुजं॥ ३५॥ अवलंबनमे
वास्तुप्रार्थयामोमुहुर्मुहुः॥ असकृत्पांडुपुत्रेषुगृणत्स्वेवंयदूद्वहः॥ ३६॥ मंदंमंदंसमारुह्यरथंप्रेमपरिप्लुतः॥ ययौद्वा
रवतीमेतान्पराकृत्यानुगच्छतः॥३७॥ श्रीनारायणउवाच अथश्रीद्वारकानाथेगतेद्वारवतींतदा॥ राजापि

वाच मास्तुतेस्मिन्भवेभीरुभव्यंतत्परजन्मनि ॥ अयोनिसंभवातत्रभविष्यसितपोबलात् ॥ ३५ ॥ भर्तृजंसुखमा
साद्यततोगंत्रीपरंपदं ॥ दुर्वासामेप्रियामूर्तिःसत्वयाऽवमतःपुरा ॥ ३६ ॥ सचेत्कोपाद्वतःसुभ्रुनिर्दहेद्भुवनत्रयं ॥ त्वया
गर्वातिरेकेणब्रह्मतेजःप्रमर्दितं ॥ ३७ ॥ पुरुषोत्तमस्त्वयामासोनकृतोभगवत्प्रियः ॥ यस्मिन्नर्पितमैश्वर्यंश्रीकृष्णेना
त्मनःस्वकं ॥ ३८ ॥ अहंब्रह्मादयोदेवानारदाद्यास्तपस्विनः ॥ यदादेशकराबालेतदाज्ञांकोविलंघयेत् ॥ ३९ ॥ समा
सोनत्वयामूढेपूजितोलोकपूजितः ॥ अतस्तेपंचभर्तारोभविष्यंतिद्विजात्मजे ॥ ४० ॥ नान्यथाभावितद्बालेपुरुषोत्त
मखंडनात् ॥ योवैनिंदतितंमासंसयातिघोररौरवं ॥ ४१ ॥ विपरीतंभवेत्तस्यनकदाप्यन्यथाभवेत् ॥ पुरुषोत्तमस्य
येभक्ताःपुत्रपौत्रधनान्विताः ॥ ४२ ॥ ऐहिकामुष्मिकींसिद्धिंयातायास्यंतियांतिच ॥ वयंसर्वेपिगीर्वाणाःपुरुषोत्त
मसेविनः ॥ ४३ ॥ यस्मिन्संसेवितेशीघ्रंप्रीयतेपुरुषोत्तमः ॥ सेवनीयंकथंमासंनभजामसुमध्यमे ॥ ४४ ॥ अत्युत्क
टानांमहतांवचोमिथ्याकथंवद ॥ अनुनेयाहिमुनयःसदसद्वादवादिनः ॥ ४५ ॥ वदन्नेवंनीलकंठःक्षिप्रमंतर्दधेहरः ॥
चकितासाभवद्बालायूथभ्रष्टामृगीयथा ॥ ४६ ॥ सूतउवाच शशांकलेखांकितभालदेशेसदाशिवेशैवदिशंप्र

ऋषयऊचुः सूतसूतमहाभागवदनोवदतांवर ॥ दृढधन्वाकथंप्रापपुरुषोत्तमसेवनात् ॥ १ ॥ सौराज्यंपुत्रपौत्रादी
नूलल्लनांचपतिव्रतां ॥ कथंचभगवल्लोकमवापयोगिदुर्लभं ॥ २ ॥ शृण्वतांतेमुखांभोजात्कथासारंमुहुर्मुहुः ॥ अ
लंबुद्धिर्ननस्तातयथापीयूषपानतः॥३॥अतोविस्तरतोब्रूहिइतिहासंपुरातनं ॥अस्मद्भाग्यबलेनैवधात्रासंदर्शितो
भवान् ॥ ४ ॥ सूतउवाच सनातनमुनिर्विप्रानारदायपुरातनं ॥ इतिहासमुवाचेमंसएवप्रोच्यतेधुना॥ ५॥ शृ
ण्वंतुमुनयःसर्वेचरित्रंपापनाशनं ॥ यथाधीतंगुरुमुखाद्राज्ञोवैदृढधन्वनः ॥ ६ ॥ श्रीनारायणउवाच शृणुरा
जन्प्रवक्ष्येहंभूपस्यदृढधन्वनः ॥ कथांपुरातनींरम्यांस्वर्धुनीमिवपावनीं॥ ७॥ आसीद्धैहयदेशस्यगोप्ताश्रीमान्मही
पतिः॥ चित्रधर्मेतिविख्यातोधीमान्सत्यपराक्रमः॥ ८ ॥ तस्यपुत्रोतितेजस्वीदृढधन्वेतिविश्रुतः॥ ससर्वगुणसंपन्नः
सत्यवाग्धार्मिकःशुचिः ॥ ९ ॥ आकर्णांतविशालाक्षःपृथुवक्षामहाभुजः ॥ अवर्धतमहातेजाःसार्धंगुणगणैरसौ
॥ १० ॥ अधीत्यसांगान्निगमांश्चतुरश्चतुरोमुदा ॥ सकृन्निगदमात्रेणप्रागधीतानिवस्फुटं ॥ ११ ॥ दक्षिणांगुरवेद
त्त्वासंपूज्यविधिवच्चतं ॥ गुरोरनुज्ञयाधीमान्पितुःपुरमजीगमत् ॥ १२ ॥ जनयन्नयनानंदंनिजपत्तनवासिनां ॥
चित्रधर्मापितंपुत्रंदृष्ट्वालेभेपरांमुदं ॥ १३॥ युवानंसर्वधर्मज्ञंप्रजानांपालनेक्षमं ॥ अतःपरंकिमत्रास्तिसंसारेसा

रवर्जिते ॥ १४ ॥ आराधयामिश्रीकृष्णंद्विभुजंमुरलीधरं ॥ प्रसन्नवदनंशांतंभक्तानामभयप्रदं ॥ १५ ॥ ध्रुवांब
रीषशर्यातिययातिप्रमुखान्नृपाः ॥ शिबिश्चरंतिदेवश्चशशबिंदुर्भगीरथः ॥ १६ ॥ भीष्मश्चविदुरश्चैवदुष्यंतोभरतो
पिवा ॥ पृथुरुत्तानपादश्चप्रह्लादोथविभीषणः ॥ १७ ॥ एतेचान्येचराजानस्त्यक्त्वाभोगाननेकशः ॥ अध्रुवेणध्रुवं
प्राप्ताआराध्यपुरुषोत्तमं ॥ १८ ॥ अतोमयापिकर्तव्यमरण्येहरिसेवनं ॥ छित्त्वास्नेहमयंपाशंदारागारसुतादिषु ॥
॥ १९ ॥ इतिनिश्चित्यमनसासमर्थैर्दृढधन्वनि ॥ धुरंन्यस्यजगामाशुविरक्तःपुलहाश्रमं ॥ २० ॥ तत्रगत्वातपस्तेपे
श्रीकृष्णंमनसास्मरन् ॥ निस्पृहःसर्वकामेभ्योनिराहारोनिरंतरं ॥ २१ ॥ कियत्कालंतपस्तप्त्वाहरेर्धामजगामसः॥दृ
ढधन्वापिशुश्रावस्वपितुर्वैष्णवींगतिं ॥ २२ ॥ हर्षशोकसमाविष्टोत्यकरोदौर्ध्वदेहिकं ॥ पितृभक्त्यामहीपालोविद्वज्ज
नवचःस्थितः ॥ २३ ॥ पुष्करावर्तकेपुण्येनगरेऽत्यंतशोभिते ॥ राज्यंचकारभूपालोनीतिशास्त्रविशारदः ॥ २४ ॥ त
स्यशीलवतीभार्यानाम्नायागुणसुंदरी ॥ विदर्भराजतनयारूपेणाप्रतिमाभुवि ॥ २५ ॥ पुत्रान्सासुषुवेदिव्यांश्चतुरश्च
तुरान्शुभान् ॥ पुत्रींचारुमतींनाम्नासर्वलक्षणसंयुतां ॥ २६ ॥ चित्रवाक्चित्रवाहश्चमणिमांश्चित्रकुंडलः ॥ सर्वेते
मानिनःशूराविख्यातानामभिःपृथक् ॥ २७ ॥ दृढधन्वागुणैःख्यातःशांतोदांतोदृढव्रतः ॥ रूपवान्गुणवान्शूरःश्री

मानूप्रकृतिसुंदरः॥ २८॥ वेदवेदांगविद्वाग्मीधनुर्विद्याविशारदः॥ सुनिर्जितारिषड्वर्गःशत्रुसंघविदारणः॥ २९॥
क्षमयापृथिवीतुल्योगांभीर्येसागरोपमः ॥ पितामहसमःसाम्येप्रसादेगिरिशोपमः ॥ ३० ॥ एकपत्नीव्रतधरोरघु
नाथइवापरः॥ अत्युग्रवीर्यःसद्धर्मीकार्तवीर्यइवापरः॥ ३१॥ श्रीनारायणउवाच एकदानिशिसुप्तस्यचिंतासी
त्तस्यभूपतेः॥ अहोऽयंवैभवःकेनपुण्येनमहताभवत् ॥ ३२ ॥ नमयाचतपस्तप्तंनदत्तंनहुतंक्वचित् ॥ कमिदंपरिपृ
च्छामिममभाग्यस्यकारणं ॥ ३३ ॥ एवंचिंतयतस्तस्यरजनीविरतिंगता ॥ ब्राह्मेमुहूर्तउत्थायस्नानंकृत्वायथावि
धि॥ ३४॥ उपस्थायार्कमुर्घतंसंतर्प्यभगवत्कलाः॥ दत्त्वादानानिविप्रेभ्योनमस्कृत्वाऽश्वमारुहत् ॥ ३५ ॥ ततोर
ण्यंजगामाशुमृगयासक्तमानसः॥ मृगान्वराहान्शार्दूलान्जघानगवयान्बहून्॥ ३६॥ कश्चिन्मृगोहतोरण्येबा
णेनदृढधन्वना॥ वनाद्वनांतरंयातोबाणमादायसत्वरं ॥ ३७ ॥ शोणितस्रुतिमार्गेणराजाप्यनुययौमृगं॥ मृगःकु
त्रापिसंलीनोराजाबभ्रामतद्वनं॥ ३८॥ तृषाक्रांतःसकासारंददर्शसागरोपमं ॥ तत्रगत्वाशुपीत्वासौपानीयंतीर
मागतः॥ ३९॥ ततोददर्शन्यग्रोधंघनच्छायंमहातरुं॥ तज्जटायांनिबध्याश्वंनिषसादमहीपतिः ॥ ४० ॥ तत्रागम
त्खगःकश्चित्कीरःपरमशोभनः॥ मानुषीमीरयन्वाणीमतुलांनृपमोहिनीं॥ ४१॥शुकःपपाठसुश्लोकमेकमेवपुनःपु

सानुजस्तप्यंस्तीर्थानिचचारह ॥ ३८ ॥ पुरुषोत्तमेमनःकृत्वाब्रह्मन्श्रीभगवत्प्रिये ॥ अनुजानाहकृष्णांचविष्वक्
सेनवचःस्मरन् ॥ ३९ ॥ अहोश्रुतमतीवोग्रंमाहात्म्यंपौरुषोत्तमं ॥ कथंसुखानिलभ्यंतेनाभ्यर्च्यपुरुषोत्तमं ॥ ४० ॥
सधन्योभारतेवर्षेसपूज्यःश्रेष्ठएवसः ॥ विविधैर्नियमैर्यस्तुपूजयेत्पुरुषोत्तमं ॥ ४१ ॥ एवंसर्वेषुतीर्थेषुभ्रमंतःपांडु
नंदनाः ॥ पुरुषोत्तममासाद्यव्रतंचेरुर्विधानतः ॥ ४२ ॥ तदंतेराज्यमतुलमवापुर्गतकंटकं ॥ पूर्णेचतुर्दशेवर्षेश्री
कृष्णकृपयामुने ॥ ४३ ॥ दृढधन्वानृपःपूर्वंसूर्यवंशसमुद्भवः ॥ पुरुषोत्तममासस्यसेवनान्महतींश्रियं ॥ ४४ ॥पुत्रपौ
त्रसुखंचैवभुक्त्वाभोगाननेकशः ॥ जगामभगवल्लोकमगम्यंयोगिनामपि ॥ ४५ ॥ एतन्मासस्यमाहात्म्यमतुलंमु
निसत्तम ॥ नाहंवक्तुंसमर्थोस्मिकल्पकोटिशतैरपि ॥ ४६ ॥ सूतउवाच पुरुषोत्तममासस्यकृष्णद्वैपायनादहं ॥
माहात्म्यंश्रुतवान्विप्राःसोपिवक्तुंशशाकनो ॥ ४७ ॥ अस्यमाहात्म्यमखिलंवेत्तिनारायणःस्वयं ॥ अथवाभग
वान्साक्षाद्वैकुंठनिलयोहरिः ॥ ४८ ॥ ब्रह्मादिदेवानतपादपीठगोलोकनाथेनस्वकीकृतस्य ॥ सर्वंमाहात्म्यंपुरुषो
त्तमस्यदेवोनजानातिकुतोमनुष्यः ॥ ४९ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममाहात्म्येश्रीनारायणनारदसंवा
देपुरुषोत्तमव्रतोपदेशोनामद्वादशोऽध्यायः ॥ १२ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

तंहिवैष्णवंकलुषंहंतिमनाक्श्रुतंमुने ॥ ५४ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममाहात्म्येश्रीनारायणनारदसं
वादेदृढधन्वोपाख्यानेदृढधन्वनोमनःखेदोनामत्रयोदशोऽध्यायः॥ १३ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥
श्रीनारायणउवाच अथचिंतातुरस्यास्यगृहंवाल्मीकिराययौ ॥ योरामचरितंदिव्यंचकारपरमाद्भुतं ॥ १ ॥ दूरा
दालोक्यभूपालःसमुत्थायससंभ्रमं ॥ अनीनमत्तच्चरणौदंडवद्भक्तिसंयुतः॥ २॥ संपूज्यस्थापयामासतमृषिंपरमा
सने ॥ पादावंकगतौकृत्वाकराभ्यांसमलालयत् ॥ ३ ॥ पादावनेजनीरापःशिरसाधारयन्मुदा ॥ उवाचस्निग्धयावा
चास्मरन्कीरवचोनृपः ॥ ४ ॥ दृढधन्वोवाच भगवन्कृतकृत्योहंभाग्यवानस्मिसांप्रतं ॥ अद्यमेसफलंजन्मत्व
द्यार्थोधिगतःप्रभो ॥ ५ ॥ श्रुतंमेसफलंजातंयद्भवानक्षिगोचरः ॥ किंवर्ण्यंमेमहद्भाग्यंजगत्पावनपावन ॥ ६ ॥
श्रीनारायणउवाच इत्युक्त्वामुनिशार्दूलंविरराम सभूपतिः ॥ वाल्मीकिरपितंदृष्ट्वाराजानंविनयान्वितं ॥ ७ ॥ उ
वाचपरमप्रीतोहर्षयन्जनतांमुनिः ॥ वाल्मीकिरुवाच साधुसाधुनृपश्रेष्ठत्वय्येतदुपपद्यते ॥ ८ ॥ चिंतातुरःकथं
राजन्वदसर्वंमनोगतं ॥ किंचिद्वक्तुंस्पृहातेस्तितद्वदस्वमहामते ॥ ९ ॥ दृढधन्वोवाच भवदीयपदांभोजकृपया
मेसुखंसदा ॥ परंत्वेकोमहान्विद्वन्संदेहोहृदयेमम ॥ १० ॥ तमपाकुरुशल्यंत्वंवन्यकीरमुखोद्गतं ॥ कदाचिन्मृगया

कामोगतोहंगहनेवने ॥ ११ ॥ भ्रमन्नपश्यंकासारंतत्रपीतंजलंमया ॥ श्रमापनोदनाकांक्षीमहान्यग्रोधमाश्रि
तः ॥ १२ ॥ स्निग्धच्छायंसुनिबिडंमनोनयननंदनं ॥ तत्रापश्यंस्थितंकीरंमनोमोदविधायकं ॥ १३ ॥ दत्त
दृष्टिरहंयावज्ज्ञातस्तस्मिन्पतत्रिणि ॥ तावन्मांसंमुखीभूयश्लोकमेकंपपाठह ॥ १४ ॥ विद्यमानातुलसुखमा
लोक्यातीवभूतले ॥ नचिंतयसितत्त्वंत्वंतत्कथंपारमेष्यसि ॥ १५ ॥ इतिवाचःशुकेनोक्ताआकर्ण्याहंसुविस्मितः ॥
नतज्ज्ञानाम्यहंब्रह्मन्किमुवाचहरिच्छदः ॥ १६ ॥ इमंमेहार्दसंदेहंभवानुच्छेत्तुमर्हति ॥ ममराज्यसुखंपुत्राश्चत्वार
श्चारुदर्शनाः ॥ १७ ॥ पत्नीपतिव्रतारम्यागजाश्वरथपत्तयः ॥ समृद्धिरतुलाब्रह्मन्केनपुण्येनमेऽधुना ॥ १८ ॥ एत
त्सर्वंसमासेनविचार्यवक्तुमर्हसि ॥ श्रुत्वावाक्यानिभूपस्यवाल्मीकिर्मुनिसत्तमः ॥ १९ ॥ प्राणायामपरोभूत्वामुहू
र्तंध्यानमास्थितः ॥ करामलकवद्विश्वंभूतंभव्यंभवच्चयत् ॥ २० ॥ विलोक्यहृदिनिश्चित्यराजानंप्रत्युवाचसः ॥
वाल्मीकिरुवाच श्रृणुभूपतिशार्दूलप्राग्जन्मचरितंतव ॥ २१ ॥ पुराजन्मनिराजेंद्रभवान्द्रविडदेशजः ॥ द्विजःक
श्चित्सुदेवाख्यस्ताम्रपर्णीतटेवसन् ॥ २२ ॥ धार्मिकःसत्यवादीचयथालाभेनतोषवान् ॥ वेदाध्ययनसंपन्नोविष्णु
भक्तिपरायणः ॥ २३ ॥ अग्निहोत्रादियागैश्चतोषयामासतंहरिं ॥ सदैवंवर्तमानस्यभार्यासीद्वरवर्णिनी ॥ २४ ॥

गौतमीतिसुविख्यातागौतमस्यसुताशुभा ॥ पतिंपर्यचरत्प्रेम्णाभवानीवभवंप्रभुं ॥ २५ ॥ गृहमेधविधौतस्यवर्त
मानस्यधर्मतः ॥ व्यतीतःसुमहान्कालःप्रापासौसंततिंनहि ॥२६॥ एकदासनसंविष्टःसेव्यमानःस्वकांतया ॥ उवा
चवचनंविप्रोविषण्णोगद्गदाक्षरं ॥ २७॥ अयिसुंदरिसंसारेसुखंनास्तिसुतात्परं॥लोकांतरसुखंपुण्यंतपोदानसमु
द्भवं॥ २८॥ संततिःशुद्धवंश्याहिपरत्रेहचशर्मणे ॥ तमप्राप्यवरंपुत्रंजीवितंममनिष्फलं ॥ २९॥ नलालितोमया
पुत्रोवेदार्थोनप्रबोधितः ॥ नोद्वाहश्चकृतस्तस्यवृथाजन्मगतंमम ॥ ३० ॥ सद्योमेमृतिरेवास्तुनत्वायुश्चप्रियंमम॥
इत्थंप्रियवचःश्रुत्वासुंदरीखिन्नमानसा॥ ३१ ॥ समाश्वासयितुंधीराप्रियवाक्यविशारदा ॥ अवीवदद्वचः सौम्यं
प्रियप्रेमपरिप्लुता ॥ ३२ ॥ गौतम्युवाच ॥ मामाप्राणेश्वरब्रूहितुच्छवाक्यानिसांप्रतं ॥ भवद्विधाभागवतानैवमु
ह्यंतिसूरयः ॥ ३३ ॥ सत्यधर्मपरोसित्वंजितःस्वर्गस्त्वयाविभो ॥ कथंपुत्रैःसुखावाप्तिर्ज्ञानिनस्तवसुव्रत ॥ ३४॥
चित्रकेतुःपुराब्रह्मन्पुत्रशोकेनतापितः ॥ सनारदेनांगिरसाभ्येत्यसंतारितोभवत् ॥३५॥ तथांगराजाद्दुष्पुत्राद्वेना
द्वनमगान्निशि ॥ तथातेसंततिःस्वामिन्दुःखदाचभविष्यति ॥ ३६ ॥ तथापितवसत्पुत्रलालसाचेत्तपोधन ॥आरा
धयजगन्नाथंहरिंसर्वार्थदंमुदा ॥ ३७॥ यमाराध्यपुराब्रह्मन्कर्दमःपुत्रमाप्तवान् ॥ सांख्याचार्यस्तुतंदेवंकपिलंयो

नः॥ संबोध्यदृढधन्वानमेकाकिनमुपस्थितं ॥ ४२ ॥ विद्यमानातुलसुखमालोक्यातीवभूतले ॥ नचिंतयसितत्त्वं
त्वंतत्कथंपारमेष्यसि ॥ ४३॥ वारंवारमिदंपद्यंपपाठनृपतेःपुरः ॥ श्रुत्वातस्यवचोराजामुमुदेमुमुहेपिच ॥ ४४ ॥
किमेतदुक्तवान्कीरएकंपद्यंपुनःपुनः॥ नारिकेलमिवागम्यंदुर्बोधंसारसंभृतं ॥ ४५ ॥ किंवानायंभवेत्कृष्णद्वैपाय
नसुतःपरः॥ श्रीकृष्णसेवकंमूढंमग्नंसंसारसागरे ॥ ४६ ॥ विष्णुरातमिवोद्धर्तुंकृपयामांसमागतः ॥ इतिचिंतय
तस्तस्यतत्सेनासमुपागता ॥ ४७॥ कीरस्त्वदर्शनंप्रापबोधयित्वानराधिपं॥ राजास्वपुरमागत्यकीरवाक्यमनुस्म
रन्॥ ४८॥ वाच्यमानोपिनावोचद्दिनिद्रस्त्यक्तभोजनः ॥ राज्ञीरहःसमागत्यराजानंपर्यपृच्छत ॥ ४९ ॥ गुणसुं
दर्युवाच भोभोपुरुषशार्दूलदौर्मनस्यमिदंकुतः॥ उत्तिष्ठोत्तिष्ठभूपालभुंक्ष्वभोगान्वचोवद ॥ ५०॥ एवंस्त्रियानु
नीतोपिनकिंचिदवदन्नृपः ॥ स्मरन्शुकवचस्तथ्यंदुर्ज्ञेयममरैरपि ॥ ५१ ॥ सापिबालाविनिःश्वस्यभर्तृदुःखाति
पीडिता॥ नबुबोधनिजस्वामिचिंताकारणमुत्कटं॥५२॥एवंचिंतानिमग्नस्यराज्ञःकालःकियान्गतः ॥ संदेहसा
गरोत्तारेहेतुंनैवाभिपश्यत ॥ ५३ ॥ नारदउवाच इतिचिंतयतोधरापतेर्वदजातंदृढधन्वनश्चकिं ॥ विमलंचरि

 मंदोमनुष्योहमल्पबुद्धिर्जनार्दन ॥ ७॥ अतिदुःखतरंदीनंत्वद्भक्तंमामुपेक्षसे ॥ तत्कथंलोकबंधुस्त्वंप्रभोलोकेवृथागतं
 ॥ ८॥ वाल्मीकिरुवाच इत्यभिष्टूयभूमानंद्विजस्तस्थौहरेःपुरः ॥ तदाकर्ण्यहरिर्वाक्यमुवाचजलदस्वनः ॥ ९॥ श्री
हरिरुवाच सम्यक्संपादितंवत्सयत्त्वयाचरितंतपः ॥ किमिच्छसिमहाप्राज्ञतपोधनवदस्वमे ॥ १०॥ तत्तेहंवित
रिष्यामिसंतुष्टस्तपसातव ॥ एतादृशंमहत्कर्मनकेनापिकृतंपुरा ॥ ११॥ सुदेवउवाच यदिप्रीतोसिहेनाथदीनबं
धोदयानिधे ॥ सत्पुत्रंदेहिमेविष्णोपुराणपुरुषोत्तम ॥ १२॥ हरेपुत्रंविनाशून्यंगार्हस्थ्यंमेनरोचते ॥ इतिविप्रवचः
श्रुत्वाजगादहरिरीश्वरः ॥ १३॥ श्रीहरिरुवाच अदेयमपितेसर्वंदास्येपुत्रंविनाद्विज ॥ तवपुत्रसुखंवत्सविधात्रा
नैवनिर्मितं ॥ १४॥ त्वदीयभालफलकेवर्णाःसर्वेमयेक्षिताः ॥ तत्रनैवास्तितेपुत्रसुखंसप्तसुजन्मसु ॥ १५॥ इ
त्याकर्ण्यहरेर्वाक्यंवज्रनिर्घातनिष्ठुरं ॥ सपपातमहीपृष्ठेछिन्नमूलइवद्रुमः ॥ १६॥ पतिंपतितमालोक्यप्रमदात्यंत
दुःखिता ॥ पश्यंतीस्वामिनंपुत्रस्पृहाशून्यमरूरुदत् ॥ १७॥ पश्चाद्धैर्यंसमालंब्यसावोचत्पतितंपतिं ॥ गौतम्युवाच उ
त्तिष्ठोत्तिष्ठहेनाथकिंनस्मरसिमेवचः ॥ १८॥ विधात्रालिखितंभालेतल्लभेतसुखासुखं ॥ किंकरोतिरमानाथःस्वकृतं
भुंजतेनरः ॥ १९॥ अभाग्यस्यकृतोद्योगोमुमूर्षोरिवभेषजं ॥ तस्यसर्वंभवेद्व्यर्थंयस्यदैवमदक्षिणं ॥ २०॥ क्रतुदानत

पः सत्यव्रतेभ्योहरिसेवनं ॥ श्रेष्ठंसर्वेषुवेदेषुततोदैवबलंवरं ॥ २१ ॥ तस्मात्सर्वत्रविश्वासंविहायोत्तिष्ठभूसुर ॥ दैवमे
वावलंब्याशुहरिणाकिंप्रयोजनं ॥ २२ ॥ इत्याकर्ण्यवचस्तस्यास्तीव्रशोकसमन्वितं ॥ वैनतेयोवदद्विष्णुंक्षोभसंजा
तवेपथुः ॥ २३ ॥ गरुडउवाच शोकसागरसंमग्नांब्राह्मणींवीक्ष्यहेहरे ॥ तथैवब्राह्मणंनेत्रगलद्बाष्पकलाकुलं ॥ २४ ॥
दीनबंधोदयासिंधोभक्तानामभयंकर ॥ भक्तदुःखासहिष्णोस्तेदयाद्यक्कगताप्रभो ॥ २५ ॥ अहोब्रह्मण्यदेवस्त्वंत्वद्ध
र्मःक्कगतोधुना ॥ त्वद्भक्तस्यचतुर्धापिमुक्तिःकरतलेस्थिता ॥ २६ ॥ अहोतथापिनेच्छंतिविहायभक्तिमुत्तमां ॥ तद
ग्रेसिद्धयश्चाष्टौकिंकरीभूयसंस्थिताः ॥ २७ ॥ त्वदाराधनमाहात्म्यमेवंसर्वत्रविश्रुतं ॥ तर्हिविप्रस्यपुत्रेच्छापूरणेकः
परिश्रमः ॥ २८ ॥ गजमर्पयतःपुंसोल्पंकुशेकःपरिश्रमः ॥ अतःपरंनकेनापिसेव्यतेतेपदांबुजं ॥ २९ ॥ यदद्दष्टगतं
पुंसस्तदेवभविताध्रुवं ॥ इतिलोकेप्रथाजातात्वद्भक्तिर्विलयंगता ॥ ३० ॥ कर्तुमकर्तुंसामर्थ्यंतवसर्वत्रविश्रुतं ॥ तदे
वाद्यगतंनाथनचेदस्मैसुतप्रदः ॥ ३१ ॥ अतस्त्वंसर्वथादेहिपुत्रमेकंद्विजन्मने ॥ सुदामाख्वांसमाराध्यलेभेवैभ
वमुत्तमं ॥ ३२ ॥ सांदीपिनिर्मृतंपुत्रमवापकृपयातव ॥ इतितेशरणप्राप्तौदंपतीपुत्रलालसौ ॥ ३३ ॥ श्रीनारायणउ
वाच इतिगरुडवचोनिशम्यविष्णुर्वचनमुवाचखगंसुधोपमानं ॥ अयिखगवरपुत्रमेकमस्मैवितरमनोगतमा

शुवैनतेय ॥ ३४ ॥ इतिहरिवचनंनिजानुकूलंझटितिनिशम्यखगोतिहृष्टचेताः ॥ अददद्तिविषण्णमानसायसुतम
नुरूपमिलासुरायरम्यं ॥ ३५ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममाहात्म्येदृढधन्वोपाख्यानेश्रीनारायणनार
दसंवादेसुदेववरप्रदानंनामपंचदशोध्यायः ॥ १५ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥
श्रीनारायणउवाच श्रृणुनारदवक्ष्येहंयदुक्तंदृढधन्वने ॥ वाल्मीकिनामहाप्राज्ञचरितंपरमाद्भुतं ॥ १ वाल्मीकि
रुवाच दृढधन्वन्महाराजश्रृणुष्ववचनंमम ॥ सुपर्णःकेशवादेशादिदमाहद्विजेश्वरं ॥ २ ॥ गरुडउवाच सप्तजन्म
सुतेपुत्रसुखंनास्तीतियद्वचः ॥ हरिणोक्तंद्विजश्रेष्ठतत्तथैवतवाधुना ॥ ३ ॥ तथापिस्वामिनाज्ञप्तःकृपयादद्मितेसुतं ॥
मदंशसंभवःपुत्रोभवितातेतपोधन ॥ ४ ॥ येनत्वमाशिषःसत्यालप्स्यसेगौतमीयुतः ॥ परंतज्जनितंदुःखंयुवयो
र्भविताध्रुवं ॥ ५ ॥ धन्योसिद्विजशार्दूलयत्तेजाताहरौमतिः ॥ सकामाप्यथनिष्कामाहरिभक्तिर्हरेःप्रिया ॥ ६ ॥
जलबुद्बुदवत्पुंसांशरीरंक्षणभंगुरं ॥ तदासाद्यहरेःपादंधन्यश्चिंतयतेहृदि ॥ ७ ॥ हरेरन्योनसंसारात्तारयेद्बहुदुस्त
रात् ॥ हरेरेवकृपालेशान्मयादत्तःसुतस्तव ॥ ८ ॥ मनसिश्रीहरिंधृत्वाविचरस्वयथासुखं ॥ उदासीनतयास्थित्वा
भुंक्ष्वसंसारजंसुखं ॥ ९ ॥ वाल्मीकिरुवाच दंपत्योःपश्यतोःसद्योदत्त्वावरमनुत्तमं ॥ खगद्वाराहरिःशीघ्रंय

गिनांवरं ॥ ३८ ॥ धर्मपत्न्यावचश्चेत्थंश्रुत्वाविप्रशिरोमणिः ॥ निश्चित्यैवंतयासार्धंताम्रपर्णीतटंगतः ॥ ३९ ॥ स्ना
त्वाथविरजेपुण्येचचारपरमंतपः ॥ शुष्कपर्णजलाहारःपंचमेपंचमेदिने ॥ ४० ॥ चत्वार्यब्दसहस्राणिगतान्येवंतपो
निधेः ॥ तस्यैतत्तपसाब्रह्मंस्त्रयोलोकाश्चकंपिरे ॥ ४१ ॥ अत्युग्रंतत्तपोदृष्ट्वाभगवान्भक्तवत्सलः ॥ प्रादुर्बभूवतरसा
गरुडोपरिसंस्थितः ॥ ४२ ॥ श्रीनारायणउवाच तंदृष्ट्वानवजलदोपमंमुरारिंदोर्दंडैर्जगदवनक्षमैश्चतुर्भिः ॥ सं
लक्ष्यंमुदितमुखंसुदेवशर्मासाष्टांगंनतिमकरोन्मुदामुकुंदं ॥ ॥ ४३ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममाहा
त्म्येश्रीनारायणनारदसंवादेचतुर्दशोऽध्यायः ॥ १४ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥
श्रीनारायणउवाच ततस्तुष्टावतंदेवंश्रीकृष्णंभक्तवत्सलं ॥ बद्धांजलिपुटोभूत्वासुदेवोगद्गदाक्षरं ॥ १ ॥ नमस्ते
देवदेवेशत्रैलोक्याभयदप्रभो ॥ सर्वेश्वरनमस्तेस्तुत्वामहंशरणंगतः ॥ २ ॥ पाहिमांपरमेशानशरणागतवत्स
ल ॥ जगद्वंद्यनमस्तेस्तुप्रपन्नभयभंजन ॥ ३ ॥ जयस्वरूपंजयदंजयेशंजयकारणं ॥ विश्वाधारंविश्वसंस्थंविश्व
कारणकारणं ॥ ४ ॥ विश्वैकरक्षकंदिव्यंविश्वघ्नंविश्वपंजरं ॥ फलबीजंफलाधारंफलमूलंफलप्रदं ॥ ५ ॥ तेजःस्वरूपंते
जोदंसर्वतेजस्विनांवरं ॥ कृष्णंविष्णुंवासुदेवंवंदेहंदीनवत्सलं ॥ ६ ॥ नत्वांब्रह्मादयोदेवाःस्तोतुंशक्ताजगत्प्रभो ॥ कथं

पुरु. गवान्हरिः ॥ यतस्त्वंप्राप्तवान्पुत्रंदुर्लभंसुंदरंवरं ॥ २४ ॥ एतादृशःसुतःक्वापिकस्याप्यनवलोकितः ॥ विनीतोबुद्धि मा.
२७ मान्वाग्मीवेदाध्ययनशीलवान् ॥ २५ ॥ एहिपुत्रकिमेतत्तेकरेपश्यामिकौतुकं ॥ सच्छत्रंचामरयुगंकमलंयवसंयु
तं ॥ २६ ॥ आजानुलंबिनौहस्तौहस्तिहस्तसमौतव ॥ आकर्णांतविशालेचचक्षुषीमधुपिंजरे ॥ २७ ॥ वपुर्वर्तुलकं
मध्यंवलित्रयविभूषितं ॥ एवमुक्त्वासुतंदृष्ट्वापुनराहोत्सुकंद्विजं ॥ २८ ॥ अहोसुदेवतनयस्तवायंगुणसागरः ॥ गूढ
जत्रुःकंबुकंठःस्निग्धकुंचितमूर्धजः ॥ २९ ॥ तुंगवक्षाःपृथुग्रीवःसमकर्णोवृषांसकः ॥ सर्वलक्षणसंपूर्णःपुत्रोभाग्य
निधिर्महान् ॥ ३० ॥ एकएवमहान्दोषोयेनसर्वंवृथाकृतं ॥ इत्युक्त्वामौलिमाधुन्वन्विनिःश्वस्याब्रुवन्मुनिः ॥ ३१ ॥
पूर्वमायुःपरीक्षेतपश्चाल्लक्षणमादिशेत् ॥ निरायुषःकुमारस्यलक्षणैःकिंप्रयोजनं ॥ ३२ ॥ सुदेवतनयोयंतेद्वादशेहा
यनेजले ॥ मृत्युमेष्यतितस्मात्त्वंशोकंमाकुरुमानसे ॥ ३३ ॥ अवश्यंभाविनोभावाभवंत्येवनसंशयः ॥ तत्रप्रति
विधिर्नास्तिमुमूर्षोरिवभेषजं ॥ ३४ ॥ वाल्मीकिरुवाच इत्युदीर्यगतोब्रह्मलोकंदेवलकोमुनिः ॥ सुदेवःसहगौत
म्यापपातधरणीतले ॥ ३५ ॥ विललापचिरंभूमौदेवलोक्तंवचःस्मरन् ॥ अथसागौतमीपुत्रंस्वांकमारोप्यधैर्यतः ॥ २७
॥ ३६ ॥ चुचुंबवदनंप्रेम्णापश्चात्पतिमुवाचसा ॥ गौतम्युवाच द्विजराजनकर्तव्याभीतिर्भाव्येषुवस्तुषु ॥ ३७ ॥

नाभाव्यंभविताकुत्रभाव्यमेवभविष्यति ॥ किंनुनोदुःखमापन्नानलरामयुधिष्ठिराः ॥ ३८ ॥ बंधनंबलिराजापिप्रा
प्तवान्यदवःक्षयं ॥ हिरण्याक्षोवधंघोरोवृत्रोपिनिधनंगतः ॥ ३९ ॥ कार्तवीर्यःशिरश्छेदंरावणोपितथाप्तवान् ॥
विरहंरघुनाथोपिजानक्याःप्राप्तवान्मुने ॥ ४० ॥ परीक्षिदपिराजर्षिर्ब्राह्मणान्मृत्युमाप्तवान् ॥ एवंयेभाविनोभावाभ
वंत्येवमुनीश्वर ॥ ४१ ॥ अतउत्तिष्ठहेनाथहरिंभजसनातनं ॥ शरण्यंसर्वजीवानांनिर्वाणपददायकं ॥ ४२ ॥ वाल्मी
किरुवाच ॥ इतिनिजवनितावचोनिशम्यप्रकृतिमुपागतवान्सुदेवशर्मा ॥ हृदिहरिचरणांबुजंनिधायझटितिज
हौशुचमात्मजाद्भविर्त्रीं ॥ ४३ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममाहात्म्येश्रीनारायणनारदसंवादेदृढधन्वो
पाख्यानेसुदेवप्रतिबोधोनामषोडशोऽध्यायः ॥ १६ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥
नारदउवाच ततःकिमभवत्तस्यप्रबुद्धस्यमहीपतेः ॥ तन्मेवदकृपासिंधोश्शृण्वतांपापनाशनं ॥ १ ॥ श्रीनारायण
उवाच स्वकीयचरितंश्रुत्वाप्राक्तनंचकिताननं ॥ राजानंपुनरेवाहवाल्मीकिःश्रवणोत्सुकं ॥ २ ॥ वाल्मीकिरु
वाच इतिताःशीतलावाचःसमाकर्ण्यप्रियामुखात् ॥ सुदेवोधैर्यमालंब्यहरौचित्तमधास्यत् ॥ ३ ॥ निःश्वस्यदीनव
दनोयद्भाव्यंतद्भविष्यति ॥ इतिनिश्चित्यमनसापुष्पाद्यर्थंवनंययौ ॥ ४ ॥ एवंकृतवतस्तस्यकियान्कालोगतःक्रमा

पुरु. तू॥ समित्कुशफलाद्यर्थंकदाचित्काननंययौ ॥५॥ सुदेवोमनसाध्यायन्हरेःपादसरोरुहं ॥ तस्मिन्नेवदिनेगच्छ मा.
२८ द्वापींसूनुःसुहृद्वृतः॥६॥प्रविश्यवापींचिक्रीडेवयस्यैःसहवारिणि॥जलयंत्रैःक्षिपन्वारिबालकेषुस्मयन्मुहुः॥७॥
जलेक्रीडांमुहुःकुर्वन्ग्रीष्मेमोदमुपाययौ॥एवंसर्वेषुबालेषुक्रीडत्सुप्रेमनिर्भरं ॥८॥ अगाधसलिलेतिष्ठन्बालकै
रुपमर्दितः ॥ सपलायनमन्विच्छन्सुहृद्वर्गभयाद्द्रुतं ॥ ९ ॥ विधिनानोदितस्तत्रनियम्यश्वासमात्मनः ॥ममज्जा
गाधतोयेसौवंचयन्नात्मनःसखीन्॥ १०॥तत्रापिव्याकुलीभूयततोनिर्गंतुमुन्मनाः ॥ सहसामृतिमापन्नःकुमारो
गाधवारिणि॥ ११ ॥ जलादनिर्गतंवीक्ष्यसर्वेचकितमानसाः ॥ समानवयसःसर्वेहाहाकृत्वाप्रधाविताः ॥ १२ ॥
गौतम्यैकथयामासुर्बृहच्छोकपरायणाः॥ वज्रपातसमांवाचंबालानामनतिप्रियां ॥ १३॥ श्रुत्वाभूमौपपाताशु
गौतमीपुत्रवत्सला ॥ एतस्मिन्नेवसमयेवनाद्विप्रःसमाययौ ॥ १४ ॥ निशम्यपुत्रमरणंत्वष्टेवावापतद्भुवि॥ तत
उत्थायतौविप्रदंपतीवापिकांगतौ ॥ १५॥ मृतंपुत्रंसमालिंग्यस्वांकेकृत्वाकलेवरं ॥ सुदेवःपुत्रवदनंचुचुंबचमुहु
र्मुहुः॥ १६॥ ततःस्वांकेस्थितंपुत्रंमृतंवीक्षन्मुहुर्मुहुः ॥ सरुदन्विलपन्नेवगद्गदाक्षरमूचिवान् ॥ १७॥ सुदेवउवा २८
च ॥ वदपुत्रशुभांवाणींममशोकविनाशिनीं ॥ शीतलांललितांवत्समनसोमोदमावह ॥ १८ ॥ विहायपितरौ

यौनिजनिकेतनं ॥ १० ॥ सुदेवोपिसपत्नीकोवरंलब्ध्वामनोगतं ॥ आसाद्यस्वगृहंभेजेगार्हस्थ्यसुखमुत्तमं ॥ ११ ॥
कियत्कालक्रमेणास्यादोहदःसमपद्यत ॥ दशमेमासिसंप्राप्तेपूर्णोगर्भोबभूवह ॥ १२ ॥ प्रसूतिकालेसंप्राप्तेसासूत
सुतमुत्तमं ॥ सुदेवस्त्वात्मजेजातेजाताह्लादोबभूवह ॥ १३ ॥ आहूयजातकंकर्मचकारद्विजसत्तमान् ॥ बृहद्दानंद
दौतेभ्यःसुस्नातोद्विजसत्तमः ॥ १४ ॥ नामचास्याकरोद्धीमान्ब्राह्मणैःस्वजनैर्वृतः ॥ अयंसुतःसुपर्णेनदत्तःप्रेम्णा
कृपालुना ॥ १५ ॥ शारदेंदुरिवप्रोद्यत्तेजस्वीशुकसन्निभः ॥ शुकदेवेतिनामायंपुत्रोस्तुममवल्लभः ॥ १६ ॥ अवर्ध
तसुतःशीघ्रंशुक्लपक्षइवोडुपः ॥ पितुर्मनोरथैःसाकंमातृमानसनंदनः ॥ १७ ॥ उपनीयसुतंतातःसावित्रींदत्तवान्
मुदा ॥ संस्कारंवैदिकंप्राप्यब्रह्मचर्यव्रतेस्थितः ॥ १८ ॥ तत्तेजसान्वितोरेजेसाक्षात्सूर्यइवापरः ॥ वेदाध्ययनमारेभे
कुमारोबुद्धिसागरः ॥ १९ ॥ सद्बुद्ध्यानंदयामासस्वगुरुंगुरुवत्सलः ॥ सकृन्निगदमात्रेणविद्यांसर्वामुपेयिवान् ॥
॥ २० ॥ वाल्मीकिरुवाच एकदादेवलोऽभ्यागात्कोटिसूर्यसमप्रभः ॥ तमालोक्यसुदेवोसौननामदंडवन्मुदा ॥
॥ २१ ॥ पूजयामासविधिवदर्घ्यपाद्यादिभिर्मुनिं ॥ आसनंकल्पयामासदेवलायमहात्मने ॥ २२ ॥ तत्रोपविष्टोभ
गवान्देवलोदेवदर्शनः ॥ चरणेपतितंदृष्ट्वाकुमारंदेवलोब्रवीत् ॥ २३ ॥ देवलउवाच भोभोसुदेवधन्योसितुष्टस्तेभ

मनोहरं ॥ शतधादीर्यतेनोघस्थायसंहृदयंमम ॥ ३३ ॥ मन्येसुधन्यंकिलकोशलेंद्रंयःकाननंदाशरथौप्रयाते ॥ दधा
रनोऽसून्सुततापदग्धोधिङ्मांसुतस्यप्रलयेप्यनष्टं ॥ ३४॥ गोविंदविष्णोयदुनाथनाथश्रीरुक्मिणीप्राणपतेमुरारे॥
दीनानुकंपिन्भगवन्दयालोमांपाहिपुत्रानलतापतप्तं ॥ ३५ ॥ देवाधिदेवाखिललोकनाथगोपालगोपीशरथांग
पाणे ॥ कलिंदकन्याविषदोषहारिन्मांपाहिपुत्रानलतापतप्तं ॥ ३६ ॥ वैकुंठविष्णोनरकासुरारेचराचराधारभवा
ब्धिपोत ॥ ब्रह्मादिदेवानतपादपीठमांपाहिपुत्रानलतापतप्तं ॥ ३७ ॥ शठोमदन्योभवितानकोपियोदेवकीसूनुव
चोविलंघ्य ॥ पुत्रेदुराशांकृतवानभाग्योलभेतकोदृष्टविनष्टवस्तु ॥ ३८ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममा
हात्म्येश्रीनारायणनारदसंवादेदृढधन्वोपाख्यानेसुदेवविलापोनामसप्तदशोध्यायः ॥ १७ ॥ ॥ ५ ॥ ॥
नारदउवाच दृढधन्वामहीपालंकिमुवाचततःपरं ॥ वाल्मीकिर्भगवान्साक्षात्तद्वदस्वतपोनिधे ॥ १ ॥ श्रीनाराय
णउवाच दृढधन्वासराजर्षिःश्रुत्वाप्राक्तनमात्मनः॥ सविस्मयःसमापृच्छद्वाल्मीकिंमुनिसत्तमं ॥ २ ॥ दृढधन्वो
वाच ब्रह्मंस्तववचोरम्यंसुधाकल्पंनवंनवं॥ पीत्वापीत्वानतृप्तोस्मिभूयोवदततःपरं ॥ ३ ॥ वाल्मीकिरुवाच एवं
विलपतस्तस्यविप्रस्यजगतीपते ॥ अकालजलदोभ्यागाद्गर्जयंश्चदिशोदश ॥ ४ ॥ ववौवायुःखरस्पर्शःकंपयन्नि

वपर्वतान् ॥ बृहल्लसन्महाविद्युत्स्वनेनापूरयन्दिशः ॥५॥ यावन्मासंववर्षैवमहीपूर्णजलाभवत् ॥ नासौविज्ञातवान्
किंचित्पुत्रशोकाग्नितापितः ॥ ६ ॥ नपपौबुभुजेचैवपुत्रपुत्रइतिब्रुवन् ॥ एवंविलपतस्तस्यमासोयोविगतस्तदा ॥
॥ ७ ॥ श्रीकृष्णवल्लभोमासःसोभवत्पुरुषोत्तमः ॥ अजानतोपितस्यासीत्पुरुषोत्तमसेवनं ॥ ८ ॥ तेनात्यंतप्रसन्नःस
न्प्रादुरासीद्धरिःस्वयं ॥ नवीनजलदश्यामोवनमालाविभूषितः ॥ ९ ॥ प्रादुर्भूतेजगन्नाथेविलीनाघनराजयः ॥
ततोददर्शविप्रोसौश्रीकृष्णंपुरुषोत्तमं ॥ १० ॥ सहसांकगतंपुत्रदेहंभुविनिधायच ॥ सपत्नीकोनमश्चक्रेदंडवच्छ्री
हरिंमुदा ॥ ११ ॥ बद्धांजलिपुटोभूत्वासंस्थितःश्रीहरेःपुरः ॥ श्रीकृष्णएवशरणंममास्त्वितिविचिंतयन् ॥ १२ ॥ भगवा
नपितुष्टःसन्पुरुषोत्तमसेवनात् ॥ अवोचन्मधुरांवाणींबृहत्पीयूषवर्षिणीं ॥ १३ ॥ श्रीहरिरुवाच भोभोसुदेवधन्यो
सिभाग्यवान्सांप्रतंभवान् ॥ त्वद्भाग्यंवर्णितुंकोवासमर्थोभुवनत्रये ॥ १४ ॥ शृणुवत्सप्रवक्ष्येहंयत्तेभावितपोधन
द्वादशाब्दसहस्रायुःपुत्रस्तेभविताद्विज ॥ १५ ॥ अतःपरंनसंदेहस्तवपुत्रोद्भवेसुखे ॥ मयायंतेसुतोदत्तःप्रसन्नेनद्विजो
त्तम ॥ १६ ॥ तवपुत्रसुखंदृष्ट्वादेवगंधर्वमानवाः ॥ सस्पृहास्तेभविष्यंतिप्रसादान्मेद्विजोत्तम ॥ १७ ॥ अत्रतेकथयि
ष्यामिइतिहासंपुरातनं ॥ मार्कंडेयेनमुनिनापुराप्रोक्तंरघुंनृपं ॥ १८ ॥ पुरामुनीश्वरःकश्चिद्धनुर्नामामहामनाः ॥ पश्य

न्पुत्राधिनिर्दग्धान्लोकान्दीनमनाअभूत् ॥१९॥ अमरंपुत्रमन्विच्छंस्तपस्तेपेसुदारुणं ॥ सहस्राब्देगतेकालेदेवा
स्तमब्रुन्मुनिं ॥ २० ॥ वरंवरयभद्रंतेयस्तेमनसिवांछितः॥ प्रसन्नाःस्मोवयंसर्वेतीव्रेणतपसातव ॥ २१ ॥ श्री
नारायणउवाच इतिदेववचःश्रुत्वासुतंसोमृतसन्निभं ॥ वव्रेतपोधनःपुत्रममरंबुद्धिशालिनं ॥ २२ ॥ तमूचुर्नि
र्जराःसर्वेनैवंभूतोस्तिभूतले ॥ पुनराहमुनिर्देवान्निमित्तायुर्भवत्विति ॥ २३ ॥ सुराःप्रोचुर्निमित्तंकिंवदसोप्यवद
न्मुनिः ॥ असौमहान्गिरिर्यावत्तावदायुर्विधीयतां॥ २४ ॥एवमस्त्वितिसंपाद्यसेंद्रादेवादिवंययुः ॥ धनुःशर्मा
सुतंलेभेकालेनाल्पेनतादृशं ॥ २५ ॥ सपुत्रोववृधेतस्यतारापतिरिवांबरे ॥ प्राप्तेतुषोडशेवर्षेपुत्रंप्राहमुनीश्वरः ॥
॥ २६ ॥ हेवत्समुनयःसर्वेनावज्ञेयाःकदाचन ॥ शिक्षितोपितथापुत्रःसोद्वेगानकरोन्मुनीन् ॥ २७ ॥ निमित्तायु
र्बलोन्मत्तोब्राह्मणानवमन्यते ॥ कदाचिन्महिषोनाममुनिःपरमकोपनः ॥ २८ ॥ पूजयामासविधिनाशालग्राम
शिलांशुभां ॥ तदानींससमागत्यतामादायत्वरान्वितः ॥ २९ ॥ चिक्षेपनिजचांचल्यात्कूपेपूर्णजलेहसन् ॥ ततः
क्रोधसमाविष्टःकालरुद्रइवापरः ॥ ३० ॥शशापधनुषःपुत्रमद्यैवम्रियतामयं ॥ नमृतंपुत्रमाधक्ष्यदध्यौमनसिका
रणं ॥ ३१ ॥ निमित्तायुरयंदेवैःकृतोयंधनुषःसुतः ॥ इतिचिंतापरेणाशुनिःश्वासःप्रकटीकृतः ॥ ३२ ॥ महिषाःको

वृद्धोनत्वंगंतुमिहार्हसि॥ वत्साह्वयतिसन्मित्रंवेदाध्ययनहेतवे ॥ १९ ॥ मुदाह्वयत्युपाध्यायस्त्वामध्यापनहेतवे॥
तूर्णमुत्तिष्ठहेपुत्रकथंसुप्तोसिसांप्रतं ॥ २० ॥ त्वांविहायनगच्छामिगृहेकिंमेप्रयोजनं॥ शून्यारण्यमिवाद्यैवत्वद्दृते
सदनंमम ॥ २१ ॥ वनेपिनैवगच्छामिगमनेकिंप्रयोजनं ॥ फलमूलप्रियत्वंचेन्नोत्तिष्ठसिममाग्रतः॥ २२ ॥ नम
याचरितंगर्ह्यंब्रह्महत्यापिनोकृता॥ केनकर्मविपाकेनपुत्रोमेनिधनंगतः॥ २३ ॥ अहोधातःकिमेतावत्फलंलब्धंत्व
यामहत्॥ लोचनंममदीनस्यवृद्धस्याकृष्यनिर्दय ॥ २४ ॥ निर्धनस्यधनंबालंदंपत्योरवलंबनं॥ हरतस्तेकथंलज्जा
जायतेनहिकुत्रचित् ॥ २५॥ सर्वत्रसदयस्त्वंवैमयिनिर्दयतांगतः ॥ कथमित्यन्यथाभावोममभाग्यवशादहो ॥
॥ २६ ॥ कुत्राहंशोधयाम्यद्यपुत्रंप्रकृतिसुंदरं॥ द्रक्ष्येतवाननंकुत्रपुत्रचारुसुलोचनं ॥ २७॥ पर्जन्यःस्रवतेवारिसू
तेधान्यंवसुंधरा॥ गिरयोरत्नजातानिमुक्तासारंपयोनिधिः ॥ २८॥ नतंदेशंप्रपश्यामियत्रपुत्रंमृतंलभेत्॥ यद्गात्रं
तुसमालिंग्यहृद्गतंतापमुत्सृजेत्॥ २९ ॥ हेवत्सत्वंसकृद्वाचंश्रावयाशुदयांकुरु ॥ विलपत्यतितेमाताकुररीवगतत्र
पा ॥ ३०॥ तांदृष्ट्वातुकथंपुत्रदयानोत्पद्यतेतव॥ अननुज्ञाप्यपितरौनकदापिभवान्गतः ॥ ३१ ॥ आवामपृष्ट्वा
किंदीर्घमार्गयातोसिपुत्रक ॥ वेदाध्ययनसद्वाणींकस्यश्रोष्यामिसांप्रतं ॥ ३२ ॥ त्वामनुस्मरतोवत्सकलवाक्यं

स्यंशुकप्रोक्तंदुर्मनागृहमेष्यसि ॥ अथचिंतार्णवेमग्नंत्यक्त्वाविषयजंसुखं ॥ ४७॥ वाल्मीकिस्त्वांसमागत्यबोधयि
ष्यतिभूसुर ॥ तद्वाक्यैश्छिन्नसंदेहस्त्यक्त्वालिंगंहरेःपदं ॥ ४८ ॥ गमिष्यसिसपत्नीकःपुनरावृत्तिवर्जितं ॥ वदत्येवं
महाविष्णौसमुत्तस्थौद्विजात्मजः ॥ ४९ ॥ दंपतीतौसुतंदृष्ट्वामहानंदौबभूवतुः ॥ सुराःसर्वेपिसंतुष्टाववृषुःकुसुमा
करान् ॥ ५० ॥ ननामशुकदेवोपिश्रीहरिंपितरौचतौ ॥ गरुडोप्यतिसंहृष्टस्तंदृष्ट्वाससुतंद्विजं ॥ ५१ ॥ ब्राह्मणश्चकि
तोभूत्वाननामश्रीहरिंतदा ॥ बद्धांजलिपुटोविप्रःप्रोवाचजगदीश्वरं ॥ ५२ ॥ हृदिस्थंसंशयंछेत्तुंहर्षगद्गदयागिरा
॥५३॥ चत्वार्यब्दसहस्रमेवमनिशंतप्तंतपोदुष्करंतत्रागत्यवचस्त्वयानिगदितंयन्मांहरेकर्कशं ॥ हेवत्साद्यविलो
कितंतवसुतोनैवास्तिनैवास्तिहितद्वाक्यंव्यतिलंघ्यमेमृतसुतोत्थानेचहेतुंवद ॥ ५४ ॥ इतिश्रीबृहन्नारदीयपुराणे
पुरुषोत्तममाहात्म्येश्रीनारायणनारदसंवादेसुदेवपुत्रजीवनंनामाष्टादशोध्यायः ॥ १८ ॥ ॥ छ ॥ ॥ छ ॥
सूतउवाच इतिब्रुवाणंप्राचीनंमुनिमाहतपस्विनः ॥ प्रीणयन्निवसद्वाचानारदोमुनिसत्तमः ॥ १ ॥ किमुवाचोत्तरं
ब्रह्मन्सुदेवंतपसांनिधिं ॥ प्रसन्नोभगवान्विष्णुस्तन्मेब्रूहितपोनिधे ॥ २ ॥ श्रीनारायणउवाच इत्थमावेदितोवि
ष्णुःसुदेवेनमहात्मना ॥ प्रत्याहप्रीणयन्वाचाभगवान्भक्तवत्सलः ॥ ३ ॥ हरिरुवाच द्विजराजकृतंयत्तेनैतद

न्यःकरिष्यति ॥ नतद्वेत्तिभवान्नूनंयेनाहंतुष्टिमाप्तवान् ॥ ४ ॥ अयंममप्रियोमासःप्रयातःपुरुषोत्तमः ॥ तत्सेवातेस
मजनिशोकमग्नस्यसत्त्रियः ॥ ५ ॥ एकमप्युपवासंयःकरोत्यस्मिंस्तपोनिधे ॥ असावनंतपापानिभस्मीकृत्यद्विजो
त्तम ॥ सुरयानंसमारुह्यवैकुंठंयातिमानवः ॥ ६ ॥ मासमात्रंनिराहारोह्यकालजलदागमात् ॥ त्रिषुकालेषुतेस्नानं
संजातंप्रतिवासरं ॥ ७ ॥ अभ्रस्नानंत्वयालब्धंमासमात्रंतपोधन ॥ उपवासाश्चतेजातास्तावन्मात्रमखंडिताः ॥ ८ ॥
शोकसागरमग्नस्यपुरुषोत्तमसेवनं ॥ अजानतोपिसंजातंचेतनारहितस्यते ॥ ९ ॥ त्वदीयसाधनस्यास्यप्रमाणंकः
करिष्यति ॥ एकतःसाधनान्येववेदोक्तानिचयानिवै ॥ १० ॥ तानिसर्वाणिसंगृह्यत्वेकतःपुरुषोत्तमं ॥ तोलयामा
सदेवानांसन्निधौचतुराननः ॥ ११ ॥ लघून्यन्यानिजातानिगुरुश्चपुरुषोत्तमः ॥ तस्माद्भूमिस्थितैर्लोकैःपूज्यतेपुरु
षोत्तमः ॥ १२ ॥ पुरुषोत्तममासस्तुसर्वत्रास्तितपोधन ॥ तथापिपृथिवीलोकेपूजितःसफलोभवेत् ॥ १३ ॥ तस्मा
त्सर्वात्मनावत्सभवान्धन्योस्तिसांप्रतं ॥ यदस्मिंस्त्वभवानुग्रंतपःपरमदारुणं ॥ १४ ॥ मानुषंजन्मसंप्राप्यमासेश्रीपु
रुषोत्तमे ॥ स्नानदानादिरहिताद्दरिद्राजन्मजन्मनि ॥ १५ ॥ तस्मात्सर्वात्मनासेव्योमत्प्रियःपुरुषोत्तमः ॥ समेवल्ल
भतांयातिधन्योभाग्ययुतोनरः ॥ १६ ॥ श्रीनारायणउवाच एवमुक्त्वाहरिःशीघ्रंजगामजगदीश्वरः ॥ वैनतेयंस

मारुह्यवैकुंठममलंमुने ॥ १७ ॥ सपत्नीकःसुदेवस्तुमुमुदेहर्निशंभृशं ॥ मृतोत्थितंशुकंदृष्ट्वापुरुषोत्तमसेवनात् ॥
॥ १८ ॥ अजानतोममैवासीत्पुरुषोत्तमसेवनं ॥ तदेवसफलंजातंयेनपुत्रोमृतोत्थितः ॥ १९ ॥ अहोएतादृशोमासो
नैवदृष्टःकदाचन ॥ इत्येवंविस्मयाविष्टस्तंमासंसमपूजयत् ॥ २० ॥ तेनपुत्रेणमुमुदेसपत्नीकोद्विजोतमः ॥ पितरंनंद
यामासशुकदेवोपिसत्कृतैः ॥ २१ ॥ स्तुवन्मासंचविष्णुंचपूजयामाससादरं ॥ कर्ममार्गस्पृहांत्यक्त्वाभक्तिमार्गैक
सस्पृहः ॥ २२ ॥ सर्वदुःखापहंमासंवरिष्ठंपुरुषोत्तमं ॥ जपहोमादिभिस्तस्मिन्नभजच्छ्रीहरिंस्त्रिया ॥ २३ ॥ भुक्त्वाथ
विषयान्सर्वान्सहस्राब्दमहर्निशं ॥ जगामपरमंलोकंसपत्नीकोद्विजोत्तमः ॥ २४ ॥ योगिनामपिदुष्प्रापंयाजका
नांतुतत्कुतः ॥ यत्रगत्वानशोचंतिवसंतोहरिसन्निधौ ॥ २५ ॥ तत्रत्यंसुखमासाद्यसपत्नीकोभुवंगतः ॥ सएवदृढध
न्वात्वंप्रथितःपृथिवीपतिः ॥ २६ ॥ पुरुषोत्तममासस्यसेवनात्सकलर्द्धिभाक् ॥ महिषीयंपुराराजन्गौतमीपतिदे
वता ॥ २७ ॥ एतत्तेसर्वमाख्यातंपृष्टवानसियन्मम ॥ शुकस्तुतवभूपालपूर्वजन्मनियःसुतः ॥ २८ ॥ शुकदेवइति
ख्यातोहरिणायोनुजीवितः ॥ द्वादशाब्दसहस्रायुर्भुक्त्वावैकुंठमेयिवान् ॥ २९ ॥ सएवारण्यसरसिवटवृक्षंसमाश्रि
तः ॥ त्वामेवागतमालोक्यपितरंपूर्वजन्मनः ॥ ३० ॥ हितानामुपदेष्टारंप्रत्यक्षंदैवतंमम ॥ संसारसागरेमग्नंविष

टिशोजातास्तैर्गिरिःशकलीकृतः ॥ तदानींमृतिमापन्नोमुनिपुत्रोतिदुर्मदः ॥ ३३ ॥ धनुःशर्मातिदुःखेनविललाप
मुहुर्मुहुः ॥ विलप्यबहुधाविप्रोगृह्यपुत्रकलेवरं ॥ ३४ ॥ प्रविवेशचितावन्हिंपुत्रदुःखातिपीडितः ॥ एवंहठात्पुत्रा
येनसुखंयांतिकुत्रचित् ॥ ३५ ॥ वैनतेयेनयोदत्तस्तनयोयंतपोधन ॥ तेनत्वंपुत्रवान्लोकेस्पृहणीयोभविष्यसि ॥
॥ ३६ ॥ पुरुषोत्तममाहात्म्यात्प्रसन्नेनमयानघ ॥ सुचिरंस्थापितोयंहितनयःसुखदोस्तुते ॥ ३७ ॥ गार्हस्थ्यमतुलं
भुक्त्वासहपुत्रेणसर्वदा ॥ ततस्त्वंब्रह्मणोलोकंगत्वातत्रमहत्सुखं ॥ ३८ दिव्याब्दवर्षसाहस्रंभुक्त्वागंतासिभूतले ॥
ततोराजाचक्रवर्तीभविष्यसिद्विजोत्तम ॥ ३९ ॥ दृढधन्वेतिविख्यातःसमृद्धबलवाहनः ॥ संवत्सराणामयुतंरा
ज्यंभोक्ष्यसिपार्थिवं ॥ ४० ॥ अव्याहतबलैश्वर्यमाखंडलपदाधिकं ॥ गौतमीयंतवांगार्धहारिणीमहिषीतदा ॥ ४१ ॥
पतिसेवारतानित्यंनाम्नाचगुणसुंदरी ॥ चत्वारस्तेसुताभाव्याराजनीतिविशारदाः ॥ ४२ ॥ कन्यैकाचमहाभागासु
शीलासुवरानना ॥ भुक्त्वाभोगान्महाभागसुरासुरसुदुर्लभान् ॥ ४३ ॥ कृतार्थोहंधरापीठेइत्यज्ञानविमोहितः ॥
अतिदुस्तरसंसारविषयाकृष्टमानसः ॥ ४४ ॥ यदाविस्मरसेविष्णुंसंसारार्णवतारकं ॥ अयंतेतनयोविप्रशुकोभू
त्वातदावने ॥ ४५ ॥ वटवृक्षंसमाश्रित्यत्वामेवंबोधयिष्यति ॥ वैराग्योत्पादकंपद्यंपठन्नेवमुहुर्मुहुः ॥ ४६ ॥ श्रुत्वावा

यमे ॥ सर्वलोकहितार्थायचरंतिहिभवादृशाः ॥ ५ ॥ असौमासःस्वयंसाक्षाद्भगवान्पुरुषोत्तमः ॥ तस्मिन्कृतेमहत्पु
ण्यंत्वन्मुखात्संश्रुतंमया ॥ ६ ॥ पूर्वजन्मन्यहंभूत्वासुदेवोब्राह्मणोत्तमः ॥ विधिनाकृतवान्मासंदृष्ट्वापुत्रंमृतोत्थितं
॥ ७ ॥ अजानतोपिमेब्रह्मन्पुत्रशोकादचेतसः ॥ निराहारस्यसततंगतश्चपुरुषोत्तमः ॥ ८ ॥ तस्याप्येतत्फलंजातंशु
कदेवोमृतोत्थितः ॥ अनुभूतमिमंमासंसंसेवेहरिणोदितः ॥ ९ ॥ इहजन्मनितत्सर्वंविस्मृतंमेतपोधन ॥ एतत्पूजावि
धानंमेवदविस्तरतःपुनः ॥ १० ॥ वाल्मीकिरुवाच ब्राह्मेमुहूर्तेचोत्थायपरंब्रह्मविचिंतयेत् ॥ ततोव्रजेन्नैर्ऋता
शांबृहत्सोदकभाजनः ॥ ११ ॥ ग्रामाद्दूरतरंगच्छेत्पुरुषोत्तमसेवकः ॥ दिवासंध्यासुकर्णस्थब्रह्मसूत्रउदङ्मुखः
॥ १२ ॥ अंतर्धायतृणैर्भूमिंशिरःप्रावृत्यवाससा ॥ वक्रंनियम्ययत्नेननोष्ठीवेन्नोच्छ्वसेदपि ॥ १३ ॥ कुर्यान्मूत्रपुरी
षंचरात्रौचेद्दक्षिणामुखः ॥ गृहीतशिश्नश्चोत्थायगृहीतशुचिमृत्तिकः ॥ १४ ॥ गंधलेपक्षयकरंकुर्याच्छौचमतंद्रि
तः ॥ एकालिंगेगुदेपंचत्रिर्वामेदशचोभयोः ॥ १५ ॥ द्विसप्तपादयोश्चैवगार्हस्थ्यंशौचमुच्यते ॥ कृत्वाशौचंतुप्रक्षा
ल्यपादौहस्तौचमृज्जलैः ॥ १६ ॥ तीर्थेशौचंनकुर्वीतकुर्वीतोद्धृतवारिणा ॥ अरत्निद्वयसंचारित्यक्त्वाकुर्यादनुद्धृते
॥ १७ ॥ पश्चात्तच्छोधयेत्तीर्थमशुद्धमन्यथाहितत् ॥ एवंशौचंप्रकुर्वीतपुरुषोत्तमसद्व्रती ॥ १८ ॥ ततःषोडशगंडू

षान्प्रकुर्याद्द्वादशैववा ॥ मूत्रोत्सर्गेतुगंडूषानष्टौवाचतुरोगृही ॥ १९ ॥ उत्थायनेत्रेप्रक्षाल्यदंतकाष्ठंसमाहरेत् ॥ इमं
मंत्रंसमुच्चार्यदंतधावनमाचरेत् ॥ २० ॥ आयुर्बलंयशोवर्चःप्रजाःपशुवसूनिच ॥ ब्रह्मप्रज्ञांचमेधांचत्वंनोदेहि
वनस्पते ॥ २१ ॥ अपामार्गंबादरंवाद्वादशांगुलमव्रणं ॥ कनिष्ठांगुलिवत्स्थूलंपर्वार्द्धंकृतकूर्चकं ॥ २२ ॥ शुचिर्द्वा
दशगंडूषैर्निषिद्धंभानुवासरे ॥ आचम्यप्रयतःसम्यकूप्रातःस्नानंसमाचरेत् ॥ २३ ॥ स्नानादनंतरंतावत्तर्पयेत्तीर्थदे
वताः ॥ समुद्रगानदीस्नानमुत्तमंपरिकीर्तितं ॥ २४ ॥ वापीकूपतडागेषुमध्यमंकथितंबुधैः ॥ गृहेस्नानंतुसामान्यंगृ
हस्थस्यप्रकीर्त्तितं ॥ २५ ॥ ततश्ववाससीशुद्धेशुक्केचपरिधायच ॥ उत्तरीयंसदाधार्यंब्राह्मणेनविजानता ॥ २६ ॥
उपविश्यशुचौदेशेप्राङ्मुखोवाउदङ्मुखः ॥ भूत्वाबद्धशिखःकुर्यादंतर्जानुभुजद्वयं ॥ २७ ॥ सपवित्रेणहस्तेनकुर्या
दाचमनक्रियां ॥ नोच्छिष्टंतत्पवित्रंतुभुक्त्वोच्छिष्टंतुवर्जयेत् ॥ २८ ॥ आचम्यतिलकंकुर्याद्गोपीचंदनमृत्स्नया ॥ ऊ
र्ध्वपुंड्रमृजुंसौम्यंदंडाकारंप्रकल्पयेत् ॥ २९ ॥ ऊर्ध्वपुंड्रंत्रिपुंड्रंवामध्येछिद्रंप्रकल्पयेत् ॥ निवसत्यूर्ध्वपुंड्रेतुश्रियासह
हरिःस्वयं ॥ ३० ॥ त्रिपुंड्रेधूर्जटिःसाक्षादुमयासहसर्वदा ॥ विनाछिद्रंतुतत्पुंड्रंशुनःपादसमंविदुः ॥ ३१ ॥ श्वेतंज्ञा
नकरंप्रोक्तंरक्तंवश्यकरंनृणां ॥ पीतंसर्वर्द्धिदंप्रोक्तमन्यत्तुपरिवर्जयेत् ॥ ३२ ॥ शंखचक्रादिकंधार्यंगोपीचंदनमृत्स्न

या ॥ सर्वपापक्षयकरंपूजांगंपरिकीर्तितं ॥ ३३॥ शंखचक्रादिचिह्नानिदृश्यंतेयस्यविग्रहे ॥ मर्त्योमर्त्योनविज्ञेयः
सनित्यंभगवत्तनुः॥ ३४ ॥ पापंसुकृतरूपंतुजायतेतस्यदेहिनः॥ शंखचक्रादिचिह्नानियोधारयतिनित्यशः॥ ३५॥
नारायणायुधैर्नित्यंचिह्नितोयस्यविग्रहः ॥ पापकोटियुतस्यापितस्यकिंकुरुतेयमः ॥ ३६॥ प्राणायामंततःकृत्वा
संध्यावंदनमाचरेत् ॥ पूर्वसंध्यांसनक्षत्रामुपासीतयथाविधि ॥३७॥ गायत्रीमभ्यसेत्तावद्यावदादित्यदर्शनं॥ सा
वित्रैरनघैर्मंत्रैरुपस्थायकृतांजलिः ॥ ३८॥ आत्मपादौतथाभूमौसंध्याकालेऽभिवादयेत् ॥ यस्यस्मृत्येतिमंत्रेण
यदूनंपरिपूरयेत्॥३९॥ यस्तुसंध्यामुपासीतश्रद्धयाविधिवद्द्विजः॥ नतस्यकिंचिद्दुष्प्रापंत्रिषुलोकेषुविद्यते ॥४० ॥
दिवसस्यादिमेभागेकृत्यमेतदुदीरितं॥एवंकृत्वाक्रियांनित्यांहरिपूजांसमाचरेत्॥४१॥उपलिप्तेशुचौदेशेनियतोवा
ग्यतःशुचिः॥ वृत्तंवाचतुरस्रंवामंडलंगोमयेनतु ॥४२॥ विधायाष्टदलंकुर्यात्तंडुलैर्व्रतसिद्धये ॥ सौवर्णराजतंताम्रंमृ
न्मयंसुदृढंनवं ॥४३॥ अव्रणंकलशंशुद्धंस्थापयेन्मंडलोपरि ॥ तत्रोदकंसमापूर्यशुद्धतीर्थाहृतंशिवं ॥ ४४॥ कल
शस्यमुखेविष्णुःकंठेरुद्रःसमाश्रितः॥ मूलेतत्रस्थितोब्रह्मामध्येमातृगणाःस्मृताः ॥ ४५॥ कुक्षौतुसागराःसर्वेसप्त
द्वीपावसुंधरा ॥ ऋग्वेदोथयजुर्वेदःसामवेदोह्यथर्वणः॥ ४६॥ अंगैश्चसहिताःसर्वेकलशंतुसमाश्रिताः ॥ एवंसं

यव्यालदूषिते ॥ ३१ ॥ अत्यंतकृपयाविष्टश्चिंतयामासकीरजः ॥ नबोधयामिचेद्भूपंममापिबंधनंभवेत् ॥ ३२ ॥
पुन्नामनरकाद्यस्तुत्रायतेपितरंसुतः॥ इतिश्रुत्यर्थबोधोपिस्यादेवाद्यान्यथामम ॥ ३३ ॥ तस्मादुपकरिष्यामिपि
तरंपूर्वजन्मनः॥ अवधार्यवचश्चेत्थंकीरजोजीगदन्नृप ॥ ३४ ॥ इत्येतत्कथितंसर्वंयद्यत्पृष्टंत्वयानघ ॥ अतःपरंग
मिष्यामिसरयूंपापनाशिनीं ॥ ३५ ॥ श्रीनारायणउवाच इत्येवंप्रथमजनुश्चरित्रमुक्त्वाभूपस्यप्रथितयशस्विन
श्चिराय ॥ गच्छंतंमुनिमनुनीयराजराजःप्रावोचत्किमपिनमन्नगण्यपुण्यः॥३६॥इतिश्रीबृहन्नारदीयपुराणेपुरुषो
त्तममाहात्म्येश्रीनारायणनारदसंवादेवाल्मीकिनोक्तदृढधन्वोपाख्यानेपुरुषोत्तममाहात्म्यकथनंनामैकोनविंश
तितमोऽध्यायः॥ १९ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥
सूतउवाच नारायणमुखाच्छ्रुत्वाप्राक्तनंदृढधन्वनः ॥ नातितृप्तमनाविप्रानारदःपृष्टवान्मुनिं ॥ १ ॥ नारदउ
वाच ॥ किमुवाचमहाराजोवाल्मीकिंमुनिसत्तमं ॥ तन्मेवदविनीतायतपोधनसुविस्तरं॥ २॥ श्रीनारायणउवा
च श्रृणुनारदवक्ष्येहंयदुक्तंदृढधन्वना॥ अनुनीयमहाप्राज्ञंवाल्मीकिंमुनिसत्तमं॥ ३॥ दृढधन्वोवाच पुरुषोत्तम
मासोयंकथंकार्योमुमुक्षुभिः ॥ कीदृशीकस्यपूजाचकिंदानंकोविधिर्मुने॥ ४॥ एतत्सर्वंसमाचक्ष्वसर्वलोकहिता

डाधनाद्दतः॥६१॥मृत्युग्रस्तायुषःपुंसःकिंसुखंहर्षयत्यहो ॥ आघातंनीयमानस्यवध्यस्येवनिरर्थकम्॥६२॥धर्मार्थं
चयदाचित्तंनवित्तंसुलभंतदा॥यदावित्तंनचतदाचित्तंधर्मोन्मुखंभवेत्॥ ६३ ॥ चित्तवित्तेयदास्यातांसत्पात्रंनत
दालभेत्॥ एतत्त्रितयसंबंधोयदाकालेतुसंभवेत् ॥ ६४ ॥ अविचार्यतदाधर्मंयःकरोतिसबुद्धिमान् ॥ वित्तप्राचु
र्यसंसाध्यधर्माःसंतिसहस्रशः ॥ ६५ ॥ पुरुषोत्तमेस्वल्पवित्तसाध्योधर्मोमहान्भवेत् ॥ स्नानंदानंकथायांचवि
ष्णोःस्मरणमेवच ॥ ६६ ॥ एतन्मात्रोपिसद्धर्मस्त्रायतेमहतोभयात् ॥ ६७॥ गंगैवतीर्थंस्मरएवधन्वीवित्तंतुविद्यैव
गुणास्तुरूपं॥मासेषुसर्वेषुतथैवसाक्षान्मासोत्तमोयंपुरुषोत्तमोहि ॥ ६८॥ यद्यप्यसौनिंद्यतमःपुरासीत्सर्वेषुकृत्ये
षुमखादिकेषु॥ तथापिसाक्षाद्भगवत्प्रसादात्तन्नामनाम्नाभुविविश्रुतोभूत्॥६९॥ यथाहस्तिपदेलीनंसर्वप्राणिपदं
भवेत् ॥ धर्माःकालास्तथासर्वेविलीनाःपुरुषोत्तमे॥७०॥यथामरतरंगिण्यानसमाःसकलापगाः॥कल्पवृक्षेणनस
मायथासकलपादपाः ॥ ७१ ॥ चिंतारत्नेनरत्नानिनसमानियथाभुवि॥ कामधेन्वायथाधेन्वोनराज्ञापुरुषाःसमाः॥
॥ ७२ ॥ नवेदैःसर्वशास्त्राणिपुण्यकालास्तथाखिलाः॥ पुरुषोत्तममासेनसमोमासोनकर्हिचित्॥ ७३ ॥पुरुषोत्तम
मासस्यदैवतंपुरुषोत्तमः॥तस्मात्संपूजयेद्भक्त्याश्रद्धयापुरुषोत्तमं॥७४॥शास्त्रज्ञंनिपुणंशुद्धंवैष्णवंसत्यवादिनं॥वि

प्राचार्यमथाहूयपूजांतेनप्रकल्पयेत् ॥ ७५ ॥ संसारसागरमतीवगभीरवेगमंतस्थमोहमदनादितिमिंगिलौघं ॥
उल्लंघ्यगंतुमभिवांछतिभारतेस्मिन्संपूजयेत्सपुरुषोत्तममादिदेवं ॥ ७६ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरु०श्रीना
रायणनारदसंवादेदृढधन्वोपाख्यानेआह्निककथनंनामविंशतितमोऽध्यायः ॥ २० ॥ ॥ ७ ॥ ॥ ७ ॥
वाल्मीकिरुवाच अनलोत्तारणंकृत्वाप्रतिमायास्ततःपरं ॥ प्राणप्रतिष्ठांकुर्वीतत्वन्यथाधातुरेवसा ॥ १ ॥ प्रति
मायाःकपोलौद्वौस्पृष्ट्वादक्षिणपाणिना ॥ प्राणप्रतिष्ठांकुर्वीततस्यांदेवस्यवैहरेः ॥२॥ अकृतायांप्रतिष्ठायांप्राणानां
प्रतिमासुच ॥ यथापूर्वंतथाभागःस्वर्णादीनांनदेवता ॥ ३ ॥ अन्येषामपिदेवानांप्रतिमास्वपिपार्थिव ॥ प्राणप्रति
ष्ठाकर्तव्यातस्यांदेवत्वसिद्धये ॥ ४ ॥ पुरुषोत्तमबीजेनतद्विष्णोरित्यनेनच ॥ तथैवहृदयेंगुष्ठंदत्वाशश्वच्चमंत्रवित् ॥
॥ ५ ॥ एभिर्मंत्रैःप्रतिष्ठांतुहृदयेपिसमाचरेत् ॥ अस्यैप्राणाःप्रतिष्ठंतुअस्यैप्राणाःक्षरंतुच ॥ ६ ॥ अस्यैदेवत्वसंख्यायै
स्वाहेतियजुरीरयन् ॥ मूलमंत्रैरंगमंत्रैर्वैदिकैरित्यनेनच ॥ ७ ॥ प्राणप्रतिष्ठांसर्वत्रप्रतिमासुसमाचरेत् ॥ अथवा
नाममंत्रैश्चचतुर्थ्यंतैःप्रयत्नतः ॥ ८ ॥ स्वाहांतैश्चप्रकुर्वीततत्तद्देवाननुस्मरन् ॥ एवंप्राणान्प्रतिष्ठाप्यध्यायेच्छ्रीपुरुषो
त्तमं ॥ ९ ॥ श्रीवत्सवक्षसंशांतंनीलोत्पलदलच्छविं ॥ त्रिभंगललितंध्यायेत्सराधंपुरुषोत्तमं ॥ १० ॥ देशकालौसमु

हिख्यनियतोवाग्यतःशुचिः॥ षोडशैरुपचारैश्चपूजयेत्पुरुषोत्तमं॥११॥ आगच्छदेवदेवेशश्रीकृष्णपुरुषोत्तम॥रा
धयासहितश्चात्रगृहाणपूजनंमम ॥ १२॥ श्रीराधिकासहितपुरुषोत्तमायनमःआवाहनंसमर्पयामि ॥ इत्यावा
हनं॥ नानारत्नसमायुक्तंकार्तस्वरविभूषितं॥ आसनंदेवदेवेशगृहाणपुरुषोत्तम॥ १३॥ श्रीराधिका० आसनं० गं
गादिसर्वतीर्थेभ्योमयाप्रार्थनयाहृतं ॥ तोयमेतत्सुखस्पर्शंपाद्यार्थंप्रतिगृह्यतां ॥ १४ ॥ इतिपाद्यं॥ नंदगोपगृहे
जातोगोपिकानंदहेतवे ॥ गृहाणार्घ्यंमयादत्तंराधयासहितोहरे॥१५॥ इत्यर्घ्यं॥ गंगाजलंसमानीतंसुवर्णकलश
स्थितं॥ आचम्यतांहृषीकेशपुराणपुरुषोत्तम॥ १६ ॥ इत्याचमनं ॥ कार्यंमेसिद्धिमायातुपूजितेत्वयिधातरि॥ पं
चामृतैर्मयानीतैराधिकासहितोहरे॥ १७॥ इतिस्नानं ॥ पयोदधिघृतंगव्यंमाक्षिकंशर्करातथा ॥ गृहाणेमानिद्र
व्याणिराधिकानंददायक ॥ १८॥ इतिपंचामृतस्नानं॥ योगेश्वरायदेवायगोवर्धनधरायच॥ यज्ञानांपतयेनाथ
गोविंदायनमोनमः॥ १९ ॥ गंगाजलसमंशीतंनदीतीर्थसमुद्भवं ॥ स्नानंदत्तंमयाकृष्णगृह्यतांनंदनंदन॥ २०॥
इतिपुनःस्नानं ॥ पीतांबरयुगंदेवसर्वकामार्थसिद्धये॥ मयानिवेदितंभक्त्यागृहाणसुरसत्तम ॥ २१ ॥ इतिवस्त्रं॥
आचमनं॥ दामोदरनमस्तेस्तुत्राहिमांभवसागरात्॥ ब्रह्मसूत्रंसोत्तरीयंगृहाणपुरुषोत्तम॥ २२॥ उपवीतं॥आच

स्थाप्यकलशंतत्रतीर्थानियोजयेत् ॥ ४७ ॥ गंगागोदावरीचैवकावेरीचसरस्वती ॥ आयांतुममशांत्यर्थंदुरितक्षय
कारणात् ॥ ४८ ॥ ततःसंपूज्यकलशमुपचारैःसमंत्रकैः ॥ गंधाक्षतैश्चनैवेद्यैःपुष्पैस्तत्कालसंभवैः ॥ ४९ ॥ तस्योपरि
न्यसेत्पात्रंताम्रंपीतांबरावृतं ॥तस्योपरिन्यसेद्धैमंराधयासहितंहरिं॥५०॥राधयासहितःकार्यःसौवर्णःपुरुषोत्तमः॥
तस्यपूजाप्रकर्त्तव्याविधिनाभक्तितत्परैः ॥ ५१ ॥ पुरुषोत्तममासस्यदैवतंपुरुषोत्तमः ॥ तस्यपूजाप्रकर्त्तव्यासंप्रा
प्तेपुरुषोत्तमे ॥५२॥संसारसागरेमग्नमुत्तारयतियोध्रुवं ॥ कोनसेवेततंलोकेमर्त्योमरणधर्मवान् ॥ ५३॥ पुनर्ग्रामाः
पुनर्वित्तंपुनःपुत्राःपुनर्गृहं ॥ पुनःशुभाशुभंकर्मनशरीरंपुनःपुनः ॥ ५४ ॥ तद्रक्षितंतुधर्मार्थंधर्मोज्ञानार्थमेवहि ॥
ज्ञानेनसुलभोमोक्षस्तस्माद्धर्मंसमाचरेत् ॥ ५५ ॥ देहरूपस्यवृक्षस्यफलंधर्मःसनातनः॥ धर्महीनस्तुयोदेहोनिष्फ
लोवंध्यवृक्षवत् ॥५६ ॥नमाताचसहायार्थेनकलत्रसुतादयः॥ नपितासोदरावित्तंधर्मस्तिष्ठतिकेवलं ॥ ५७॥ ज
राव्याघ्रीवभयदाव्याधयःशत्रवोयथा ॥ आयुर्यातिप्रतिदिनंभग्नभांडात्पयोयथा ॥ ५८॥ तरंगतरलालक्ष्मीर्यौवनं
कुसुमोपमं ॥ विषयाःस्वप्नविषयाइवसर्वेनिरर्थकाः॥ ५९ ॥ चलंवित्तंचलंचित्तंचलंसंसारजंसुखं ॥ एवंज्ञात्वावि
रक्तःसन्धर्माभ्यासपरोभवेत् ॥ ६० ॥ अर्धग्रस्तोहिनाभेकोमक्षिकामत्तुमिच्छति ॥ कालग्रस्तस्तथाजीवःपरपी

पुरु. इत्याचमनं ॥ इदंफलंमयादेवस्थापितंपुरतस्तव ॥ तेनमेसुफलावाप्तिर्भवेज्जन्मनिजन्मनि ॥३६॥ इतिश्रीफलं ॥गं मा.
३७ धकर्पूरसंयुक्तंकस्तूर्यादिसुवासितं ॥ करोद्वर्तनकंदेवगृहाणपरमेश्वर ॥३७॥ इतिकरोद्वर्तनं ॥ पूगीफलसमायुक्तंस
कर्पूरंमनोहरं ॥ भक्त्यादत्तंमयादेवतांबूलंप्रतिगृह्यतां ॥३८॥ तांबूलं ॥ हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः ॥
अनंतपुण्यफलदमतःशांतिंप्रयच्छमे ॥ ३९ ॥ इतिदक्षिणां ॥ शारदेंदीवरश्यामंत्रिभंगललिताकृतिं ॥ नीराजया
मिदेवेशंराधयासहितंहरिं ॥ ४० ॥ इतिनीराजनं ॥ रक्षरक्षजगन्नाथरक्षत्रैलोक्यनायक ॥ भक्तानुग्रहकर्त्तात्वंप्रद
क्षिणांगृहाणमे ॥ ४१ ॥ इतिप्रदक्षिणां ॥ यज्ञेश्वरायदेवायतथायज्ञोद्भवायच ॥ यज्ञानांपतयेनाथगोविंदायन
मोनमः ॥ ४२ ॥ इतिमंत्रपुष्पं ॥ विश्वेश्वरायविश्वायतथाविश्वोद्भवायच ॥ विश्वस्यपतयेतुभ्यंगोविंदायनमोन
मः ॥४३॥ इतिनमस्कारान् ॥ मंत्रहीनेतिमंत्रेणक्षमाप्यपुरुषोत्तमं ॥स्वाहांतैर्नाममंत्रैश्चतिलहोमोदिनेदिने ॥ ४४ ॥
दीपःकार्यस्त्वखंडश्चयावन्मासंचसर्पिषा ॥ पुरुषोत्तमस्यप्रीत्यर्थंसर्वार्थफलसिद्धये ॥ ४५ ॥ यस्यस्मृत्येतिमंत्रेण
नमस्कृत्यजनार्दनं ॥ यदूनंतत्तुसंपूर्णंविधायविचरेत्सुखं ॥ ४६ ॥ इत्थंश्रीपुरुषोत्तमंनवघनश्यामंसराधंमुदासंप्रा ३७
प्तेपुरुषोत्तमेवनितलेलब्ध्वाजनुर्मानवं ॥ भक्त्यायःपरिपूजयेत्प्रतिदिनंकृत्वागुरुंवैष्णवंभुक्त्वात्यत्रसुखंसमस्तमतु

लंपश्चात्सगच्छेत्परं ॥ ४७ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममाहात्म्येश्रीनारायणनारदसंवादेदृढधन्वोपा
ख्यानेपुरुषोत्तमपूजनविधिर्नामैकाविंशोऽध्यायः ॥ २१ ॥ ॥ ७ ॥ ॥ ७ ॥
राजोवाज पुरुषोत्तमस्यनियमान्व्रतिनोवदविस्तरात् ॥ किंभोज्यंकिमभोज्यंवावर्ज्यावर्ज्यंतपोधन ॥ १ ॥ श्री
नारायणउवाच सएवंभगवान्पृष्टोभूभृतावाल्मिकोमुनिः ॥ पुंसांनिःश्रेयसार्थायतमाहबहुमानयन् ॥ २ ॥ वाल्मी
किरुवाच पुरुषोत्तममासेयेनियमाःपरिकीर्तिताः ॥ तान्शृणुष्वमयाराजन्कथ्यमानान्समासतः ॥ ३ ॥ हविष्या
न्नंचभुंजीतप्रयतःपुरुषोत्तमे ॥ गोधूमाःशालयःसर्वाःसितामुद्गायवास्तिलाः ॥ ४ ॥ कलायकंगुनीवारावास्तुकंहि
लमोचिका ॥ आर्द्रकंकालशाकंचमूलंकंदंचकर्कटीं ॥ ५ ॥ रंभासैंधवसामुद्रेलवणेदधिसर्पिषी ॥ पयोनुद्धृतसारं
चपनसाम्रेहरीतकी ॥ ६ ॥ पिप्पलीजीरकंचैवनागरंचैवतिंतिडी ॥ क्रमुकंलवलीधात्रीफलान्यगुडमैक्षवं ॥ ७ ॥
अतैलपक्वंमुनयोहविष्यंप्रवदंतिच ॥ हविष्यभोजनंनृणामुपवाससमंविदुः ॥ ८ ॥ सर्वामिषाणिमांसंचक्षौद्रंसौ
वीरकंतथा ॥ राजमाषादिकंचैवराजिकामादकंतथा ॥ ९ ॥ द्विदलंतिलतैलंचतथान्नंशल्यदूषितं ॥ भावदुष्टंक्रि
यादुष्टंशब्ददुष्टंचवर्जयेत् ॥ १० ॥ परान्नंचपरद्रोहंपरदारागमंतथा ॥ तीर्थंविनाप्रयाणंचपरदेशंपरित्यजेत् ॥ ११ ॥

देववेदद्विजानांचगुरुगोव्रतिनांतथा ॥ स्त्रीराजमहतांनिंदांवर्जयेत्पुरुषोत्तमे ॥ १२ ॥ प्राण्यंगमामिषंचूर्णंफलेजं
बीरमामिषं ॥ धान्येमसूरिकाप्रोक्ताअन्नंपर्युषितंतथा ॥ १३ ॥ अजागोमहिषीदुग्धादन्यद्दुग्धादिचामिषं ॥ द्विज
क्रीतारसाःसर्वेलवणंभूमिजंतथा ॥ १४ ॥ ताम्रपात्रस्थितंगव्यंजलंचर्मणिसंस्थितं ॥ आत्मार्थंपाचितंचान्नमामि
षंतद्बुधैःस्मृतं ॥ १५ ॥ ब्रह्मचर्यमधःशय्यांपत्रावल्यांचभोजनं ॥ चतुर्थकालेभुक्तिंचप्रकुर्यात्पुरुषोत्तमे ॥ १६ ॥ र
जस्वलांत्यजम्लेच्छपतितैर्व्रात्यकैःसह ॥ द्विजद्विट्वेदबाह्यैश्चनवदेत्पुरुषोत्तमे ॥ १७ ॥ एभिर्दृष्टंचकाकैश्चसूतका
न्नंचयद्भवेत् ॥ द्विःपाचितंचदग्धान्नंनैवाद्यात्पुरुषोत्तमे ॥ १८ ॥ पलांडुलशुनंमुस्तांछत्राकंगृंजनंतथा ॥ नालिकं
मूलकंशिग्रुंवर्जयेत्पुरुषोत्तमे ॥ १९ ॥ एतानिवर्जयेन्नित्यंव्रतीसर्वव्रतेष्वपि ॥ कृच्छ्राद्यंचापिकुर्वीतस्वशक्त्यावि
ष्णुतुष्टये ॥ २० ॥ कूश्मांडंबृहतीचैवतरुणीमूलकंतथा ॥ श्रीफलंचकलिंगंचफलंधात्रीफलंतथा ॥ २१ ॥ नारिकेल
मलाबुंचपटोलंबदरीफलं ॥ चर्मवंताजिकंवल्लीशाकंतुजलजंतथा ॥ २२ ॥ शाकान्येतानिवर्ज्याणिक्रमात्प्रतिपदा
दिषु ॥ धात्रीफलंरवौतद्वद्वर्जयेत्सर्वदागृही ॥ २३ ॥ यद्यद्योवर्जयेत्किंचित्पुरुषोत्तमतुष्टये ॥ तत्पुनर्ब्राह्मणेदत्त्वाभक्ष
येत्सर्वदैवहि ॥ २४ ॥ कुर्यादेतांश्चनियमान्व्रतीकार्तिकमाघयोः ॥ नियमेनविनाराजन्फलंनैवाप्नुयाद्व्रती ॥ २५ ॥

मनं ॥ श्रीखंडंचंदनंदिव्यंगंधाढ्यंसुमनोहरं ॥ विलेपनंसुरश्रेष्ठप्रीत्यर्थंप्रतिगृह्यतां॥२३॥ चंदनं ॥ अक्षतास्तुसुरश्रे
ष्ठकुंकुमाक्ताःसुशोभिताः ॥ मयानिवेदिताभक्त्यागृहाणपुरुषोत्तम ॥ २४ ॥ इत्यक्षतान् ॥ माल्यादीनिसुगंधी
निमालत्यादीनिवैप्रभो ॥ मयाहृतानिपूजार्थंपुष्पाणिप्रतिगृह्यतां ॥ २५ ॥ इतिपुष्पाणि ॥ ततोंगपूजा ॥ नंदात्म
जोयशोदायास्तनयःकेशिसूदनः ॥ भूभारोत्तारकश्चैवत्वनंतोविष्णुरूपधृक् ॥ २६ ॥ प्रद्युम्नश्चानिरुद्धश्चश्रीकंठःस
कलाश्रधृक् ॥ वाचस्पतिःकेशवश्चसर्वात्मेतिचनामतः ॥ २७॥ पादौगुल्फौतथाजानूजघनेचकटीतथा ॥ मेढ्रंना
भिंचहृदयंकंठंबाहूमुखंतथा ॥ २८ ॥ नेत्रेशिरश्चसर्वांगंविश्वरूपिणमर्चयेत् ॥ पुष्पाण्यादायक्रमशश्चतुर्थ्यंतैर्जग
त्पतिं॥२९॥प्रत्यंगपूजांकृत्वातुपुनश्चकेशवादिभिः ॥ चतुर्विंशतिमंत्रैश्चचतुर्थ्यंतैश्चनामभिः ॥ ३० ॥ पुष्पमादाय
प्रत्येकंपूजयेत्पुरुषोत्तमं ॥ ३१ ॥ वनस्पतिरसोदिव्योगंधाढ्योगंधउत्तमः ॥ आघ्रेयःसर्वदेवानांधूपोऽयंप्रतिगृह्य
तां ॥३२॥ इतिधूपं ॥ त्वंज्योतिःसर्वदेवानांतेजसांतेजउत्तमं ॥ आत्मज्योतिःपरंधामदीपोयंप्रतिगृह्यतां ॥ ३३ ॥
इतिदीपं ॥ नैवेद्यंगृह्यतांदेवभक्तिमेत्यचलांकुरु ॥ ईप्सितंमेवरंदेहिपरत्रचपरांगतिं ॥ ३४ ॥ इतिनैवेद्यं ॥ मध्येपा
नीयं ॥ उत्तरापोशनं ॥ गंगाजलंसमानीतंसुवर्णकलशस्थितं ॥ आचम्यतांहृषीकेशत्रैलोक्यव्याधिनाशन ॥ ३५ ॥

पुरुषोत्तमः प्रियतमः पुरुषः स भूत्वा पुरुषोत्तमे न रमते रसिकेश्वरेण ॥ ३९ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तम
माहात्म्येश्रीनारायणनारदसंवादेदृढधन्वोपाख्यानेपुरुषोत्तमव्रतनियमकथनंनामद्वाविंशोऽध्यायः ॥ २२ ॥ ७ ॥
राजोवाच किंफलंदीपदानस्यमासेश्रीपुरुषोत्तमे ॥ तन्मेवदमुनिश्रेष्ठकृपयादीनवत्सल ॥ १ ॥ श्रीनारायणउ
वाच इत्थंविज्ञापितःप्राहवाल्मीकिर्मुनिसत्तमः ॥ प्रवृद्धहर्षोराजानंविनीतंप्रहसन्निव ॥ २ ॥ वाल्मीकिरुवाच
शृणुष्वराजशार्दूलकथांपापप्रणाशिनीं ॥ यांश्रुत्वायातिविलयंपापंपंचविधंमहत् ॥ ३ ॥ सौभाग्यनगरेराजाचित्र
बाहुरितिश्रुतः ॥ सत्यसंधोमहाप्राज्ञश्चासीच्छूरतरःपरः ॥ ४ ॥ सहिष्णुःसर्वधर्मज्ञःशीलरूपदयान्वितः ॥ ब्रह्मण्यो
भगवद्भक्तःकथाश्रवणतत्परः ॥ ५ ॥ स्वदारनिरतःशश्वत्पशुपुत्रसमन्वितः ॥ चतुरंगबलोपेतःसमृद्ध्याधनदोपमः
॥ ६ ॥ तस्यभार्याचंद्रकलाचतुःषष्टिकलान्विता ॥ पतिव्रतामहाभागाभगवद्भक्तिसंयुता ॥ ७ ॥ तयासहमहीपालोबु
भुजेमेदिनींयुवा ॥ विनाश्रीकृष्णदेवंसनैवजानातिदैवतं ॥ ८ ॥ एकस्मिन्दिवसेराजाचित्रबाहुर्महीपतिः ॥ दृष्ट्वा
समागतंदूरादगस्त्यंमुनिपुंगवं ॥ ९ ॥ प्रणम्यदंडवद्भूमौविधिनातमपूजयत् ॥ कल्पयित्वासनंभक्त्यातस्थौमुनि
वराग्रतः ॥ १० ॥ विनयावनतोभूत्वाजगादमुनिसत्तमं ॥ राजोवाच अद्यमेसफलंजन्मत्वद्यमेसफलंदिनं ॥ ११ ॥

अद्यमेसफलंराज्यमद्यमेसफलंगृहं ॥ यस्त्वंसमागतोमेद्यगृहेश्रीकृष्णसेवकः ॥ १२॥ मुक्तोहंपापसंघाताद्यत्त्वयाहं
निरीक्षितः॥ तुभ्यंसमर्पितंराज्यंगजाश्वरथसंयुतं ॥ १३॥ वैष्णवोसिमुनिश्रेष्ठनास्त्यदेयंमयातव ॥ मेरुतुल्यंभवे
त्स्वल्पंवैष्णवायसमर्पितं॥ १४ ॥ कपर्दिकाप्रमाणंतुव्यंजनंवान्नमुत्तमं ॥ नयच्छतिदिनेयस्तुवैष्णवायद्विजन्मने॥
॥ १५॥ तद्दिनंविफलंतस्यकथितंवेदपारगैः ॥ विष्णुभक्ताश्रयेकेचित्सर्वेपूज्याद्विजातयः ॥ १६ ॥ तेषांसंभावना
कार्यावाङ्मनःकायकर्मभिः॥ कथितंममगर्गेणगौतमेनसुमंतुना॥ १७॥ तावत्प्रभाचताराणांयावन्नोदयतेरविः॥
तावदन्येद्विजन्मानोयावन्नायातिवैष्णवः ॥ १८ ॥ अगस्त्यउवाच चित्रबाहोमहाभागधन्यस्त्वंसांप्रतंनृप ॥ इ
माधन्याःप्रजाःसर्वायस्त्वंरक्षसिवैष्णवः॥ १९ ॥ तस्मिन्राष्ट्रेनवस्तव्यंयस्यराजानवैष्णवः॥ वरोवासोवनेशून्येन
तुराष्ट्रेत्ववैष्णवे ॥ २०॥ चक्षुर्हीनोयथादेहःपतिहीनायथाप्रिया ॥ निरक्षरोयथाविप्रस्तथाराष्ट्रमवैष्णवं ॥ २१ ॥ दं
तहीनोयथाहस्तीपक्षहीनोयथाखगः॥ द्वादशीदशमीविद्धातथाराष्ट्रमवैष्णवं॥ २२ ॥ दर्भहीनायथासंध्यातिलही
नंचतर्पणं ॥ वृत्त्यर्थंदेवसेवाचतथाराष्ट्रमवैष्णवं ॥ २३॥सकेशाविधवायद्वद्व्रतंस्नानविवर्जितं ॥ शूद्रश्चब्राह्मणीगा
मीतथाराष्ट्रमवैष्णवं॥ २४ ॥ सराजाप्रोच्यतेसद्भिर्यःश्रीकृष्णपदाश्रयः ॥ तद्राष्ट्रंवर्धतेनित्यंसुखीभवतितत्प्रजा ॥

॥२५॥ दृष्टिर्मेसफलाराजन्यन्मयात्वंनिरीक्षितः॥ अद्यमेसफलावाणीत्वय्यच्युतेयत्त्वयासह॥२६॥इदंराज्यंत्वयारा जन्प्रकर्त्तव्यंममाज्ञया ॥ प्रतिष्ठितोमयाराज्येगमिष्याम्यस्तुस्वस्तिते ॥ २७॥ श्रीनारायणउवाच इत्युक्त्वागंतु कामंतमगस्त्यंमुनिपुंगवं ॥ ननामपरयाभक्त्यामहिषीसापतिव्रता ॥ २८ ॥ अगस्त्यउवाच अवैधव्यंसदाते स्तुभक्त्याभजपतिंशुभे ॥ दृढातेस्तुसदाभक्तिःश्रीगोपीजनवल्लभे ॥ २९ ॥ इत्थमाशीर्ददानंतंभूयःप्राहमहीपतिः॥ बद्धांजलिपुटोभूत्वाविनयानतकंधरः ॥ ३० ॥ चित्रबाहुरुवाच विपुलामेकथंलक्ष्मीःकथंराज्यमकंटकं ॥ पति व्रताकथंपत्नीकिंकृतंसुकृतंमया ॥ ३१ ॥एतन्मेब्रूहिविप्रेंद्रतवाहंशरणंगतः॥ करस्थामलवत्सर्वंजानासित्वंमुनी श्वर ॥ ३२ ॥ श्रीनारायणउवाच इत्थमावेदितोराज्ञाह्यगस्त्योमुनिपुंगवः ॥ समाहितमनाभूत्वाजगादनृपस त्तमं ॥ ३३ ॥ अगस्त्यउवाच मयाविलोकितंसर्वंप्राक्तनंचरितंतव ॥ तत्सर्वंकथयाम्यद्यसेतिहासंपुरातनं ॥ ॥३४॥ चमत्कारपुरेरम्येमणिग्रीवाभिधानभृत् ॥ त्वमभूःशूद्रजातीयोजीवहिंसापरायणः ॥ ३५॥ नास्तिकोदुष्ट चारित्रःपरदारप्रधर्षकः॥ कृतघ्नोदुर्विनीतश्चशिष्टाचारविवर्जितः॥ ३६ ॥ याचेयंभवतोभार्यापूर्वजन्मनिसुंदरी॥ कर्मणामनसावाचापतिसेवापरायणा ॥ ३७॥ पतिव्रतामहाभागाधर्मनिष्ठामनस्विनी ॥ भावंनकुरुतेदुष्टंतवोप

उपोषणेनकर्तव्यःशक्तिश्चेत्पुरुषोत्तमः ॥ अथवाघृतपानंचपयःपानमयाचितं ॥ २६ ॥ फलाहारादिवाकार्यंयथा
शक्त्याव्रतार्थिना ॥ व्रतभंगोयथानस्यात्तथाकार्यंविचक्षणैः ॥ २७ ॥ पुण्येह्निप्रातरुत्थायकृत्वापौर्वाह्णिकीःक्रियाः ॥
गृह्णीयान्नियमंभक्त्याश्रीकृष्णंचहृदिस्मरन् ॥ २८ ॥ उपवासस्यनक्तस्यचैकभुक्तस्यभूपते ॥ एकंचनिश्चयंकृत्वाव्र
तमेतत्समाचरेत् ॥ २९ ॥ श्रीमद्भागवतंभक्त्याश्रोतव्यंपुरुषोत्तमे ॥ तत्पुण्यंवचसावक्तुंविधातापिनशक्नुयात् ॥ ३० ॥
शालिग्रामार्चनंकार्यंमासेश्रीपुरुषोत्तमे ॥ तुलसीदललक्षेणतस्यपुण्यमनंतकं ॥ ३१ ॥ यथोक्तव्रतिनंदृष्ट्वामासेश्री
पुरुषोत्तमे ॥ यमदूताःपलायंतेसिंहंदृष्ट्वायथागजाः ॥ ३२ ॥ एतन्मासव्रतंराजन्श्रेष्ठंक्रतुशतादपि ॥ क्रतुंकृत्वाप्नु
यात्स्वर्गंगोलोकंपुरुषोत्तमे ॥ ३३ ॥ पृथिव्यांयानितीर्थानिक्षेत्राणिसर्वदेवताः ॥ तद्देहेतानितिष्ठंतियःकुर्यात्पुरुषो
त्तमं ॥ ३४ ॥ दुःस्वप्नंचैवदारिद्र्यंदुष्कृतंत्रिविधंचयत् ॥ तत्सर्वंविलयंयातिकृतेश्रीपुरुषोत्तमे ॥ ३५ ॥ पुरुषोत्तमसे
वायांनिश्चलंहरिसेवकं ॥ विघ्नाद्रक्ष्यंतिशक्राद्याःपुरुषोत्तमतुष्टये ॥ ३६ ॥ पुरुषोत्तमस्यव्रतिनोयत्रयत्रवसंतिच ॥
भूतप्रेतपिशाचाद्यानतिष्ठंतितदग्रतः ॥ ३७ ॥ एवंयोविधिनाराजन्कुर्याच्छ्रीपुरुषोत्तमं ॥ सहस्रवदनोनालंतत्फ
लंवक्तुमंजसा ॥ ३८ ॥ श्रीनारायणउवाच पुरुषोत्तमंप्रियममुंपरमादरेणकुर्यादनन्यमनसापुरुषोत्तमोयः ॥

संज्ञस्तदाविप्रउग्रदेवोगतश्रमः ॥ मणिग्रीववचःश्रुत्वासमुत्तस्थौतृषातुरः ॥ ५२ ॥ मणिग्रीवभुजालंबीज
गामसरसीतटं ॥ उपविष्टश्चित्रबाहोतत्तटेवटशोभिते ॥ ५३ ॥ विश्रम्यतत्क्षणंविप्रोवटच्छायामधिश्रितः ॥
स्नात्वानित्यविधिंकृत्वावासुदेवमपूजयत् ॥ ५४ ॥ देवान्पितॄंश्चसंतर्प्यपपौनीरंसुशीतलं ॥ उग्रदेवस्ततःशीघ्रं
वटमूलमुपाश्रितः ॥ ५५ ॥ मणिग्रीवःसपत्नीकोननाममुनिसत्तमं ॥ विनयेनावदद्वाचमातिथ्यंकर्तुमुन्मनाः ॥
॥ ५६ ॥ मणिग्रीवउवाच अस्मत्संतारणायाद्यमदाश्रममुपागतः ॥ ब्रह्मंस्त्वद्दर्शनादेवपापंमेविलयंगतं ॥ ५७ ॥
इत्युक्त्वातंप्रियामाहमणिग्रीवोमुदान्वितः ॥ अयिसुंदरिपक्वानिस्वादूनियानियानिच ॥ ५८ ॥ तानिचूतफलानित्वं
शीघ्रमानयमाचिरं ॥ अन्यत्कंदादियत्किंचित्तदानयशुभानने ॥ ५९ ॥ निजनाथवचःश्रुत्वाफलान्यादायसुंदरी ॥
कंदादिकंचविप्राग्रेस्थापयामासहर्षतः ॥ ६० ॥ मणिग्रीवःपुनर्वाक्यमुवाचमुनिसत्तमं ॥ फलान्यंगीकुरुब्रह्मन्कृ
तार्थीकुरुदंपती ॥ ६१ ॥ उग्रदेवउवाच त्वामहंनैवजानामिकस्त्वंभोकथयस्वमे ॥ अज्ञातस्यनभोक्तव्यंब्राह्म
णेनविजानता ॥ ६२ ॥ मणिग्रीवउवाच शूद्रोहंद्विजशार्दूलमणिग्रीवाभिधानतः ॥ स्वजनैर्ज्ञातिवर्गैश्चपरि
त्यक्तःस्वबांधवैः ॥ ६३ ॥ इत्थंशूद्रवचःश्रुत्वाफलाहारमचीकरत् ॥ उग्रदेवःप्रसन्नात्माततोनीरमपोपिबत् ॥ ६४ ॥

ततोविप्रंसुखासीनंमणिग्रीवोऽवदद्वचः॥ लालयंस्तत्पदांभोजयुगंस्वांकगतंमुहुः ॥ ६५ ॥ मणिग्रीवउवाच क्वगं
तव्यंमुनिश्रेष्ठकुतस्त्वंचेहकानने ॥ निर्जनेनिर्जलेदुष्टैर्हिंस्रजंतुसमाकुले ॥ ६६ ॥ उग्रदेवउवाच ब्राह्मणोऽहं
महाभागप्रयागंगंतुमुत्सहे ॥ अधुनाज्ञातमार्गेणसंप्राप्तोदारुणेवने ॥ ६७ ॥ तत्रश्रांतस्तृषाक्रांतोमुमूर्षुरभवंक्ष
णात् ॥ जीवितंमेत्वयादत्तंब्रूहिकिंतेददाम्यहं ॥ ६८ ॥ अरण्यंकेनदुःखेनदंपतीभ्यांसमाश्रितं ॥ तद्दुःखमपनेष्यामि
मणिग्रीववदस्वमे ॥ ६९ ॥ अगस्त्यउवाच इत्युग्रदेववचनंललितंनिशम्यपत्न्याःसमक्षमनुनीयमुनीश्वरंतं ॥
दारिद्र्यसागरतितीर्षुरसौस्वकीयंवृत्तांतमाहनिजकर्मविपाकमुग्रं ॥ ७० ॥ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्त
ममाहात्म्येश्रीनारायणनारदसंवादेदृढधन्वोपाख्यानेत्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ छ ॥ ॥ छ ॥
मणिग्रीवउवाच चमत्कारपुरेरम्येविद्वज्जनसमाकुले ॥ ममवासोऽभवत्तत्रधर्मपत्न्यासहद्विज ॥ १ ॥ धनाढ्यस्यप
वित्रस्यपरोपकृतिशालिनः ॥ कदाचिद्दैवयोगेनदुर्बुद्धिःसमपद्यत ॥ २ ॥ निजधर्मपरित्यागःकृतोमेदुष्टबुद्धिना ॥
परस्त्रीसेवनंनित्यमपेयंपीयतेस्मह ॥ ३ ॥ चौर्यहिंसापरश्चाहंपरित्यक्तःस्वबंधुभिः॥बृहद्बलेनभूपेनमद्गृहंलुंठितंतदा
॥ ४ ॥ अवशिष्टंचयत्किंचिद्गृहीतंबंधुभिर्धनं ॥एवंतिरस्कृतःसर्वैर्वनवासमचीकरं ॥ ५ ॥ कृत्वाजीववधंनित्यंजी

वेयंभार्ययासह ॥ एतास्मिन्विपिनेघोरेवसतोमेदुरात्मनः ॥ ६ ॥ कुरुष्वानुग्रहंब्रह्मन्पापयुक्तस्यसांप्रतं ॥ प्राचीन
पुण्यपुंजेनसंप्राप्तोगहनेभवान् ॥ ७॥ तवाहंशरणंयातःसपत्नीकोमहामुने ॥ उपदेशप्रसादेनकृतार्थींकर्तुमर्हसि ॥
॥ ८ ॥ येनमेतीव्रदारिद्र्यंविलयंयातितत्क्षणात् ॥ अतुलंवैभवंलब्ध्वाविचरामियथासुखं ॥ ९ ॥ उग्रदेवउवाच कृ
तार्थोसिमहाभागयदातिथ्यंकृतंमम ॥ अतस्तेभाविकल्याणंसपत्नीकस्यसांप्रतं ॥ १० ॥ विनाव्रतैर्विनातीर्थैर्वि
नादानैरयत्नतः ॥ दारिद्र्यंतेलयंयातितथानिर्धारितंमया ॥ ११ ॥ अतःपरंतृतीयोस्तिमासःश्रीपुरुषोत्तमः ॥ भवद्भ्यां
तत्रविधिनादंपतीभ्यांप्रयत्नतः ॥ १२ ॥ कर्तव्यंदीपदानंचपुरुषोत्तमतुष्टये ॥ तेनतेतीव्रदारिद्र्यंसमूलंनाशमेष्यति ॥
॥ १३ ॥ तिलतैलेनकर्तव्यःसर्पिषावैभवेसति ॥ तयोर्मध्येनकिंचित्तेकाननेवसतोऽधुना ॥ १४ ॥ इंगुदीजेनतैलेनदी
पःकार्यस्त्वयानघ ॥ यावन्मासंसनियमंमणिग्रीवस्त्रियासह ॥ १५ ॥ अस्मिन्सरोवरेस्नात्वासहपत्न्यानिरंतरं॥एव
मेवहिकर्तव्यंमासमात्रंत्वयावने ॥ १६ ॥ अयमेवोपदेशस्तुसपत्नीकायमेकृतः ॥ त्वदातिथ्यप्रसन्नेनमयानिगम
निश्चितं ॥ १७ ॥ अन्यथादीपदानंहिरमावृद्धिकरंनृणां ॥ विधिनाक्रियमाणंचेत्किंपुनःपुरुषोत्तमे ॥ १८ ॥ वेदोक्ता
निचकर्माणिदानानिविविधानिच ॥ पुरुषोत्तमदीपस्यकलांनार्हंतिषोडशीं ॥ १९ ॥ तीर्थानिसकलान्येवशास्त्राणि

रिकदाचन ॥ ३८ ॥ ज्ञातिभिस्त्वंपरित्यक्तोबंधुभिःपापकर्मकृत् ॥ राज्ञाक्रुद्धेनतेसर्वंगृहीतंधनमुत्तमं ॥ ३९ ॥ ततो
ऽवशिष्टंयत्किंचिद्गृहीतंज्ञातिभिस्तदा ॥ गतेद्रव्येधनाकांक्षातवासीद्विपुलातदा ॥ ४० ॥ क्षीयमाणेधनेसाध्वीनत्वा
मत्यजदुन्मनाः ॥ एवंतिरस्कृतःसर्वैर्गतवान्निर्जनंवनं ॥ ४१ ॥ हत्वाजीवाननेकांश्चत्वंचकर्थात्मपोषणं ॥ एवंवर्त
यतस्तस्यपत्न्यासहमहीपते ॥ ४२ ॥ एकदाधनुरुद्यम्यमणिग्रीवोवनंगतः ॥ बहुव्यालमृगाकीर्णंमृगमांसजिघृक्ष
या ॥ ४३ ॥ तस्मिन्निर्मानुषेरण्येमध्येमार्गेमहामुनिः ॥ उग्रदेवइतिख्यातोदिङ्मूढोविह्वलोभवत् ॥ ४४ ॥ तृषासं
पीडितोत्यर्थंमध्यंदिनगतेरवौ ॥ तत्रैवपतितोराजन्मुमूर्षुरभवत्तदा ॥ ४५ ॥ तंदृष्ट्वातेदयाजातादिग्भ्रष्टंदुःखितंद्वि
जं ॥ उत्थाप्यतंद्विजन्मानंगृहीत्वास्वाश्रमंगतः ॥ ४६ ॥ दंपतिभ्यांकृतासेवादुःखितस्यद्विजन्मनः ॥ उग्रदेवोमहा
योगीमुहूर्तानंतरंतदा ॥ ४७ ॥ अवाप्यचेतनांतत्रविस्मयंसमजीगमत् ॥ तत्रस्थोहंकुतश्चात्रकेनानीतोवनांतरं
॥ ४८ ॥ श्रीनारायणउवाच मणिग्रीवोवदद्विप्रंरमणीयमिदंसरः ॥ अत्रास्तेशीतलंवारिपद्मिनीपुष्पवा
सितं ॥ ४९ ॥ तत्रस्नात्वाजलेशीतेकृत्वापौर्वाह्णिकीःक्रियाः ॥ कुरुब्रह्मन्फलाहारंपिबवारिसुशीतलं ॥ ५० ॥
सुखेनकुरुविश्रामंमयासंरक्षितोऽधुना ॥ उत्तिष्ठत्वंमुनिश्रेष्ठप्रसादंकर्तुमर्हसि ॥ ५१ ॥ ॥ अगस्त्यउवाच लब्ध

तुर्नत्वा दंपती हृष्टमानसौ ॥ ३४ ॥ आसाद्य स्वाश्रमं भक्त्या पुरुषोत्तममानसौ ॥ नित्यतुर्मासयुगलं द्विजभक्तिपरायणौ
॥ ३५ ॥ गते मासद्वये श्रीमानागतः पुरुषोत्तमः ॥ तौ तस्मिंश्चक्रतुर्दीपं गुरुभक्तिपरायणौ ॥ ३६ ॥ इंगुदीजेन तैले
न वै भवार्थमतंद्रितौ ॥ एवं तयोः कृतवतोर्जगाम पुरुषोत्तमः ॥ ३७ ॥ उग्रदेवप्रसादेन विनिर्धूतमनोमलौ ॥ कालस्य
वशमापन्नौ पुरंदरपुरीं गतौ ॥ ३८ ॥ तत्रत्यं भोगमासाद्य पृथिव्यां भारताजिरे ॥ उग्रदेवप्रसादेन वरं जनुरवापतुः ॥
॥ ३९ ॥ वीरबाहुसुतस्त्वं च चित्रबाहुरिति श्रुतः ॥ पूर्वस्मिन्योमणिग्रीवो मृगहिंसापरायणः ॥ ४० ॥ इयं चंद्रकला
नाम्नी महिषी याधुनातव ॥ सुंदरीति समाख्याता पुनर्जनुषि तेऽगना ॥ ४१ ॥ पातिव्रत्येन धर्मेण तवार्धांगार्धहारिणी ॥
पतिव्रता हि या नारी पतिपुण्यार्धभागिनी ॥ ४२ ॥ कृतेन दीपदानेन मासे श्रीपुरुषोत्तमे ॥ इंगुदीजेन तैलेन तव राज्य
मकंटकं ॥ ४३ ॥ किं पुनः सर्पिषा दीपं तिलतैलेन वा पुनः ॥ यः करोति त्वखंडं वै मासे श्रीपुरुषोत्तमे ॥ ४४ ॥ पुरुषोत्तम
दीपस्य फलमेतन्न संशयः ॥ किं पुनश्चोपवासाद्यैश्चरतः पुरुषोत्तमं ॥ ४५ ॥ वाल्मीकिरुवाच चित्रबाहुचरितं पु
रातनं सन्निरूप्य कलशोद्भवो मुनिः ॥ सत्कृतिं समधिगम्य तत्कृतामक्षयाशिषमुदीर्य निर्ययौ ॥ ४६ ॥ ॥ इति

श्रीबृहन्नारदीयपुराणेपुरुषोत्तममाहात्म्येश्रीनारायणनारदसंवादेदृढधन्वोपाख्यानेदीपमाहात्म्यकथनंनामचतु
र्विंशोऽध्यायः ॥ २४ ॥ ॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥
दृढधन्वोवाच अथसम्यग्वदब्रह्मन्नुद्यापनविधिंमुने ॥ पुरुषोत्तममासीयव्रतिनांकृपयानृणां ॥ १ ॥ वाल्मीकिरुवाच
समासतःप्रवक्ष्यामिमासेश्रीपुरुषोत्तमे ॥ उद्यापनविधिंसम्यग्व्रतसंपूर्णहेतवे ॥ २ ॥ कृष्णपक्षेचतुर्दश्यांनवम्यांपुरु
षोत्तमे ॥ अष्टम्यांवाथकर्तव्यमुद्यापनमुदीरितं ॥ ३ ॥ यथालब्धोपहारेणमासेश्रीपुरुषोत्तमे ॥ पुण्येस्मिन्प्रातरुत्थाय
कृत्वापौर्वाह्निकीःक्रियाः ॥ ४ ॥ समाहितमनाभूत्वात्रिंशद्विप्रान्निमंत्रयेत् ॥ सपत्नीकान्सदाचारान्विष्णुभक्तिपरा
यणान् ॥ ५ ॥ यथाशक्त्याथवासप्तपंचवित्तानुसारतः ॥ ततोमध्याह्नसमयेद्रोणमानेनभूपते ॥ ६ ॥ तदर्धेनतदर्धेननि
जशक्त्यनुसारतः ॥ पंचधान्येनकुर्वीतसर्वतोभद्रमुत्तमं ॥ ७ ॥ चत्वारःकलशाःस्थाप्याहैमावाराजताःशुभाः ॥ ताम्रा
वाम्मृन्मयाःशुद्धाअव्रणामंडलोपरि ॥ ८ ॥ चतुर्दिक्षुचतुर्व्यूहप्रीतयेश्रीफलान्विताः ॥ सद्वस्त्रवेष्टितानागवल्लीदलस
मन्विताः ॥ ९ ॥ वासुदेवंहलधरंप्रद्युम्नंदेवमुत्तमं ॥ अनिरुद्धंचतुर्थंवस्थापयेत्कलशेषुच ॥ १० ॥ पुरुषोत्तमव्रतारं
भेस्थापितंपुरुषोत्तमं ॥ सराधंदेवदेवेशंकलशेनसमन्वितं ॥ ११ ॥ ततआनीयतन्मध्येमंडलोपरिविन्यसेत् ॥ आ

चार्यंवैष्णवंकृत्वावेदवेदांगपारगं ॥ १२ ॥ विप्राश्चत्वारएवात्रवरणीयाजपार्थिना ॥ द्वेद्वेवस्त्रेचदातव्येहस्तमुद्रादि
संयुते ॥ १३ ॥ आचार्यंसमलंकृत्यवस्त्रभूषादिभिर्मुदा ॥ ततोदेहविशुद्ध्यर्थंप्रायश्चित्तंसमाचरेत् ॥ १४ ॥ ततःपूर्वो
क्तविधिनापूजाकार्यासहस्त्रिया ॥ चतुर्व्यूहजपःकार्योवृतैर्विप्रैश्चतुर्विधः ॥ १५ ॥ चतुर्दिक्षुप्रकर्तव्यादीपाश्चत्वा
रउद्धृताः ॥ अर्घ्यदानंततःकार्यंनारिकेलादिभिःक्रमात् ॥ १६ ॥ पंचरत्नसमायुक्तैर्जानुभ्यांसक्तभूतलः ॥ स्वपाणिपुट
मध्यस्थैर्यथालब्धैःफलैःशुभैः ॥ १७ ॥ श्रद्धाभक्तिसमायुक्तःसपत्नीकोमुदान्वितः ॥ अर्घ्यंदद्यात्प्रहृष्टेनमनसाश्रीह
रिंस्मरन् ॥ १८ ॥ अर्घ्यमंत्रः ॥ देवदेवनमस्तुभ्यंपुराणपुरुषोत्तम ॥ गृहाणार्घ्यंमयादत्तंराधयासहितोहरे ॥ १९ ॥ वं
देनवघनश्यामंद्विभुजंमुरलीधरं ॥ पीतांबरधरंदेवंसराधंपुरुषोत्तमं ॥ २० ॥ एवंभक्त्याहरिंनत्वासराधंपुरुषोत्तमं ॥
चतुर्थ्यंतैर्नाममंत्रैस्तिलहोमंचकारयेत् ॥ २१ ॥ ततस्तदंतेतन्मंत्रैःकार्यंतर्पणमार्जने ॥ नीराजयेत्ततोदेवंसराधंपुरुषो
त्तमं ॥ २२ ॥ अथनीराजनमंत्रः ॥ नीराजयामिदेवेशमिंदीवरदलच्छविं ॥ राधिकारमणंप्रेम्णाकोटिकंदर्पसुंदरं ॥
॥ २३ ॥ अथध्यानं ॥ अंतर्ज्योतिरनंतरत्नरचितेसिंहासनेसंस्थितंवंशीनादविमोहितव्रजवधूवृंदावनेसुंदरं ॥ ध्याये
द्राधिकयासकौस्तुभमणिप्रद्योतितोरस्थलंराजद्रत्नकिरीटकुंडलधरंप्रत्यग्रपीतांबरं ॥ २४ ॥ ततःपुष्पांजलिंदत्वारा

सकलानिच ॥ पुरुषोत्तमदीपस्यकलांनार्हंतिषोडशीं ॥ २० ॥ योगोज्ञानंतथासांख्यंतंत्राणिसकलान्यपि ॥ पुरुषो
त्तमदीपस्यकलांनार्हंतिषोडशीं ॥ २१ ॥ कृच्छ्रचांद्रायणादीनिव्रतानिनिखिलानिच ॥ पुरुषोत्तमदीपस्यकलांना
र्हंतिषोडशीं ॥ २२ ॥ वेदाभ्यासोगयाश्राद्धंगोमतीतटसेवनं ॥ पुरुषोत्तमदीपस्य० ॥ २३ ॥ उपरागसहस्राणिव्यती
पातशतानिच ॥ पुरुषोत्तम० ॥ २४ ॥ कुर्वादिक्षेत्रवर्याणिदंडकादिवनानिच ॥ पुरुषोत्तम० ॥ २५ ॥ एतद्गुह्यतमं
वत्सनाख्येयंयस्यकस्यचित् ॥ धनधान्यपशुव्रातपुत्रपौत्रयशस्करं ॥ २६ ॥ वंध्यावंध्यत्वशमनमवैधव्यकरंस्त्रियाः ॥
राज्यदंराज्यभ्रष्टस्यचिंतितार्थकरंनृणाम् ॥ २७ ॥ कन्याविंदेतभर्त्तारंगुणिनंचिरजीविनम् ॥ कांतार्थीलभतेकांतांसु
शीलांचपतिव्रताम् ॥ २८ ॥ विद्यार्थीलभतेविद्यांसुसिद्धिंसिद्धिकामुकः ॥ कोशकामोलभेत्कोशंमोक्षार्थीमोक्ष
माप्नुयात् ॥ २९ ॥ विनाविधिंविनाशास्त्रंयःकुर्यात्पुरुषोत्तमे ॥ दीपंतुयत्रकुत्रापिकामितंसर्वमाप्नुयात् ॥ ३० ॥
किंपुनर्विधिनावत्सदीपंकुर्यात्प्रयत्नतः ॥ तस्माद्दीपःप्रकर्त्तव्योमासेश्रीपुरुषोत्तमे ॥ ३१ ॥ एतदुक्तंमयातेद्यतीव्रदा
रिद्र्यनाशनं ॥ स्वस्तितेस्तुगमिष्यामिसंतुष्टःसेवयातव ॥ ३२ ॥ अगस्त्यउवाच इत्युक्त्वाविप्रवर्योसौप्रयागं
संजगामह ॥ द्विभुजंमुरलीहस्तंमनसाश्रीहरिंस्मरन् ॥ ३३ ॥ अनुगत्वोग्रदेवंतंकियन्मासंनिजाश्रमात् ॥ पुनरावव्र

तेनरः॥ ३९॥ततःप्रयातिगोलोकंनिर्गुणंयोगिदुर्लभं॥यद्गत्वाननिवर्ततेज्योतिर्धामसनातनं॥४०॥ सार्धप्रस्थद्वयंकां
स्यसंपुटंपरिकीर्तितं॥निर्धनेनयथाशक्त्याकार्याणिव्रतपूर्तये॥४१॥अथवापूपसामग्रीमपक्वांसफलांपरां॥तत्राधा
यप्रदेयानिपुरुषोत्तमप्रीतये ॥ ४२॥ निमंत्रितानांविप्राणांसस्त्रीकाणांनराधिप॥संकल्पंचप्रकुर्वीतपुरुषोत्तमसन्नि
धौ॥४३॥अथप्रार्थना श्रीकृष्णजगदाधारजगदानंददायक॥ऐहिकामुष्मिकान्कामान्निखिलान्पूरयाशुमे॥४४॥
इतिसंप्रार्थ्यगोविंदंभोजयेद्ब्राह्मणान्मुदा॥ सपत्नीकान्सदाचारान्संस्मरन्पुरुषोत्तमं॥ ४५॥ संपूज्यविधिवद्भक्त्या
भोजयेद्घृतपायसैः॥विप्ररूपंहरिंस्मृत्वास्त्रीरूपांराधिकांस्मरन्॥ ४६ ॥ भोजनस्यतुसंकल्पमाचरेद्विधिनाव्रती॥द्रा
क्षाभिःकदलीभिश्चचूतैश्चविविधैरपि ॥ ४७ ॥ घृतपाचितपक्वान्नैःशुभैश्चमाषकैर्वटैः ॥ शर्कराघृतपूरैश्चफाणितैः
खंडमंडकैः॥४८॥ऊर्वारुककर्कटीशाकैरार्द्रकैश्चसुनिंबुकैः॥ अन्यैश्चविविधैःशाकैराम्रैःपक्वैःपृथक्पृथक्॥ ४९ ॥ च
तुर्धाभोजनैरेवषड्रसैःसहसंगतैः॥ वासितान्गोरसांस्तत्रपरिवेष्यमृदुब्रुवन्॥५०॥ इदंस्वादुमुदाभोज्यंभवदर्थंप्र
कल्पितं ॥याच्यतांरोचतेब्रह्मन्यन्मयापाचितंप्रभो॥ ५१॥ धन्योस्म्यनुगृहीतोस्मिजातंमेजन्मसार्थकं ॥ भोजयि
त्वामुदाविप्रान्देयास्तांबूलदक्षिणाः॥५२॥ एलालवंगकर्पूरनागवल्लीदलानिच ॥ कस्तूरीमुरमांसीचचूर्णंचखदि

रंशुभं ॥ ५३ ॥ एतैश्वमीलितैर्देयंतांबूलंभगवत्प्रियं ॥ तस्माद्देवंविधायैवदेयंतांबूलमादरात् ॥ ५४ ॥ तांबूलंयोद्वि
जाग्र्यायएवंकृत्वाप्रयच्छति॥सुभगश्चभवेदत्रपरत्रामृतभुग्भवेत् ॥५५॥ परितोष्यसपत्नीकान्हस्तेदद्याच्चमोदका
न् ॥ पत्नीभ्योवैणवीर्दद्यादलंकृत्यविधानतः ॥ ५६ ॥ आसीमांतमनुव्रज्यब्राह्मणांस्तान्विसर्जयेत् ॥ मंत्रहीनेतिमंत्रे
णक्षमाप्यपुरुषोत्तमं ॥ ५७ ॥ यस्यस्मृत्येतिमंत्रेणनमस्कृत्यजनार्दनं॥यदूनंतत्तुसंपूर्णंविधायविचरेत्सुखं ॥ ५८॥
अन्नंविभज्यभूतेभ्योयथाभागमकुत्सयन् ॥ भुंजीतस्वजनैःसार्धमिथ्यावादविवर्जितः ॥ ५९ ॥ दर्शस्यदिवसेप्राप्ते
कुर्याज्जागरणंनिशि॥राधिकासहितंहैमंपूजयेत्पुरुषोत्तमं ॥ ६० ॥ पूजांतेचनमस्कृत्यसपत्नीकोमुदान्वितः ॥ व्रती
विसर्जयेद्देवंसराधंपुरुषोत्तमं ॥६१॥ आचार्यायततोदद्यादुपहारंसमूर्तिकं॥अन्नदानंयथायोग्यंदद्यादिच्छानुसा
रतः॥६२ ॥ येनकेनाप्युपायेनव्रतमेतत्समाचरेत् ॥ कुर्याच्चपरयाभक्त्यादानंवित्तानुसारतः ॥ ६३ ॥ नारीवाथनरो
वापिव्रतमेतत्समाचरेत् ॥ दुःखदारिद्र्यदौर्भाग्यंनाप्नुयाज्जन्मजन्मनि ॥ ६४ ॥ येकुर्वंतिजनालोकेनानापूर्णमनोर
थाः ॥ विमानान्यधिरुह्यैवयांतिवैकुंठमुत्तमं ॥ ६५ ॥ श्रीनारायणउवाच इत्थंयोविधिमवलंब्यचर्करीतिश्री
कृष्णप्रियतममासमादरेण ॥ गोलोकंव्रजतिविधूयपापराशिंचात्रत्यंसुखमनुभूयपूर्वपुंभिः ॥ ६६ ॥ इतिश्रीबृह

न्नारदीयपुराणेनारायणनारदसंवादेदृढधन्वोपाख्यानेव्रतोद्यापनविधिकथनंनामपंचविंशोऽध्यायः॥ २५॥७॥
अथोद्यापनानंतरंव्रतनियममोक्षणमुच्यते ॥ वाल्मीकिरुवाच अशेषपापनाशार्थंप्रीतयेगरुडध्वजे ॥ गृहीत
नियमत्यागश्चोच्यतेविधिपूर्वकः॥ १॥ नक्तभोजीनरोराजन्ब्राह्मणान्भोजयेदथ॥ अयाचितेव्रतेचैवस्वर्णदानंस
माचरेत्॥ २ ॥अमावास्याशनौयस्तुप्रदद्याद्गांसदक्षिणां॥ धात्रीस्नानंनरोयस्तुदधिवाक्षीरमेवच॥ ३॥ फलानां
नियमेराजन्फलदानंसमाचरेत्॥ तैलस्थानेघृतंदेयंघृतस्थानेपयस्तथा ॥४॥ धान्यानांनियमेराजन्गोधूमान्शा
लितंडुलान्॥ भूमौचशयनेराजन्सतूलींसपरिच्छदां॥ ५॥ सुखदांचात्मनोन्यस्यत्व्यंतर्यामीप्रियोजनः॥ पत्रभो
जीनरोयस्तुभोजनंघृतशर्करां ॥ ३॥ मौनेघंटांतिलांश्चैवसहिरण्यान्प्रदापयेत् ॥ दंपत्योर्भोजनंचैवसस्नेहंचसुशो
भनं॥ ७॥ नखकेशधरोराजन्नादर्शंदापयेद्बुधः॥ उपानहौप्रदातव्येउपानहविवर्जनात्॥ ८॥ लवणस्यपरित्यागे
दातव्याविविधारसाः॥दीपदानेनरोदद्यात्पात्रयुक्तंचदीपकं॥ ९॥ अधिमासेनरोभक्त्यासवैकुंठेवसेत्सदा॥दीपंच
सघृतंताम्रंकांचनीवर्तिसंयुतं॥ १० ॥ फलमात्रंप्रदेयंस्याद्व्रतसंपूर्णहेतवे॥एकांतरोपवासेनकुंभानष्टौप्रदापयेत् ॥
॥ ११ ॥ सवस्त्रान्कांचनोपेतान्मृन्मयानथकांचनान्॥मासांतेमोदकांस्त्रिंशच्छत्रोपानहसंयुतान्॥ १२ ॥ अनड्वां

धिकासहितेहरौ ॥ नमस्कारंप्रकुर्वीतसाष्टांगंगृहिणीयुतः ॥ २५ ॥ नौमिनवघनश्यामंपीतवाससमच्युतं ॥ श्रीवत्स
भासितोरस्कंराधिकासहितंहरिं॥ २६ ॥पूर्णपात्रंततोदद्याद्ब्राह्मणेसहिरण्यकं॥आचार्यायततोदद्याद्दक्षिणांविपुलां
मुदा॥ २७॥आचार्यंतोषयेद्भक्त्यावस्त्रैराभरणैरपि॥सपत्नीकंततोदद्याद्दत्विग्भ्योदक्षिणांपरां॥ २८॥धेनुरेकाप्रदात
व्यासुशीलाचपयस्विनी॥सचैलाचसवत्साचघंटाभरणभूषिता ॥ २९॥ताम्रपृष्ठीहेमशृंगीसरौप्यखुरभूषिता॥घृत
पात्रंततोदद्यात्तिलपात्रंतथैवच ॥ ३० ॥उमामहेश्वरंदद्याद्दंपत्योःपरिधायकं ॥ पदमष्टविधंदद्यादुपानद्युगलंतथा
॥३१॥श्रीमद्भागवतंदद्याद्वैष्णवायद्विजन्मने ॥शक्तिश्चेन्नविलंबेतचलमायुर्विचारयन्॥३२॥श्रीमद्भागवतंसाक्षा
द्भगवद्रूपमद्भुतं॥ योदद्याद्वैष्णवायैवपंडितायद्विजन्मने॥३३॥सकोटिकुलमुद्धृत्यत्स्यप्सरोगणसेवितः ॥ विमानम
धिरुह्यैतिगोलोकंयोगिदुर्लभं॥३४॥कन्यादानसहस्राणिवाजपेयशतानिच॥सधान्यक्षेत्रदानानितुलादानानिया
निच॥३५॥ महादानानियान्यष्टौछंदोदानानियानिच ॥ श्रीभागवतदानस्यकलांनार्हंतिषोडशीं॥३६॥तस्माद्यत्ने
नतद्देयंवैष्णवायद्विजन्मने॥संभूष्यवस्त्रभूषाभिर्हैमसिंहासनस्थितं ॥३७॥ कांस्यानिसंपुटान्येवत्रिंशद्देयानिसर्वथा
॥त्रिंशत्त्रिंशदपूपैश्चमध्येसंपूरितानिच ॥३८॥ प्रत्यपूपंतुयावंतिछिद्राणिपृथिवीपते ॥ तावद्वर्षसहस्राणिवैकुंठेवस

मिः ॥ २६ ॥ पवित्राःपरमादर्भादर्भहीनाव्यथाक्रियाः ॥ दर्भमूलेवसेद्ब्रह्मामध्येदेवोजनार्दनः ॥ २७॥ दर्भाग्रेतुद्यु
मानाथस्तस्माद्दर्भेणमार्जयेत् ॥ नदर्भानुद्धरेच्छूद्रोनपिबेत्कपिलापयः ॥ २८॥ मध्यपत्रेनभुंजीतब्रह्मपत्रस्यभूपते॥
नोच्चरेत्प्रणवंमंत्रंपुरोडाशंनभक्षयेत् ॥ २९ ॥ नासनंनोपवीतंचनाचरेद्वैदिकींक्रियां॥ निर्विंध्याचरणंकुर्वन्पितृ
भिःसहमज्जति ॥ ३०॥ पतंतिनरकेघोरेयावदिंद्राश्चतुर्दश ॥ पश्चाच्चकौकुटींयोनिंसूकरींवानरींचवा ॥ ३१ ॥ एत
स्मात्कारणाच्छूद्रःप्रणवंवर्जयेत्सदा ॥ नमस्कारेणविप्राणांशूद्रोनश्यतिभूमिप ॥ ३२ ॥ एतत्कृत्वामहाराजपरिपू
र्णंव्रतंचरेत् ॥ अदत्वादक्षिणांवापिनरकंयांतिवैनराः ॥ ३३ ॥ व्रतवैकल्यमासाद्यत्वंधःकुष्ठीप्रजायते ॥ ३४ ॥ धरा
[illegible]णांवचनैर्नरोत्तमादिवौकसांवैपदमाप्नुवंति ॥ नोल्लंघयेद्भूपवचांसितेषांश्रेयोभिकामीमनुजःसविद्वान् ॥३५॥
इदंमयाधर्मरहस्यमुत्तमंश्रेयस्करंपापविमर्दनंच ॥ फलप्रदंमाधवतुष्टिहेतोःपठेच्चनित्यंमनसोभिरामं ॥ ३६ ॥ यः
शृणोतिनरोराजन्पठतेवापिसर्वदा ॥ सयातिपरमंलोकंयत्रयोगीश्वरोहरिः ॥ ३७॥ इतिश्रीबृहन्नारदीयपुराणे
पुरुषोत्तममाहात्म्येश्रीनारायणनारदसंवादेगृहीतनियमत्यागोनामषड्विंशोऽध्यायः॥ २६ ॥ ॥ छ ॥ श्री
नारायणउवाच ॥ इत्युक्त्वाविरतंराजामुनीश्वरमनीनमत्॥अपूजयत्ततोभक्त्यासपत्नीकोमुदान्वितः ॥ १ ॥उररीकृ

त्यतत्पूजामाशीर्वादमुदीरयत्॥स्वस्तितेस्तुगमिष्यामिसरयूंपापनाशिनीं॥ २॥ आवयोर्वदतोरेवंसायंकालोऽधुना
भवत्॥इत्युक्त्वाशुजगामैववाल्मीकिर्मुनिसत्तमः॥ ३॥आसीमांतमनुव्रज्यराजाप्यागतवान्गृहं॥आगत्यस्वप्रिया
माहसुंदरींगुणसुंदरीं॥४॥ दृढधन्वोवाच अयिसुंदरिसंसारेत्वसारेकिंसुखंनृणां॥ रागद्वेषादिषट्शत्रौगंधर्वनगरो
[illegible]मे॥५॥कृमिविड्भस्मसंज्ञांतेदेहमेकिंप्रयोजनं॥ वातपित्तकफोद्रेकमलमूत्रासृगाकुले॥६॥अध्रुवेणशरीरेणध्रु
[illegible]र्जयितुंवने॥ गमिष्यामिवरारोहेसंस्मरन्पुरुषोत्तमं॥७॥ तदाकर्ण्यप्रियाप्राहसाध्वीसागुणसुंदरी॥ विनयाव
नताभूत्वाबद्धांजलिपुटाशुचा॥८॥ गुणसुंदर्युवाच अहमप्यागमिष्यामित्वयैवसहभूपते॥ पतिव्रतानांस्त्रीणांतुप
तिरेवहिदैवतं॥९॥ पत्यौगतेतुयानारीगृहेतिष्ठतिसौनवे॥ स्नुषाधीनातुसानारीशुनीवपरवेश्मनि॥१०॥मितंपिता
ददात्येवमितंभ्रातामितंसुतः॥ अमितस्यप्रदातारंभर्तारंकानुनव्रजेत्॥ ११॥ प्रियावाक्यमुरीकृत्यसुतंराज्येभिषि
च्यच॥सहपत्न्याययौशीघ्रमरण्यंमुनिसेवितं॥ १२॥ हिमाचलसमीपेचगंगामासाद्यदंपती॥ त्रिकालंचक्रतुःस्ना
नंसंप्राप्तेपुरुषोत्तमे॥ १३॥ पुरुषोत्तमंसमासाद्यविधिनातत्रनारद॥ तपस्तेपेसपत्नीकःसंस्मरन्पुरुषोत्तमं॥१४॥
ऊर्ध्वबाहुर्निरालंबःपादांगुष्ठेनसंस्थितः॥ नभोदृष्टिर्निराहारःश्रीकृष्णंतमजीजपत्॥ १५॥ एवंव्रतविधौतस्यतस्थु

षश्चतपोनिधेः ॥ सेवाविधौप्रपन्नासीन्महिषीसापतिव्रता ॥ १६ ॥ एवंकृतव्रतस्तस्यसंपूर्णेपुरुषोत्तमे ॥ बिमानमा
गमत्तत्रकिंकिणीजालमंडितं ॥ १७ ॥ पुण्यशीलसुशीलाभ्यांसेवितंसहसागतं ॥ तद्दृष्ट्वाविस्मयाविष्टःसपत्नीकोम
हीपतिः ॥ १८ ॥ अनीनमद्विमानस्थौपुण्यशीलसुशीलकौ ॥ ततस्तौतंसपत्नीकंविमानंनिन्यतुर्नृपं ॥ १९ ॥ विमा
नमधिरुह्याथसपत्नीकोनराधिपः ॥ गोलोकंगतवान्शीघ्रंदिव्यंधृत्वावपुर्नवं ॥ २० ॥ एवंदृष्ट्वातपोराजामासेश्री
पुरुषोत्तमे ॥ निर्भयंलोकमासाद्यमुमोदहरिसन्निधौ ॥ २१ ॥ पतिव्रताचतत्पत्नीसापितल्लोकमाययौ ॥ पुरुषोत्तमे
तपस्यंतंसंसेव्यनिजवल्लभं ॥ २२ ॥ श्रीनारायणउवाच वर्णयामिकिमद्याहंयदेकरसनामम ॥ पुरुषोत्तमसमं
[illegible]न्नास्तिनारदभूतले ॥ २३ ॥ सहस्रजन्मतप्तेनतपसातन्नगम्यते ॥ यत्फलंगम्यतेपुंभिःपुरुषोत्तमसेवनात् ॥
॥ २४ ॥ व्याजतोपिकृतेतस्मिन्मासेश्रीपुरुषोत्तमे ॥ उपवासेनदानेनस्नानेनचजपादिना ॥ २५ ॥ कोटिजन्मकृता
नेकपापराशिर्लयंव्रजेत् ॥ यथाशाखामृगस्याशुत्रिरात्रस्नानमात्रतः ॥ २६ ॥ आजानतोपिदुष्टस्यप्राक्तनानांकुक
र्मणां ॥ संचयोविलयंयातोमासेश्रीपुरुषोत्तमे ॥ २७ ॥ सोपिदिव्यंवपुर्धृत्वाविमानमधिरुह्यच ॥ अगमद्दिव्यगो
लोकंजरामृत्युविवर्जितं ॥ २८ ॥ अतःश्रेष्ठतमोमासःसर्वेभ्यःपुरुषोत्तमः ॥ दुष्टंशाखामृगंयोसौव्याजेनापिहरिंन

श्वप्रदातव्योधौरेयस्तुधुरिक्षमः ॥ सर्वेषामप्यलाभेचयथोक्तकरणंविना ॥ १३ ॥ द्विजवाक्यंस्मृतंराजन्संपूर्णव्रत
सिद्धिदं ॥ एकान्नेननरोयस्तुमलमासंनिषेवते ॥ १४ ॥ चतुर्भुजोनरोभूत्वासयातिपरमांगतिं ॥ एकान्नान्नापरंकिं
चित्पवित्रमिहविद्यते ॥ १५ ॥ एकान्नान्मुनयःसिद्धाःपरंनिर्वाणमागताः ॥ अधिमासेनरोनक्तंयोभुंक्तेसनराधि
पः ॥ १६ ॥ सर्वान्कामानवाप्नोतिनरोनैवात्रसंशयः ॥ पूर्वाह्णेभुंजतेदेवामध्याह्नेमुनयस्तथा ॥ १७ ॥ अपराह्णेपि
त॰॰णाःस्वात्मार्थस्तुचतुर्थकः ॥ सर्ववेलामतिक्रम्ययस्तुभुंक्तेनराधिप ॥ १८ ॥ ब्रह्महत्यादिपापानिनाशंयांतिजना
धिप ॥ नक्तभोजीमहीपालसर्वपुण्याधिकोभवेत् ॥ ॥ १९ ॥ दिनेदिनेश्वमेधस्यफलंप्राप्नोतिमानवः ॥ तस्मिन्विवर्ज
येन्माषमधिमासेहरिप्रिये ॥ २० ॥ सर्वस्मान्मुच्यतेपापाद्विष्णुलोकंसगच्छति ॥ तिलयंत्राणिपापात्माकुरुतेब्राह्म
णोपिसन् ॥ २१ ॥ तिलानांसंख्ययाराजन्सवैतिष्ठतिरौरवे ॥ चांडालयोनिमाप्नोतिकुष्ठरोगेणपीड्यते ॥ २२ ॥ शु
क्लेकृष्णेनरोभक्त्याद्वादशींसमुपोषयेत् ॥ आरुह्यगरुडंयातिनरोभूत्वाचतुर्भुजः ॥ २३ ॥ सदेवैःपूज्यमानोपित्वप्स
रोगणसेवितः ॥ दशमींद्वादशींचैवएकभुक्तंचकारयेत् ॥ २४ ॥ प्रीतयेदेवदेवस्यनरःस्वर्गमवाप्नुयात् ॥ भक्त्याचस
र्वदाराजन्दर्भकूर्चंनवर्जयेत् ॥ २५ ॥ दर्भेणमार्जयेद्यस्तुपुरीषंमूत्रमेवच ॥ श्लेष्माणंरुधिरंवापिविष्ठायांजायतेकृ

पक्षिष्टःकृशःश्यामकलेवरः ॥ ४३ ॥ चचारधनलोभेनमूढधीर्भूतलेसदा ॥ कोपियच्छतुयत्किंचित्पामरायमुदुर्वद
न् ॥ ४४ ॥ सगोदोहनमात्रंहिकुत्रापिस्थातुमक्षमः ॥ लोकधिक्कारसंदग्धोबभ्रामोद्विग्नमानसः ॥४५॥ तन्मित्रंवा
टिकानाथःकश्चिदासीद्वनेचरः ॥ सतंनिवेदयामासस्वदुःखंसंरुदन्मुहुः ॥ ४६ ॥ तिरस्कुर्वंतिमांनित्यंपुटभेदनवासि
नः ॥ अतस्तत्रमयास्थातुंनशक्यंपुटभेदने ॥ ४७॥ इत्येवंवदतस्तस्यकदर्यस्यद्विजन्मनः ॥ अतिदीनतरांवाचमाक
र्ण्यकृपयाप्लुतः ॥ ४८ ॥ मालाकारःप्रपन्नंतंदीनंमत्वाकरोद्दयां ॥ हेकदर्यत्वमत्रैववाटिकायांवसाधुना ॥ ४९ ॥ मा
लाकारवचःश्रुत्वाकदर्यःसर्वनागरैः ॥ तिरस्कृतःसतद्वाटीमध्युवासमुदायुतः ॥ ५० ॥ नित्यंतन्निकटस्थायीतदाज्ञा
[illegible]ालकः ॥ तेनवाटीपतिस्तस्मिन्विश्वासमकरोद्दृढं ॥ ५१ ॥ अतिविश्वस्तचित्तेनतस्मिन्सवाटिकापतिः ॥ तमे
[illegible]वीकरद्दिप्रंस्वकल्पंवाटिकापतिं ॥ ५२ ॥ ततःसर्वात्मभावेनममायमितिनिश्चयात् ॥ विहायवाटिकाचिंतांसिषे
वेराजमंदिरं ॥ ५३ ॥ राजद्वारेसदाकार्यंतस्यात्यंतमभीभवत् ॥ पराधीनतयाचासौवाटिकांनजगामह ॥ ५४ ॥ त
त्फलानिकदर्यस्तुजघासनिर्भरंमुदा ॥ अक्रीणतावशिष्टानिलोभेनातीवदुर्बलः ॥५५॥ अगृह्णाद्द्रविणंतज्जंसर्वंस्वय
मशंकितः ॥ यदापृच्छद्वनाधीशस्तदग्रेवीवदन्मुधा ॥५६॥ भ्रामंभ्रामंचनगरंयाचंयाचंचभैक्षकं ॥ घासंघासंदिवा

रात्रौपरिचर्यामितेवनं ॥ ५७ ॥ तथाप्यस्यफलान्याशन्मासंगच्छंतिपक्षिणः ॥ पश्चाच्छ्रंतोमयाकेचिन्नाशिताः
खचराभृशं ॥ ५८ ॥ तेषांमांसानिपक्षाणिपतितानीहसर्वतः ॥ तद्दृष्ट्वातीवविश्वस्यजगामवाटिकापतिः ॥ ५९ ॥ ए
वंप्रवर्तमानस्यजग्मुर्वर्षाणिदुर्मतेः ॥ सप्ताशीतिःकदर्यस्यजराजर्जरितस्ततः ॥ ६० ॥ ममारमूढधीस्तत्रनैवापव
[illegible]द्दारुणी ॥ नाभुक्तंक्षीयतेपापमितिवेदविदोवदन् ॥ ६१ ॥ तस्माद्धाहाप्रकुर्वाणोमुद्गराघातपीडितः ॥ अजीगम
[illegible]मार्गंकृच्छ्रेणातिविभीषणं ॥ ६२ ॥ स्मरन्पूर्वकृतंकर्मप्रलपन्बुद्बुदाक्षरं ॥ अहोमेपश्यताज्ञानंकदर्यस्यचदुर्म
तेः ॥ ६३ ॥ आसाद्यमानुषंदेहंदुर्लभंत्रिदशैरपि ॥ खंडेस्मिन्भारतेपुण्येकृष्णसारमृगान्विते ॥ ६४ ॥ किंकृतंधनलो
भेनव्यर्थंनीतंजनुर्मया ॥ तद्धनंतुपराधीनंचिरकालार्जितंमया ॥ ६५ ॥ किंकरोमिपराधीनःकालपाशावृतोधुना ॥
मानुषंजनुरासाद्यनकिंचित्कृतवान्शुभं ॥ ६६ ॥ नदत्तंनहुतंवह्नौनतप्तंहिमगह्वरे ॥ नगांगंसेवितंतोयंमाघेम
करगेरवौ ॥ ६७ ॥ उपवासत्रयंचांतेनकृतंपुरुषोत्तमे ॥ नकृतंकार्तिकेप्रातःस्नानंसतारकागणं ॥ ६८ ॥ नपुष्टश्च
मयादेहोमानुषःपुरुषार्थदः ॥ अहोमेसंचितंद्रव्यंस्थितंभूमौनिरर्थकं ॥ ६९ ॥ जीवोजीवनपर्यंतंक्लेशितोदुष्टबुद्धि
ना ॥ कदाचिज्जाठरोवह्निर्नान्नैर्निर्वापितोमया ॥ ७० ॥ नापिसद्वासनाच्छन्नःस्वदेहःपर्वणिक्वचित् ॥ नज्ञातयोवां

धवाश्चस्वजनाःस्वसृजाअपि ॥ ७१ ॥ जामाताचसुतावापिपितामातानुजास्तथा ॥ पतिव्रतापिगृहिणीब्राह्मणा
नैवतोषिताः॥ ७२ ॥ मिष्टान्नैरेकवारंचतर्पितानमयाक्वचित् ॥ एवंविलपमानंतंनिन्युःकीनाशसन्निधिं ॥ ७३ ॥ तं
दृष्ट्वाचित्रगुप्तस्तुविलोक्यैतच्छुभाशुभं ॥ अवोचत्स्वामिनंधर्मंकदर्योयंद्विजाधमः ॥ ७४ ॥ नकिंचित्सुकृतंत्वस्यध
नलुब्धस्यदुर्मतेः ॥ असावचीकरत्पापंपुष्कलंवाटिकास्थितः ॥ ७५ ॥ अचूचुरत्फलान्यद्धाविश्वस्तोवाटिकापतेः॥
ततोजघासतान्येवपक्वानियानियानिच ॥ ७६ ॥ अक्रीणादवशिष्टानिधनलोभेनदुर्मतिः ॥ फलचौर्यंकृतंपापंवि
श्वासघातजंपरं ॥ ७७॥ एतत्पापद्वयंचास्मिन्नत्युग्रंवर्ततेप्रभो ॥ अन्यान्यपिचपापानिसंत्यस्मिन्विविधानिच ॥
८ ॥ नारदउवाच इत्थंनिशम्यविधिनंदनचित्रगुप्तवाक्यंक्रुधाप्रबलयाप्लुतधर्मराजः ॥ आहैषयातुकपिज
सहस्रकृत्वोविश्वासघातकृतिजंफलमस्यपश्चात् ॥ ७९ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममाहात्म्येश्री
नारायणनारदसंवादेकदर्योपाख्यानेसप्तविंशोऽध्यायः॥ २७॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥
श्रीनारायणउवाच॥ तन्निशम्यभटानाहचित्रगुप्तश्चिरंभृशं॥ पूर्वंलोभाभिभूतोयंपश्चाच्चौर्यमचीकरत् ॥ १ ॥
अतःप्रेतत्वमासाद्यपश्चाद्भवतुवानरः॥ ततश्चाहंप्रदास्यामिबह्वींनरकयातनां ॥ २ ॥ अयमेवक्रमःश्रेयान्धर्मश

यत् ॥ २९ ॥ अहोमूढानसेवंतेमासंश्रीपुरुषोत्तमं ॥ तेधन्याःकृतकृत्यास्तेतेषांचसफलोभवः ॥३०॥ पुरुषोत्तममासं
येसेवंतेविधिपूर्वकं ॥ स्नानदानजपहोमैरुपोषणपुरःसरैः ॥ ३१॥ नारदउवाच सर्वार्थसाधनंवेदेमानुषंजनुरुच्य
ते ॥ अयंशाखामृगोप्यद्धामुक्तोयद्व्याजसेवनात् ॥ ३२ ॥ तद्वद्स्वकथामेतांसर्वलोकहितायमे ॥ कुत्रासौकृतवा
ानंत्रिरात्रंतपसांनिधे ॥ ३३ ॥ कोसौकपिःकिमाहारःकुत्रजातःक्वचावसत् ॥ व्याजेनतस्यकिंपुण्यंजातंश्रीपुरु
मे ॥ ३४ ॥ तत्सर्वंविस्तरेणैवमह्यंशुश्रूषवेवद ॥ नतृप्तिर्जायतेत्वत्तःशृण्वतोमेकथामृतं ॥ ३५ ॥ श्रीनारा
यणउवाच कश्चित्केरलदेशीयोद्विजःपरमलोलुपः ॥ नित्यंधनचयेदक्षःसरघेवधनप्रियः ॥ ३६ ॥ लोकेकदर्यइ
त्याख्यांगतस्तेनैवकर्मणा ॥ चित्रशर्मापुरानामतस्यासीत्पितृकल्पितं ॥३७॥ सदन्नंचसुवस्त्रंचनभुक्तंतेनकुत्रचित् ॥
नस्वाहानस्वधावापिकृतातेनकुबुद्धिना ॥ ३८ ॥ यशोर्थेनकृतंकिंचित्पोष्यवर्गोनपोषितः ॥ सर्वंभूमिगतंचक्रेधन
मन्यायसंचितं ॥ ३९ ॥ नमाघेतिलदानंचकृतंतेनकदाचन ॥ कार्तिकेदीपदानंचब्राह्मणानांचभोजनं ॥ ४० ॥ वै
शाखेधान्यदानंचव्यतीपातेचकांचनं ॥ वैधृतौराजतंदानंसर्वदानान्यमूनिच ॥ ४१ ॥ रविसंक्रमणेकालेनदत्ता
निकदाचन ॥ चंद्रसूर्योपरागेचनजप्तंनहुतंक्वचित् ॥ ४२ ॥ अवीवदद्दीनवाचंसर्वत्राश्रुपरिप्लुतः ॥ वर्षवातात

॥ १६ ॥ चरमेहनिसंप्राप्तेउद्यापनमथाकरोत् ॥ सपत्नीकोमुदायुक्तःश्रद्धयाचित्रकुंडलः ॥ १७॥ द्विजानाकारयामा
सवेदवेदांगपारगान् ॥ उद्यापनविधिंकर्तुंसपत्नीकान्गुणान्वितान् ॥ १८॥कदर्योप्यगमत्तत्रधनलोभेननारद ॥ उ
द्यापनविधौपूर्णेसंजातेचित्रकुंडलः ॥ १९ ॥ अत्युग्रदानैस्तान्विप्रान्सत्नीकानतोषयत् ॥ तुष्टेषुतेषुसर्वेषुभूयसींद
क्षिणामदात् ॥ २० ॥ तद्दत्तभूयसीतुष्टाअन्येविप्रागृहान्ययुः ॥ अतिलुब्धःकदर्यस्तुरुदंस्तस्थौतदग्रतः ॥ २१ ॥ विन
यावनतोभूत्वासगद्गदमुवाचह ॥ चित्रकुंडलवैश्येशभगवद्भक्तिभासुर ॥ २२ ॥ पुरुषोत्तमव्रतंसम्यक्भवताविधि
नाकृतं ॥ नतथाचकृतंकेनकुत्रापिपृथिवीतले ॥ २३ ॥ भवानघकृतार्थोसिभाग्यवानसिसर्वथा ॥ यत्त्वयापरयाभ
सेवितःपुरुषोत्तमः ॥ २४ ॥ धन्यस्तवपिताधन्यामाताचपतिदेवता ॥ याभ्यामुत्पादितःपुत्रस्त्वादृशोहरिवल्ल
॥ २५॥ धन्याद्धन्यतरश्चायंमासःश्रीपुरुषोत्तमः ॥ यत्सेवनादवाप्नोतित्यैहिकामुष्मिकंफलं ॥ २६ ॥ दृष्टाहिता
वकींपूजांचकितोहंविशांपते ॥ अहोत्वयामहत्कर्मकृतमेतन्नसंशयः ॥ २७॥ अन्येभ्योब्राह्मणेभ्यश्चधनंदत्तंबृह
न्मुदा ॥ नददासिकथंमह्यंभाग्यहीनायभूरिद ॥ २८ ॥इतिविज्ञापितस्तेनतस्मैधनमदादसौ ॥ तद्गृहीत्वाकरोद्विप्रो
धनंभूमिगतंमुदा ॥ २९ ॥ तत्रानेनमहापूजादृष्टाश्रीपौरुषोत्तमी ॥ पुरुषोत्तममासश्चधनलोभेनसंस्तुतः ॥ ३० ॥

पूजादर्शनमाहात्म्यात्पुरुषोत्तमसंस्तवात् ॥ धनलोभकृताद्वापिमृगतीर्थमुपागतः ॥ ३१ ॥ सूतउवाच दर्शना
त्स्तवनाद्वापिधनलोभकृतादपि ॥ दुष्टशाखामृगस्यापिजातंसत्तीर्थसेवनं ॥ ३२ ॥ किंपुनःश्रद्धयाकर्तुर्दर्शनस्तवने
द्विजाः ॥ पुरुषोत्तमदेवस्यसपत्नीकस्यसादरं ॥ ३३ ॥ नारदउवाच सुशीतलजलेब्रह्मन्स्निग्धच्छायेमनोहरे
वृक्षमंडितेरण्येतत्स्थितेःकारणंवद ॥ ३४ ॥ श्रीनारायणउवाच शृणुनारदवक्ष्यामितुभ्यंशुश्रूषवेऽनघ ॥ अत्रा
कारणंकिंचिच्छ्रवणात्पापनाशनं ॥ ३५ ॥ यदादाशरथीरामःसर्वार्थफलदायकः ॥ हतवान्रावणंदुष्टंबध्वासेतुं
महोदधौ ॥ ३६ ॥ बिभीषणादृतेतेनराक्षसानावशेषिताः ॥ ततोवह्निविशुद्धासाजानकीस्वीकृताधुना ॥ ३७ ॥ चतु
र्मुखमहेशानपुरंदरपुरःसरैः ॥ दशवक्त्रवधप्रीतैर्हेरामत्वंवरंवृणु ॥ ३८ ॥ इत्युक्तेऽवीवदद्रामोभक्तानामभयंकरः ॥
सुराःशृणुतमद्वाक्यंयदिदेयोवरोऽधुना ॥ ३९ ॥ अत्रयेवानराःशूरारक्षोभिर्निहताश्चते ॥ संजीवयततानाशुसुधावृ
ष्ट्याममाज्ञया ॥ ४० ॥ तथेत्युक्त्वासुधावृष्ट्यावानरान्समजीवयन् ॥ चतुर्मुखमहेशानपुरंदरपुरःसुराः ॥ ४१ ॥
ततःसंजीविताःसर्वेवानराजयशालिनः ॥ अदुढौकन्रामभद्रंचिरंसुप्तोत्थिताइव ॥ ४२ ॥ अथपुष्पकमारुह्यवा
नरान्सर्वतःस्थितान् ॥ अजीगदत्सपत्नीकःप्रसन्नमुखपंकजः ॥ ४३ ॥ श्रीरामउवाच हेसुग्रीवहनूमंतौहेतारात्म

जजांबवन् ॥ मित्रकार्यंकृतंसर्वंभवद्भिःसहवानरैः ॥ ४४ ॥ आज्ञापयंतुतान्सर्वान्भवंतोवानरानितः ॥भवदाज्ञा
पिताःसर्वैयथेष्टंयांतुतेयतः ॥ ४५ ॥ यत्रयत्रवनेएतेमामकादीर्घजीविनः ॥ वसंतिवानरास्तत्रवृक्षाःपुष्पफलान्वि
ताः ॥ ४६ ॥ नद्योमृष्टजलावाथशीतलंसुभगंसरः ॥ नकेपिधर्षयिष्यंतिसर्वैयांतुममाज्ञया ॥ ४७ ॥ अतोरामप्रभा
वेणयतोवानरजातयः ॥ तत्रनद्योमृष्टजलाःसरश्चसुभगंवने ॥ ४८ ॥ लसत्फलामहावृक्षाःपुष्पपल्लवसंयुताः ॥ परं
तुसुखदुःखानिप्राक्तनादृष्टजानिच ॥ ४९ ॥ यत्रयत्रवसेज्जंतुस्तत्रतत्रोपयांतिहि ॥ नाभुक्तंक्षीयतेकर्मइतिवेदानु
शासनं ॥ ५० ॥ श्रीनारायणउवाच अथासौवानरस्तत्रववृधेपर्वतोपमः ॥ बृहत्क्षुत्तृट्समायुक्तोलोलुपोव्यचर
[illegible] ५१ ॥ जन्मतस्तस्यवक्रेभूत्पीडापित्तसमुद्भवा ॥ ययास्तकूच्यवतेवक्रव्रणतश्चदिवानिशं ॥ ५२ ॥ अत्यंतवेद
[illegible]विष्टोनात्तुंशक्तस्तुकिंचन ॥ सचवानरचापल्याद्द्रुमेभ्यःसत्फलानिच ॥ ५३ ॥ लुनीयवदनाभ्याशेनीत्वातत्याज
भूरिशः ॥ नैकत्रपीडयास्थातुंशक्तोसौवानरःक्वचित् ॥ ५४ ॥ वृक्षाद्वृक्षांतरंगच्छन्मेनेमृत्युंसुखावहं ॥ कदाचिदप
तद्भूमौविललापातिदुःखितः॥५५॥अरूरुदद्भग्नगात्रोनीरभ्रष्टोयथाझषः॥ असौक्षुत्तृट्समाविष्टःश्लथदेहोगलन्मु ५२
खः ॥ ५६ ॥ पेतुर्दंतास्तथासर्वेव्रणरोगेणपीडिताः ॥ पूर्वजन्मकृतात्पापादेवंदुःखमजीगमत् ॥ ५७ ॥ एवंप्रवर्त्तमा

जगृहेभटाः ॥ इत्येवंचित्रगुप्तेनसमादिष्टाविभीषणाः ॥ ३ ॥ तथाचक्रुर्भटाःशीघ्रंताडयंतश्चतंद्विजं ॥ प्रेतत्वंप्रापितः
पूर्वंकाननेविफलेद्विजः ॥ ४ ॥ निर्जलेबहुकालंचप्रेतयोनिमवाप्यसः ॥ क्षुत्तृड्भ्यांव्याकुलोत्यंतंबभ्रामगहनेवने
॥ ५ ॥ प्रेतयोनिंगतंदुःखमनुभूयततःपरं ॥ फलचौर्यसमुद्भूतांकपियोनिमजीगमत् ॥ ६ ॥ दिव्येकालंजरेशैलेजंबु
[illegible]मनोहरे ॥ सुशीतलजलच्छायेफलपुष्पसमन्विते ॥ ७ ॥ तत्रासीद्देवराजेननिर्मितंकुंडमुत्तमं ॥ सरोवरसमंपु
[illegible]त्सेव्यंपापनाशनं ॥ ८ ॥ मृगतीर्थमितिख्यातंसुराणामपिदुर्लभं ॥ यस्मिन्कृतेनश्राद्धेनपितरोयांतिसद्गतिं ॥
॥ ९ ॥ तत्रदैत्यभयाद्देवामृगाभूत्वानिरंतरं ॥ अभिसस्नुर्निरातंकामृगतीर्थमतोविदुः ॥ १० ॥ तत्रायंप्रथमंजन्मका
पेयंलब्धवान्द्विजः ॥ फलचौर्यकृतात्पापादासाद्यमानुषींतनुं ॥ ११ ॥ नारदउवाच त्रैलोक्यपावनेरम्येमृगती
र्थेकथंकपिः ॥ आवासमकरोद्दुष्टःपापकोटिसमन्वितः ॥ १२ ॥ छिंधिमेसंशयंनाथतपोधनमनोगतं ॥ भवादृशांन
गोप्यंहिस्वशिष्येषुकदाचन ॥ १३ ॥ सूतउवाच एवंसन्नोदितोविप्रानारदेनतपोनिधिः ॥ उवाचपरमप्रीतः
सत्कुर्वन्नारदंमुनिं ॥ १४ ॥ श्रीनारायणउवाच कश्चिद्वैश्योमहानासीन्नाम्नावैचित्रकुंडलः ॥ तत्पत्नीतारकाना
म्नीपातिव्रत्यपरायणा ॥ १५ ॥ तावुभौचक्रतुर्भक्त्यापुण्यंश्रीपुरुषोत्तमं ॥ तयोःकृतवतोर्मासोगतःश्रीपुरुषोत्तमः

पुरु. चिद्भृंगारकंहैमंस्वर्धुनीवारिसंभृतं ॥ ७२ ॥ हस्तेकृत्वापुरस्तस्थौगीतवाद्यादितत्परा ॥ एवंवैभवमालोक्यचित्रन्यस्त मा.
५३ इवाभवत् ॥ ७३ ॥ किमेतत्केनपुण्येनममापुण्यस्यदुर्मतेः ॥ नास्तिमेसुकृतंकिंचिद्येनयामिहरेःपदं ॥ ७४ ॥ श्रीना
रायणउवाच इत्थंतर्कयतोबृहत्सुखनिधिंदिव्यंविमानंपुरोदृष्ट्वाविस्मितचेतसोहरिभटौज्ञात्वास्यहार्दंपरं ॥ बध्वा
ग्रेकरसंपुटंसविनयंनत्वातदीयंपदंवाक्यंसुंदरमूचतुःकपिजनुस्त्यक्त्वापुरःसंस्थितं ॥ ७५ ॥ इतिश्रीबृहन्नारदीयपुरा
णेश्रीनारायणनारदसंवादेकदर्योपाख्यानेकपिजन्मनिविमानागमनंनामाष्टाविंशोऽध्यायः ॥ २८ ॥ ॥ छ ॥
पुण्यशीलसुशीलावूचतुः विभोप्रयाहिगोलोकंकथमत्रविलंबसे ॥ पुरुषोत्तमसान्निध्यंत्वयालब्धंविशेषतः ॥
॥ कदर्यउवाच बहूनिममकर्माणिसंतिभोग्यान्यनेकशः ॥ केनमेनिष्कृतिर्जातायतोगोलोकमाप्नुयां ॥ २ ॥
वंत्योवर्षधाराश्चतृणानिभूरजःकणाः ॥ यावंत्यस्तारकाव्योम्नितावत्पापानिसंतिमे ॥ ३ ॥ कथमेतन्मयाप्राप्तंवपु
र्दिव्यंमनोहरं ॥ एतत्कारणमत्युग्रंमह्यंब्रूतंहरेःप्रियौ ॥ ४ ॥ श्रीनारायणउवाच इतिवाचमुपाकर्ण्यहरेर्दूतावथोच
तुः ॥ हरिदूतावूचतुः ॥ अहोदेवकथंनैवविज्ञातंसाधनंमहत् ॥ ५ ॥ प्रभोनज्ञायतेकस्मान्मासःसर्वोत्तमोत्तमः ॥ विष्णु ५३
प्रियोमहापुण्योनाम्नावैपुरुषोत्तमः ॥ ६ ॥ तस्मिंस्त्वयातपश्चीर्णमशक्यंयत्सुरैरपि ॥ अविज्ञातंमहाराजकपिदेहेनका

नने ॥७॥ मुखरोगादनाहारव्रतंजातमजानतः॥त्वयाचकपिचांचल्यात्फलान्युत्क्षिप्यवैततः॥८॥ क्षिप्तानिपृथिवी
पीठेत्प्तास्तैरितरेजनाः॥ पानीयमपिनोपीतमंतर्दुःखेनभूरिशः ॥ ९ ॥ संजातंतेतपस्तीव्रमज्ञानात्पुरुषोत्तमे ॥ परो
पकारःसंजातःफलपातेनतेऽनघ ॥ १० ॥ शीतवातातपारौद्राःसोढाविचरतावने ॥ महातीर्थेवरेरम्येपंचाहंप्लुवनं
तं॥ ११ ॥ तस्मात्तेस्नानजंपुण्यंमासेश्रीपुरुषोत्तमे॥एवंरुग्णस्यतेजातमज्ञानात्तपउत्तमं ॥ १२ ॥ तदेतत्सफलं
मनुभूतंत्वयाधुना॥व्याजतोपिकृतेनैवसफलंस्याद्यथातव ॥ १३ ॥ किंपुनःश्रद्धयैतास्मिन्मासेश्रीपुरुषोत्त
मे ॥ विधिनाकुर्वतःकर्मज्ञात्वामाहात्म्यमुत्तमं ॥ १४ ॥ यस्त्वयासाधितःस्वार्थस्तादृक्कर्तुंचकःक्षमः॥ यस्मिन्नेकोप
वासेनमुच्यतेपापराशिभिः ॥ १५ ॥ नैतत्तुल्यंभवेत्किंचित्पुरुषोत्तमप्रीतिदं ॥ तेधन्याःकृतकृत्यास्तेतद्व्रतंयेप्रकुर्व
ते ॥ १६ ॥ दुर्लभंमानुषंजन्मभूखंडेभारताजिरे ॥ तादृशंजनुरासाद्यसेवंतेपुरुषोत्तमं ॥ १७ ॥ तेसदासुभगाःपुण्या
स्तेषांचसफलोभवः ॥ येषांसर्वोत्तमोमासःस्नानदानजपैर्गतः ॥ १८ ॥ दानानिपितृकार्याणितपांसिविविधानि
च॥तानिकोटिगुणान्येवसंप्राप्तेपुरुषोत्तमे ॥ १९ ॥ धिक्कृतंचनास्तिकंपापंशठंधर्मध्वजंखलं ॥ पुरुषोत्तममासा
द्यस्नानदानविवर्जितः॥ २० ॥ श्रीनारायणउवाच पुण्यशीलसुशीलाभ्यामदृष्टंवर्णितंनिजं॥ तच्छ्रुत्वाचकितोहृ

ष्टःपुलकांकितविग्रहः ॥ २१ ॥ तीर्थदेवान्नमस्कृत्यकालंजरगिरिंततः ॥ ननामकाननाधीशान्सर्वगुल्मलतातरू
न् ॥ २२ ॥ ततःप्रदक्षिणीकृत्यविमानंविनयान्वितः ॥ आरुरोहघनश्यामोलसत्पीतांबरावृतः ॥ २३ ॥ पश्यत्सुसर्वदे
वेषुगंधर्वाद्यैरभिष्टुतः ॥ वाद्यमानेषुवाद्येषुकिन्नराद्यैर्मुहुर्मुहुः ॥ २४ ॥ पुष्पवृष्टिमुचोदेवामंदंमंदंमुदान्विताः ॥ सा
दरंपूजयांचक्रुःपुरंदरपुरःसराः ॥ २५ ॥ ततोजगामगोलोकंसानंदंयोगिदुर्लभं ॥ गोपगोपीगवांसेव्यंरासमंडलमं
डितं ॥ २६ ॥ यत्रगत्वानशोचंतिजरामृत्युविवर्जिते ॥ तत्रासौचित्रशर्माचपुरुषोत्तमसेवनात् ॥ २७ ॥ व्याजेना
पिमुमोदोच्चैर्विहायवानरंवपुः ॥ द्विभुजंमुरलीहस्तंदृष्ट्वाश्रीपुरुषोत्तमं ॥ २८ ॥ श्रीनारायणउवाच इदमाश्चर्यमा
[illegible]यदेवाःसर्वेसुविस्मिताः ॥ स्वंस्वंस्थानंययुःसर्वेशंसंतपुरुषोत्तमं ॥ २९ ॥ नारदउवाच दिवसस्यादिमेभा
[illegible]त्वयाह्निकमुदीरितं ॥ तद्दिवापरभागीयंकथंकार्यंतपोधन ॥ ३० ॥ गृहस्थस्योपकारायवदमेवदतांवर ॥ सदास
वोपकारायचरंतिहिभवादृशाः ॥ ३१ ॥ श्रीनारायणउवाच प्रातःकालोदितंकर्मसमाप्यविधिवत्ततः ॥ कृत्वा
माध्याह्निकींसंध्यांतिलतर्पणमाचरेत् ॥ ३२ ॥ देवामनुष्याःपशवोवयांसिसिद्धाश्चयक्षोरगदैत्यसंघाः ॥ प्रेताःपि

शाचाउरगाःसमस्तायेचान्नमिच्छंतिमयात्रदत्तं ॥ ३३ ॥ ततःपंचमहायज्ञान्कुर्याद्भूतबलिंततः ॥ काकस्यचशुन

नस्यनिराहारस्यनित्यशः ॥ दैवयोगात्समागच्छन्मासःश्रीपुरुषोत्तमः ॥ तस्मिन्नपितथैवास्तेशीतवातादिपी
डितः॥ कदाचिद्वहुलेपक्षेविचरन्गहनेवने॥ ५९॥ तृषितःकुंडनिकटेनाशक्नोत्पातुमम्भृतं॥ क्षुधाविष्टोपिचापल्या
त्तत्रोच्चैर्वृक्षमारुहत्॥ ६०॥ वृक्षाद्वृक्षांतरंगच्छन्मध्येकुंडमपीपतत्॥ सचिरायनिराहारःश्लथादिंद्रियजर्जरः॥ ६१॥
[illegible]र्बलःशिथिलप्राणःकुंडप्रांतमुपाश्रितः॥ एवंदिनानिचत्वारिदशमीदिनतःकपेः॥ ६२॥ गतानिलुंठतःकुंडेमा
[illegible]श्रीपुरुषोत्तमे॥ पंचमेदिवसेप्राप्तेमध्यंदिनगतेरवौ॥ ६३॥ व्यसुःपपाततत्तीर्थेतोयक्लिन्नवपुःकपिः॥ सतंदेहंस
मुत्सृज्यविनिर्धूतमलाशयः॥ ६४॥ सद्योदिव्यवपुःप्रापदिव्याभरणभूषितं॥ इंदीवरदलश्यामंकोटिकंदर्पसुंदरं॥
॥ ६५॥ स्फुरद्रत्नकिरीटंचसुचारुझषकुंडलं॥ लसत्पीतपटंपुण्यंसद्रत्नकटिमेखलं॥ ६६॥ लसत्केयूरवलयंमुद्रिका
हारशोभितं॥ नीलकुंचितसुस्निग्धचिकुरावृतसन्मुखं॥ ६७॥ तदानीमागमच्छीघ्रंविमानंवैष्णवाश्रितं॥ भेरीमृ
दंगपटहवेणुवीणाबृहत्स्वनं॥ ६८॥ नृत्यद्देवांगनंदिव्यंगायद्गंधर्वकिन्नरं॥ तन्निरीक्ष्यमहाभागोदिव्यदेहधरःकपिः
॥ ६९॥ विस्मयंपरमंयातोमहापापस्यमेकुतः॥ एतत्पुण्यतमस्यैवयोग्यंवैमानिकंसुखं॥ ७०॥ अथकाचित्तदुप
रिदधारच्छत्रमिंदुभं॥ चक्रतुश्चामरेतस्यकेचिदप्सरसौमुदा॥ ७१॥ काचित्तांबूलहस्ताचननृतुश्चाप्सराःपुरः॥ का

तात्मनां ॥ भूतानांतृप्तयेऽक्षय्यमिदमस्तुयथासुखं ॥ ४८॥ प्राणायापानसंज्ञायव्यानायचततःपरं ॥ उदानायततो
ब्रूयात्समानायततःपरं ॥ ४९ ॥ प्रणवंपूर्वमुच्चार्यस्वाहांतेचघृतप्लुतं ॥ पंचकृत्वोग्रसेदन्नंजिव्हयानतुदंशयेत् ॥
॥५० ॥ ततश्चतन्मनाभूत्वाभुंजीतमधुरंपुरः ॥ लवणाम्लौतथामध्येकटुतिक्तौततःपरं ॥ ५१ ॥ प्राग्द्रवंपुरुषोऽश्नी
यान्मध्येतुकठिनाशनं ॥ अंतेपुनर्द्रवाशीतुबलारोग्येनमुंचति ॥ ५२ ॥अष्टौग्रासामुनेर्भक्ष्याःषोडशारण्यवासिनः॥
द्वात्रिंशच्चगृहस्थस्यत्वमितंब्रह्मचारिणः ॥५३॥ नाद्याच्छास्त्रविरुद्धंतुभक्ष्यभोज्यादिकंद्विजः॥ अभोज्यंप्राहुराहा
रंशुष्कंपर्युषितंतथा ॥५४॥ सर्वंसशेषमश्नीयात्घृतपायसवर्जितं ॥ अग्रांगुलिषुतच्छेषंनिधायभोजनोत्तरं ॥
[illegible]५॥ जलपूर्णांजलिंकृत्वापीत्वाचैवतदर्धकं॥ अग्रांगुलिस्थितंशेषंभूमौदत्वांजलेर्जलं ॥ ५६॥ शेषंनिषिंचेत्त
[illegible]पठन्मंत्रमिमंबुधः ॥ अन्यथापापभाग्विप्रःप्रायश्चित्तेनशुद्ध्यति ॥ ५७ ॥ रौरवेपूयनिलयेपद्मार्बुदनिवासि
नां॥ अर्थिनामुदकंदत्तमक्षय्यमुपतिष्ठतु ॥५८॥ निषिच्यानेनमंत्रेणकुर्याद्दंतविशोधनं ॥ आचम्यपात्रमुत्सार्य
किंचिदार्द्रेणपाणिना॥ ५९ ॥ ततःपरंसमुत्थायबहिःस्थित्वासमाहितः ॥ शोधयेन्मुखहस्तौचमृदाशुद्धजलेनच ॥
॥६० ॥ कृत्वाषोडशगंडुषान्शुद्धोभूत्वासुखासनः॥ इमौमंत्रौपठन्नेवपाणिनोदरमालभेत्॥ ६१ ॥ अगस्त्यंकुंभ

कर्णंचशार्निंचवडवानलं॥ आहारपरिपाकार्थंस्मरेद्भीमंचपंचमं॥६२॥आतापीमारितोयेनवातापीचनिपातितः॥
समुद्रःशोषितोयेनसमेगस्त्यःप्रसीदतु॥ ६३ ॥ ततःश्रीकृष्णदेवस्यकुर्वीतस्मरणंमुदा ॥ भूयोप्याचम्यकर्तव्यंतत
स्तांबूलभक्षणं॥६४॥भुक्त्वोपविष्टःश्रीकृष्णंपरंब्रह्मविचारयेत्॥सच्छास्त्रादिविनोदेनसन्मार्गाद्यविरोधिना॥६५॥
ततश्चाध्यात्मविद्यायाःकुर्वीतश्रवणंसुधीः ॥ सर्वथावृत्तिहीनोपिमुहूर्तंस्वस्थमानसः ॥६६॥ श्रुत्वाधर्मंविजाना
श्रुत्वापापंपरित्यजेत्॥ श्रुत्वानिवर्ततेमोहःश्रुत्वाज्ञानामृतंलभेत्॥६७॥नीचोपिश्रवणेनाशुश्रेष्ठत्वंप्रतिपद्यते॥ श्रे
ष्ठोपिनीचतांयातिरहितःश्रवणेनच॥६८॥ व्यवहारंततःकुर्याद्बहिर्गत्वायथासुखं ॥ श्रीकृष्णंमनसाध्यायेत्सर्वार्थ
सिद्धिदायकं॥ ६९ ॥ सूर्येस्तशिखरंप्राप्तेतीर्थंगत्वाथवागृहं॥ सायंसंध्यामुपासीतधौतांघ्रिःसपवित्रकः॥ ७०॥यः
प्रमादान्नकुर्वीतसायंसंध्यांद्विजाधमः॥ सगोवधमवाप्नोतिमृतेरौरवमाप्नुयात् ॥ ७१॥ कदाचित्काललोपेपिसंक
टेवापथिस्थितः॥ आनिशीथान्नकुर्वीतसायंसंध्यांद्विजोत्तमः॥ ७२ ॥ यस्त्रिसंध्यमुपासीतब्राह्मणःश्रद्धयान्वितः॥
तत्तेजोवर्धतेत्यंतंघृतेनेवहुताशनः ॥७३॥ सादित्यांपश्चिमांसंध्यामर्धास्तमितभास्करां ॥ प्राणानायम्यसंप्रोक्ष्य
मंत्रेणाब्दैवतेनतु॥ ७४॥ सायमग्निश्चमेत्युक्त्वाप्रातःसूर्येत्यपःपिबेत्॥ प्रत्यङ्मुखोपविष्टस्तुवाग्यतःसुसमाहितः॥

 ॥ ७५ ॥ प्रणवव्याहृतियुतांगायत्रींतुजपेत्ततः ॥ अक्षसूत्रंसमादायसम्यगातारकोदयात् ॥ ७६ ॥ वारुणीभिस्त
 दादित्यमुपस्थायप्रदक्षिणं ॥ कुर्वन्दिशोनमस्कुर्याद्दिगीशांश्चपृथक्पृथक् ॥ ७७ ॥ उपास्यपश्चिमांसंध्यांहुत्वाग्नि
मश्नियात्ततः ॥ भृत्यैःपरिवृतोभूत्वानातितृप्तोथसंविशेत् ॥ ७८ ॥ सायंप्रातर्वैश्वदेवःकर्तव्योबलिकर्मच ॥ अनश्न
तापिसततमन्यथाकिल्बिषीभवेत् ॥ ७९ ॥ कृतपादादिशौचस्तुभुक्त्वासायंततोगृही ॥ गच्छेच्छय्यांततोमृद्वीमुप
धानसमन्वितां ॥ ८० ॥ स्वगृहेप्राक्शिराःशेतेश्वाशुरेदक्षिणाशिराः ॥ प्रवासेपश्चिमशिरानकदाचिदुदक्शिराः ॥
॥ ८१ ॥ रात्रिसूक्तंजपेत्स्मृत्वादेवांश्चसुखशायिनः ॥ नमस्कृत्याव्ययंविष्णुंसमाधिस्थःस्वपेन्निशि ॥ ८२ ॥ अग
[illegible]ोमाधवश्चैवमुचुकुंदोमहाबलः ॥ कपिलोमुनिरास्तीकःपंचैतेसुखशायिनः ॥ ८३ ॥ मांगल्यंपूर्णकुंभंचशिरः
[illegible]ानेनिधायच ॥ वैदिकैर्गारुडैर्मंत्रैरक्षांकृत्वास्वपेत्ततः ॥ ८४ ॥ ऋतुकालाभिगामीस्यात्स्वदारनिरतःसदा ॥ पर्व
वर्जंव्रजेदेनांतद्व्रतीरतिकाम्यया ॥ ८५ ॥ प्रदोषपश्चिमौयामौवेदाभ्यासेनतौनयेत् ॥ यामद्वयंशयानस्तुब्रह्मभूयाय
कल्पते ॥ ८६ ॥ एतत्सर्वमशेषेणकृत्यजातंदिनेदिने ॥ कर्तव्यंगृहिभिःसम्यग्गृहस्थाश्रमलक्षणं ॥ ८७ ॥ अहिंसासत्यव
चनंसर्वभूतानुकंपनं ॥ शमोदानंयथाशक्तिगार्हस्थ्योधर्मउच्यते ॥ ८८ ॥ परदारेष्वसंसर्गोधर्मस्त्रीपरिरक्षणं ॥ अद

श्चैवबलिंदत्वैवमुच्चरन्॥ ३४॥ इत्युक्त्वासर्वभूतेभ्योबलिंदद्यात्पुनःपृथक्॥ ततआचम्यविधिवद्धद्ध्याप्रीतमान
सः॥ ३५॥ द्वारावलोकनंकुर्यादतिथिग्रहणायच॥ गोदोहकालंभाग्यात्तुप्राप्तश्चेदतिथिर्यदि ॥ ३६ ॥ आदौसत्कृ
त्यवचसादेववत्पूजयेत्सुधीः॥ तोषयेत्परयाभक्त्यायथाशक्त्यन्नपानतः ॥ ३७ ॥ भिक्षांचभिक्षवेदद्याद्विधिवद्ब्रह्म
चारिणे॥ आकल्पितान्नादुद्धृत्यसर्वव्यंजनसंयुतात्॥ ३८॥ यतिश्चब्रह्मचारीचपक्कान्नस्वामिनावुभौ ॥ तयोरन्न
दत्वैवभुक्त्वाचांद्रायणंचरेत् ॥ ३९ ॥ यतिहस्तेजलंदद्याद्भैक्षंदद्यात्पुनर्जलं॥ तद्भैक्षंमेरुणातुल्यंतज्जलंसागरोप
मं॥ ४०॥ सत्कृत्यभिक्षवेभिक्षांयःप्रयच्छतिमानवः॥ गोप्रदानसमंपुण्यमित्याहभगवान्यमः॥ ४१॥ ततश्चभो
जनंकुर्यात्प्राङ्मुखोमौनमास्थितः॥ प्रशस्तेशुद्धपात्रेचभुंजीतान्नमकुत्सयन् ॥ ४२॥ नैकवासाःसमश्नीयात्स्वास
नेनिजभाजने ॥ स्वयमासनमारुह्यस्वस्थचित्तःप्रसन्नधीः॥ ४३॥ एकएवतुयोभुंक्तेस्वकीयेकांस्यभाजने॥ च
त्वारितस्यवर्धंतआयुःप्रज्ञायशोबलं॥ ४४॥ सत्यंत्वर्तेतिमंत्रेणजलमादायपाणिना॥ परिषिच्यचभोक्तव्यंसघृ
तंव्यंजनान्वितं॥ ४५॥ भोजनात्किंचिदन्नाग्र्यमादायैवंसमुच्चरेत्॥ नमोभूपतयेपूर्वंभुवनपतयेनमः॥ ४६॥ भू
तानांपतयेपश्चाद्धर्मायचततोबलिं॥ दत्वाचचित्रगुप्तायभूतेभ्यइदमुच्चरेत्॥ ४७॥ यत्रक्कचनसंस्थानांक्षुत्तृषोपह

स्पृष्टावाजनसंमर्दैनविकारमुपैतिया ॥ ९ ॥ यावंतोरोमकूपाःस्युःस्त्रीणांगात्रेषुनिर्मिताः ॥ तावद्वर्षसहस्राणिनाकं
ताःपर्युपासते ॥ १० ॥ पुरुषंसेवतेनान्यंमनोवाक्कायकर्मभिः ॥ लोभितापिपरेणार्थैःसासतीलोकभूषणा ॥ ११ ॥
दौत्येनप्रार्थितावापिबलेनविधृतापिवा ॥ वस्त्राद्यैर्वासितावापिनैवान्यंभजतेसती ॥ १२ ॥ वीक्षितावीक्षतेनान्यै
र्हासितानहसत्यपि ॥ भाषिताभाषतेनैवसासाध्वीसाधुलक्षणा ॥ १३ ॥ रूपयौवनसंपन्नागीतनृत्येऽतिकोविदा ॥
स्वानुरूपंनरंदृष्ट्वानयातिविक्रतिंसती ॥ १४ ॥ सुरूपंतरुणंरम्यंकामिनीनांचवल्लभं ॥ यांनेच्छतिपरंकांतंविज्ञेया
सामहासती ॥ १५ ॥ देवोमनुष्योगंधर्वःसतीनांनापरःप्रियः ॥ अप्रियंनैवकर्त्तव्यंपत्युःपत्न्याकदाचन ॥ १६ ॥ भुं
क्तेभुक्तेयथापत्यौदुःखितेदुःखिताचया ॥ मुदितेमुदितात्यर्थंप्रोषितेमलिनांबरा ॥ १७ ॥ सुप्तेपत्यौचयाशेतेपूर्वमे
वप्रबुद्ध्यति ॥ प्रविशेच्चैवयावह्नौयातेभर्त्तरिपंचतां ॥ १८ ॥ नान्यंकामयतेचित्तेसाविज्ञेयापतिव्रता ॥ भक्तिंश्वशु
रयोःकुर्यात्पत्युश्चापिविशेषतः ॥ १९ ॥ धर्मकार्येनुकूलत्वमर्थकार्येपिसंचये ॥ गृहोपस्करसंस्कारेसक्तायाप्रतिवा
सरं ॥ २० ॥ क्षेत्राद्वनाद्वाग्रामाद्वाभर्त्तारंगृहमागतं ॥ प्रत्युत्थायाभिनंदेतआसनेनोदकेनच ॥ २१ ॥ प्रसन्नवदनानि
त्यकालेभोजनदायिनी ॥ भुक्तवंतंतुभर्त्तारंनवदेदप्रियंक्वचित् ॥ २२ ॥ आसनेभोजनेदानेसंमानेप्रियभाषणे ॥ द

क्षयासर्वदाभाव्यंभार्ययागृहमुख्यया ॥ २३ ॥ गृहव्ययनिमित्तंचयद्द्रव्यंप्रभुणार्पितं ॥ निर्वर्त्यगृहकार्यंसाकिंचिद्बु
द्ध्यावशेषयेत् ॥ २४ ॥ त्यागार्थमर्पितेद्रव्येलोभात्किंचिन्नधारयेत् ॥ भर्त्तुराज्ञांविनानैवस्वबंधुभ्योदिशेद्धनं ॥ २५ ॥
अन्यालापमसंतोषंपराव्यापारसंकथाः ॥ अतिहासातिरोषंचक्रोधंचपरिवर्जयेत् ॥ २६ ॥ यच्चभर्त्तानपिबतियच्चभ
र्त्तानखादति ॥ यच्चभर्त्तानचाश्नातिसर्वंतद्वर्जयेत्सती ॥ २७ ॥ तैलाभ्यंगंतथास्नानंशरीरोद्वर्त्तनक्रियां ॥ मार्जनंचैव
दंतानांकुर्यात्पतिमुदेसती ॥ २८ ॥ त्रेताप्रभृतिनारीणांमासिमास्यार्त्तवंमुने ॥ तदादिनत्रयंत्यक्त्वाशुद्धास्याद्गृहकर्म
णि ॥ २९ ॥ प्रथमेहनिचांडालीद्वितीयेब्रह्मघातिनी ॥ तृतीयेरजकीप्रोक्ताचतुर्थेहनिशुध्यति ॥ ३० ॥ स्नानंशौचंत
थागानंरोदनंहसनंतथा ॥ यानमभ्यंजनंनारीघूर्तंचैवानुलेपनं ॥ ३१ ॥ दिवास्वप्नंविशेषेणतथावैदंतधावनम् ॥
मैथुनंमानसंत्रापिवाचिकंदेवतार्चनं ॥ ३२ ॥ वर्जयेच्चनमस्कारंदेवतानांरजस्वला ॥ रजस्वलायाःसंस्पर्शंसंभाषां
चतयासह ॥ ३३ ॥ त्रिरात्रंस्वमुखंनैवदर्शयेच्चरजस्वला ॥ स्ववाक्यंश्रावयेन्नैवयावत्स्नातानशुद्धितः ॥ ३४ ॥ स्ना
त्वान्यंपुरुषंनारीनपश्येच्चरजस्वला ॥ ईक्षेतभास्करंदेवंब्रह्मकूर्चंततःपिबेत् ॥ ३५ ॥ केवलंपंचगव्यंचक्षीरंवात्मवि
शुद्धये ॥ यथोपदेशंनियतावर्तयेतवरांगना ॥ ३६ ॥ गर्भिणीचेद्भवेन्नारीतदानियमतत्परा ॥ अलंकृतासुप्रयता

भर्तुःप्रियहितेरता ॥ ३७॥ तिष्ठेत्प्रसन्नवदनास्वधर्मनिरताशुचिः ॥ कृतरक्षासुभूषाच्चवास्तुपूजनतत्परा ॥ ३८ ॥ कु
स्त्रीभिर्नाभिभाषेतशूर्पवातंचवर्जयेत् ॥ मृतवत्सादिसंसर्गंपरपाकंचसुंदरि ॥ ३९ ॥ नबीभत्संकिंचिदीक्षेन्नरौद्रां
शृणुयात्कथां ॥ गुरुंवात्युष्णमाहारमजीर्णंनसमाचरेत् ॥ ४० ॥ अनेनविधिनासाध्वीशोभनंपुत्रमाप्नुयात् ॥ अन्य
थागर्भपतनंस्तंभनंवाप्रपद्यते ॥ ४१ ॥ हीनांनिजगुणैरन्यांसपत्नींनैवगर्हयेत् ॥ ईर्ष्यांरागसमुद्भूतंविद्यमानेपिमत्सरे
॥ ४२ ॥ अप्रियंनैवकर्त्तव्यंसपत्नीभिःपरस्परं ॥ नगायेदन्यनामानिनकुर्यादन्यवर्णनं ॥ ४३ ॥ नवसेद्दूरतःपत्युःस्थे
यंवल्लभसन्निधौ ॥ निर्दिष्टेचमहीभागेवल्लभाभिमुखावसेत् ॥ ४४ ॥ नावलोक्यादिशःस्वैरंनावलोक्यःपरोजनः ॥
विलासैरवलोक्यंस्यात्पत्युराननपंकजं ॥ ४५ ॥ कथ्यमानाकथाभर्त्राश्रोतव्यासादरंस्त्रिया ॥ पत्युःसंभाषणस्याग्रे
नान्यत्संभाषयेत्स्वयं ॥ ४६ ॥ आहूतासत्वरंगच्छेद्रतिस्थानंरतोत्सुका ॥ पत्यौगायतिसोत्साहंश्रोतव्यंहृष्टचेतसा ॥
॥ ४७ ॥ गायंतंचपतिंदृष्ट्वाभवेदानंदनिर्वृता ॥ भर्तुःसमीपेनस्थेयंसोद्वेगंव्यग्रचित्तया ॥ ४८ ॥ कलहोनविधातव्यः
कलियोग्येप्रियेस्त्रिया ॥ भर्त्सितानिंदितात्यर्थंताडितापिपतिव्रता ॥ ४९ ॥ व्यथितापिभयंत्यक्त्वाकंठेगृह्णीतवल्लभं ॥ उ ५८
च्चैर्नरोदनंकुर्यान्नैवाक्रोशेच्चतंप्रति ॥ ५० ॥ पलायनंनकर्त्तव्यंनिजगेहाद्बहिःस्त्रिया ॥ उत्सवादिषुबंधूनांसदनंयदिग

त्तादानं विरमोमधुमांसविवर्जनं ॥ ८९ ॥ एषपंचविधोधर्मोबहुशाखःसुखोदयः॥ देहिभिर्देहपरमैःकर्तव्योदेहसंभ
वः॥ ९० ॥ श्रीनारायणउवाच अशेषवेदोदितसच्चरित्रमेतद्गृहस्थाश्रमलक्षणंहि ॥ उक्तंसमासेनचलक्षणेन
तुभ्यंमुनेलोकहितायसम्यक् ॥ ९१ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममाहात्म्येश्रीनारायणनारदसंवादे
आह्निककथनंनामएकोनत्रिंशोऽध्यायः ॥ २९ ॥ ॥छ॥ ॥छ॥ ॥छ॥
नारदउवाच स्नुतापतिव्रतानारीत्वयापूर्वंतपोनिधे ॥ तल्लक्षणानिसर्वाणिसमासेनवदस्वमे ॥ १ ॥ सूतउवाच नोदि
तोनारदेनेत्थंपुरातनमुनिःस्वयं ॥ पतिव्रतायाःसर्वाणिलक्षणान्याहभूसुराः ॥ २ ॥ श्रीनारायणउवाच शृणुनारदव
क्ष्यामिसतीनांव्रतमुत्तमं ॥ कुरूपोवाकुवृत्तोवासुस्वभावोथवापतिः ॥३॥ रोगान्वितःपिशाचोवाक्रोधनोवाथमद्य
पः॥ वृद्धोवाप्यविदग्धोवामूकोऽधोबधिरोपिवा ॥ ४ ॥ रौद्रोवाथदरिद्रोवाकदर्यःकुत्सितोपिवा ॥ कातरःकितवोवा
पिललनालंपटोपिवा ॥ ५ ॥ सततंदेववत्पूज्यःसाध्व्यावाक्कायकर्मभिः ॥ नजातुविषमंभर्तुःस्त्रियाकार्यंकथंचन॥६॥
बालयावायुवत्यावावृद्धयावापियोषिता ॥ नस्वातंत्र्येणकर्त्तव्यंकिंचित्कार्यंगृहेष्वपि ॥ ७॥ अहंकारंविहायाथका
मक्रोधौचसर्वदा ॥ मनसोरंजनंपत्युःकार्यंनान्यस्यकुत्रचित् ॥ ८॥ सकामंवीक्षिताप्यन्यैःप्रियवाक्यैःप्रलोभिता ॥

॥६५॥ सुखसुप्तंसुखासीनंरममाणंयदृच्छया ॥आतुरेष्वपिकार्येषुपतिंनोत्थापयेत्क्वचित् ॥६६॥ नैकाकिनीक्वचिद्ग
च्छेन्ननग्नास्नानमाचरेत्॥भर्तृविद्वेषिणींनारींसाध्वींनोभावयेत्क्वचित्॥६७॥नोलूखलेनमुसलेनवर्धिन्यांदृषद्यपि॥
नयंत्रकेपिदेहल्यांसतीचोपविशेत्क्वचित् ॥ ६८ ॥ तीर्थस्नानार्थिनीनारीपतिपादोदकंपिबेत् ॥ शंकरादपिविष्णो
र्वापतिरेवाधिकःस्त्रियाः॥६९॥ व्रतोपवासनियमंपतिमुल्लंघ्ययाचरेत्॥आयुष्यंहरतेभर्तुःसानरकमृच्छति ॥ ७० ॥
उक्ताप्रत्युत्तरंदद्यान्नारीक्रोधेनतत्परा ॥ सरमाजायतेग्रामेसृगालीनिर्जनेवने ॥ ७१ ॥ स्त्रीणांहिपरमश्चैकोनियमः
समुदाहृतः॥ अभ्यर्च्यभर्तुश्चरणौभोक्तव्यंचसदास्त्रिया॥७२॥ याभर्तारंपरित्यज्यमिष्टमश्नातिकेवलं॥ उलूकीजा
यतेक्रूरावृक्षकोटरशायिनी ॥ ७३ ॥ याभर्तारंसमुत्सृज्यरहश्चरतिकेवलं ॥ ग्रामेवासूकरीभूयाद्वल्गुलीवास्ववि
ड्भुजा॥ ७४ ॥ याहुंकृत्याप्रियंब्रूतेसामूकाजायतेखलु॥ यासपत्नींसदेर्ष्येतदुर्भगासान्यजन्मनि ॥७५॥ दृष्टिंविलु
प्यभर्तुर्याकंचिदन्यंसमीक्षते ॥ काणावाविमुखीचापिकुरूपाचैवजायते ॥७६ ॥ बाह्यादागतमालोक्यत्वरिताच
जलासनैः॥ तांबूलैर्व्यजनैश्चैवपादसंवाहनादिभिः ॥ ७७॥ अतिप्रियतरैर्वाक्यैर्भर्तारंयासुसेवते ॥ पतिव्रताशि
रोरत्नंसानारीकथिताबुधैः ॥ ७८ ॥ भर्तादेवोगुरुर्भर्ताधर्मतीर्थव्रतानिच॥ तस्मात्सर्वंपरित्यज्यपतिमेकंसमर्चये

तु ॥ ७९ ॥ जीवहीनोयथादेहःक्षणादशुचितांव्रजेत् ॥ भर्तृहीनातथायोषित्सुस्नाताप्यशुचिःसदा ॥ ८० ॥ अमंग
लेभ्यःसर्वेभ्योविधवाह्यत्यमंगला ॥ विधवादर्शनात्सिद्धिर्जातुक्कापिनजायते ॥ ८१ ॥ विहायमातरंचैकामाशी
र्वादप्रदायिनीं ॥ अन्याशिषमपिप्राज्ञस्त्यजेदाशीविषोपमां ॥ ८२ ॥ कन्यांविवाहसमयेवाचयेयुरितिद्विजाः ॥
भर्तुःसहचरीभूयाज्जीवतोऽजीवतोपिवा ॥ ८३ ॥ तस्माद्भर्तानुयातव्योदेहवच्छाययास्वया ॥ एवंसत्यासदास्थेयं
भक्त्यापत्यनुकूलया ॥ ८४ ॥ व्यालग्राहीयथाव्यालंबिलादुद्धरतेबलात् ॥ एवमुत्क्रम्यदूतेभ्यःपतिंस्वर्गंनयेत्सती ॥
॥ ८५ ॥ यमदूताःपलायंतेसतीमालोक्यदूरतः ॥ अपिदुष्कृतकर्माणमुत्सृज्यपतितंपतिं ॥ ८६ ॥ यावत्स्वलोमसं
ख्यास्तितावत्कोट्ययुतानिच ॥ भर्त्रास्वर्गसुखंभुंक्तेरममाणापतिव्रता ॥ ८७ ॥ शीलभंगेनदुर्वृत्ताःपातयंतिकुलद्व
यं ॥ पितुःकुलंतथापत्युरिहामुत्रचदुःखिताः ॥ ८८ ॥ अनुयातिनभर्तारंयदिदैवात्कथंचन ॥ तत्रापिशीलंसंरक्ष्यं
शीलभंगात्पतत्यधः ॥ ८९ ॥ तद्वैगुण्यात्पितास्वर्गात्पतिःपततिनान्यथा ॥ विधवाकबरीबंधोभर्तृबंधायजायते ॥
॥ ९० ॥ शिरसोवपनंकार्यंतस्माद्विधवयासदा ॥ एकाहारःसदाकार्योनद्वितीयःकदाचन ॥ ९१ ॥ पर्यंकशायिनी
नारीविधवापातयेत्पतिं ॥ तस्माद्भूशयनंकार्यंपतिसौख्यसमीहया ॥ ९२ ॥ नैवांगोद्वर्तनंकार्यंनतांबूलस्यभक्षणं ॥

गंधद्रव्यस्यसंभोगोनैवकार्यस्तयाक्कचित् ॥ १३ ॥ तर्पणंप्रत्यहंकार्यंभर्तुःकुशतिलोदकैः ॥ तत्पितुस्तत्पितुश्चापिना मा.
मगोत्रादिपूर्वकं ॥ १४ ॥ श्वेतवस्त्रंसदाधार्यमन्यथारौरवंव्रजेत् ॥ इत्येवंनियमैर्युक्ताविधवापिपतिव्रता ॥ १५ ॥
श्रीनारायणउवाच नैतादृशंदैवतमस्तिकिंचित्सर्वेषुलोकेषुसदैवतेषु ॥ यदापतिस्तुष्यतिसर्वकामाँल्लभ्यात्प्रका
मंकुपितश्चहन्यात् ॥ १६ ॥ तस्मादपत्यंविविधाश्चभोगाःशय्यासनान्यद्भुतभोजनानि ॥ वस्त्राणिमाल्यानितथैवगं
धाःस्वर्गेचलोकेविविधाचकीर्तिः ॥ १७ ॥ ॥ इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममाहात्म्येश्रीनारायणनारदसं
वादेपतिव्रताधर्मनिरूपणेत्रिंशोऽध्यायः ॥ ३० ॥ ॥छ॥ ॥छ॥ ॥छ॥
सूतउवाच इत्थंपतिव्रताधर्ममाकर्ण्यनारदोमुनिः ॥ किंचित्प्रष्टुमनाविप्रामुनिमाहपुरातनं ॥ १ ॥ नारदउवाच
सर्वदानाधिकंकांस्यसंपुटंपरिकीर्तितं ॥ एतत्कारणमव्यक्तंवदमेबदरीपते ॥ २ ॥ श्रीनारायणउवाच एकदैतद्व्रतं
ब्रह्मन्नचीकरदुमापुरा ॥ तदापृच्छन्महादेवंकिंदेयंदानमुत्तमं ॥ ३ ॥ येनसंपूर्णतांयातिव्रतंमेपौरुषोत्तमं ॥ तन्मेवदद
यासिंधोसर्वेषांहितहेतवे ॥ ४ ॥ तच्छ्रुत्वामनसिध्यायन्ध्यायन्श्रीपुरुषोत्तमं ॥ उमामजीगदच्छंभुःसर्वलोकहितैषि ६०
णीं ॥ ५ ॥ श्रीमहादेवउवाच नशक्यंकिंचिद्देवास्तिदानंश्रीपुरुषोत्तमे ॥ व्रतपूर्णविधिंकर्तुमपर्णेछंदसिक्कचित् ॥ ६ ॥

च्छति ॥ ५१ ॥ लब्ध्वानुज्ञांतदापत्युर्गच्छेदंध्यक्षरक्षिता ॥ नवसेत्सुचिरंतत्रप्रत्यागच्छेद्गृहंसती॥ ५२ ॥प्रस्थाना
भिमुखेपत्यौनासन्मंगलभाषिणी॥नवार्योसौनिषेधोक्त्यानकार्यंरोदनंतदा ॥ ५३ ॥ अकृत्वोद्वर्तनंनित्यंपत्यौदेशां
तरेगते॥वधूर्जीवनरक्षार्थंकर्मकुर्यादनिंदितं॥५४॥श्वश्रूश्वशुरयोःपार्श्वेनिद्राकार्यानचान्यतः ॥ प्रत्यहंपतिवार्ताच
तयान्वेष्याप्रयत्नतः ॥५५॥ दूताःप्रस्थापनीयाश्चपत्युःक्षेमोपलब्धये॥देवतानांप्रसिद्धानांकर्त्तव्यमुपयाचनं॥५६॥
एवमादिविधातव्यंसत्याप्रोषितकांतया॥अप्रक्षालनमंगानांमलिनांबरधारणं ॥ ५७॥ तिलकांजनहीनत्वंगंधमा
ल्यविवर्जनं॥ नखरोम्णामसंस्कारोदशनानाममार्जनं ॥ ५८ ॥ उच्चैर्हासःपरैर्नर्मपरचेष्टाविचिंतनं॥ स्वेच्छापर्यट
नंचैवपरपुंसांगमर्दनं ॥ ५९ ॥ अटनंचैकवस्त्रेणनिर्लज्जत्वंयथागतिः॥इत्यादिदोषाःकथितायोषितोनित्यदुःख
दाः॥ ६० ॥ निर्वर्त्यगृहकार्याणिहरिद्रालेपनैस्तनुं॥ प्रक्षाल्यशुचितोयेनकुर्यान्मंडनमुज्ज्वलं ॥ ६१ ॥ समीपंप्रेय
सोगच्छेद्विकसन्मुखपंकजा॥ अनेननारीवृत्तेनमनोवाग्देहसंयुता॥ ६२ ॥ आहूतागृहकार्याणित्यक्त्वागच्छेच्चस
त्वरं॥ किमर्थंव्याहृतास्वामिन्सप्रसादोविधीयतां॥ ६३ ॥ माचिरंतिष्ठतेद्वारिनद्वारमुपसेवयेत्॥ स्वामिनादापितं
किंचित्कस्मैचिन्नददात्यपि॥ ६४ ॥सेवयेद्भर्तुरुच्छिष्टमिष्टमन्नफलादिकं॥ महाप्रसादइत्युक्त्वामोदमानानिरंतरं

गतागतंभजंतेत्रदुर्भगाजन्मजन्मनि ॥ पुत्रमित्रकलत्राप्तवियोगाद्दुःखभागिनः ॥ २१ ॥ अस्मिन्मासेद्विजश्रेष्ठा
नासच्छास्त्राण्युदाहरेत् ॥ नस्वपेत्परशय्यायांनालपेद्वितथंक्वचित् ॥ २२ ॥ परापवादान्नब्रूयान्नकथंचित्कदाचन
परान्नंचनभुंजीतनकुर्वीतपरक्रियां ॥ २३ ॥ वित्तशाठ्यमकुर्वाणोदानंदद्याद्द्विजातये ॥ विद्यमानेधनेशाठ्यंकुर्वा
णोरौरवंव्रजेत् ॥ २४ ॥ दिनेदिनेद्विजेंद्रायदत्त्वाभोजनमुत्तमं ॥ दिवसस्याष्टमेभागेव्रतीभोजनमाचरेत् ॥ २५ ॥ ध
न्यास्तेपुरुषालोकेयेनित्यंपुरुषोत्तमं ॥ अर्चयंतिविधानेनभक्त्याप्रेमपुरःसरं ॥ २६ ॥ इंद्रद्युम्नःशतद्युम्नोयौवनाश्वोभ
गीरथः ॥ पुरुषोत्तममाराध्यययुर्भगवदंतिकं ॥ २७ ॥ तस्मात्सर्वप्रयत्नेनसंसेव्यःपुरुषोत्तमः ॥ सर्वसाधनतःश्रेष्ठःस
र्वार्थफलदायकः ॥ २८ ॥ गोवर्धनधरंवंदेगोपालंगोपरूपिणं ॥ गोकुलोत्सवमीशानंगोविंदंगोपिकाप्रियं ॥ २९ ॥
कौंडिन्येनपुराप्रोक्तमिमंमंत्रंपुनःपुनः ॥ जपन्मासंनयेद्भक्त्यापुरुषोत्तममाप्नुयात् ॥ ३० ॥ ध्यायेन्नवघनश्यामंद्वि
भुजंमुरलीधरं ॥ लसत्पीतपटंरम्यंसराधंपुरुषोत्तमं ॥ ३१ ॥ ध्यायंध्यायंनयेन्मासंपूजयन्पुरुषोत्तमं ॥ एवंयःकुरुते
भक्त्यास्वाभीष्टंसर्वमाप्नुयात् ॥ ३२ ॥ गुह्याद्गुह्यतरंचैतन्नवाच्यंयस्यकस्यचित् ॥ मयापिकथितंनैवकस्याप्यग्रेतपो
धनाः ॥ ३३ ॥ श्रोतव्यमेतत्सततंपुराणमभीष्टदंपावनमादरेण ॥ श्लोकैकमात्रश्रवणेनपुंसामघानिसर्वाणिनिहं

तिविप्राः॥३४॥ गंगादिसर्वतीर्थेषुमज्जतोयत्फलंभवेत्॥ तत्फलंशृण्वतस्तस्यमाहात्म्यंमुनिसत्तमाः॥३५॥इलांप्र
दक्षिणीकुर्वन्यत्पुण्यंलभतेनरः॥ तत्पुण्यंशृण्वतस्तस्यमाहात्म्यंपौरुषोत्तमं ॥ ३६॥ ब्राह्मणोब्रह्मवर्चस्वीक्षत्रियो
वसुधाधिपः॥ वैश्योधनपतिर्भूयाच्छूद्रःसत्तमतांलभेत्॥ ३७॥ येन्येकिरातहूणाद्याःपशुचर्यापरायणाः॥तेसर्वेमु
क्तिमायांतिश्रुत्वामाहात्म्यमुत्तमम्॥३८॥ पुरुषोत्तममाहात्म्यंलेखयित्वाद्विजन्मने॥ संभूष्यवस्त्रभूषाभिर्विधिना
यःप्रयच्छति॥ ३९॥ कुलत्रयंसमुद्धृत्यगोलोकंयातिदुर्लभं॥ यत्रास्तेगोपिकावृंदैर्वेष्टितःपुरुषोत्तमः॥ ४०॥ लि
खित्वाधारयेद्यस्तुगृहेमाहात्म्यमुत्तमं॥तद्गृहेसर्वतीर्थानिविलसंतिनिरंतरं ॥ ४१॥ मासोत्तमस्यमहिमानमनंतपु
ण्यंश्रुत्वासुविस्मितधियोमुनयश्चसर्वे॥ऊचुश्चसूततनयंविनयेनविष्वक्सेनांघ्रिसेवनविधौनिपुणानितांतं॥४२॥
ऋषयऊचुः सूतसूतमहाभागधन्योसित्वंमहामते॥ त्वन्मुखामृतपानेनकृतार्था[illegible]वयंभृशं॥ ४३॥ चिरंजी
वसदासूतपौराणिकशिरोमणे॥ अस्तुतेशाश्वतीकीर्तिर्जगत्पावनपावनी॥ ४४॥ तुभ्यंप्रदत्तंनिमिषालयस्थैर्ब्र
ह्मासनंपूज्यतमंमुनीशैः॥त्वदीयवक्त्रांबुजनिर्गतश्रीमुकुंदवार्तामृतपानलोलैः॥ ४५॥ विष्टरश्रवसएवपवित्रा
यावदेववितताभुविकीर्तिः॥ तावदत्रमुनिवर्यसमाजेश्रीहरेर्वदकथांकमनीयां॥ ४६॥ इत्थंद्विजाशीर्वचनंप्रगृ

त्यप्रदक्षिणीकृत्यद्विजान्समस्तान् ॥ नत्वागमद्देवनदींस्वकीयंकृत्यंविधातुंसचसूतसूनुः ॥ ४७ ॥ अन्योन्यमूचु
र्निमिषालयस्थावरिष्ठमाहात्म्यमिदंपुराणं ॥ मासस्यदिव्यंपुरुषोत्तमस्यसमीहितार्थार्पणकल्पवृक्षं ॥ ४८ ॥
इतिश्रीबृहन्नारदीयपुराणेपुरुषोत्तममाहात्म्येश्रीनारायणनारदसंवादेपुरुषोत्तममाहात्म्यश्रवणफलकथनंनामए
कत्रिंशोऽध्यायः ॥ ३१ ॥ ॥समाप्तेयंपुरुषोत्तममाहात्म्यस्यतृतीयावृत्तिः ३ ॥ ७ ॥ ॥ ७ ॥

इदं पुस्तकं मुंबय्याख्यराजधान्यां गणपतकृष्णाजीत्यभिधानां मुद्रायंत्रालया
धिकारिणा आत्मारामकान्होबाभिख्येन स्वीययंत्रालये मुद्रितं.तस्येयं
तृतीयावृत्तिः शकाब्दाः १८११ मासश्चज्येष्ठः

यद्यद्दानंगिरिसुतेत्वयुत्तमंपरिकीर्तितं ॥ श्रीकृष्णवल्लभेमासितत्सर्वंगौणतांगतं ॥ ७॥ तस्मादेतादृशंदानंनैवास्तिक्का
पिसुंदरि ॥ येनतेव्रतसंपूर्तिर्भवेद्धीपुरुषोत्तमे ॥ ८॥ पुरुषोत्तममासेस्मिन्व्रतसंपूर्णहेतवे ॥ ब्रह्मांडसंपुटाकारंतदर्हं
देयमंगने ॥ ९ ॥ नशक्यंतत्तुकेनापिदातुंक्कापिवरानने ॥ तस्मादेतत्प्रतिनिधिंकृत्वाकांस्यस्यसंपुटं ॥ १० ॥ तन्मध्ये
पूरयित्वैवापूपांस्त्रिंशन्मितान्मुदा ॥ सप्ततंतुभिरावेष्ट्यसंपूज्यविधिवत्प्रिये ॥ ११ ॥ देयंविप्रायविदुषेव्रतसंपूर्तिहेतवे
एवंत्रिंशन्मितान्येवदेयानिसतिवैभवे ॥ १२ ॥ इत्याकर्ण्यवचोरम्यंधूर्जटेरुपकारकं ॥ अब्रवीद्भवदुमाहृष्टासर्वलो
कहितैषिणी ॥ १३ ॥ त्रिंशत्कांस्यानिविद्वद्भ्यःसंपुटानिव्यतीर्यसा ॥ पूर्णंव्रतविधिंकृत्वामुमोदातीवनारद ॥ १४ ॥
सूतउवाच इत्याकर्ण्यमुनिर्विप्रानारायणवचोमृतं ॥ पुनराहातितृप्तोसौनामंनामंपुनःपुनः ॥ १५॥ नारदउवाच
सर्वेभ्यःसाधनेभ्योयंमासःश्रीपुरुषोत्तमः ॥ वरीयान्निश्चितोमेद्यश्रुत्वामाहात्म्यमु[illegible] १६ ॥ श्रुत्वापिजातयेभ
क्त्यामहापापक्षयोनृणां ॥ किंपुनःश्रद्धयाकर्तुर्विधिनाचेतिमेमतिः ॥ १७॥ अतःपरंनकिंचिन्मेश्रोतव्यमवशिष्यते
पीयूषात्यंतसंतृप्तोनान्यत्तोयंसमीहते ॥ १८॥ सूतउवाच इत्युक्त्वाविरतोविप्रोनारदोमुनिसत्तमः ॥ अनीनम
त्पादपद्मंपुरातनमुनेःपरं ॥ १९॥ भारतेजनुरासाद्यपुरुषोत्तममुत्तमं ॥ नसेवंतेनशृण्वंतिगृहासक्तानराधमाः ॥ २०॥